सो ऽयं भास्करप्रोक्तपाटिगणिते सद्युक्तियुक्ते ऽकरोट्
टीकां सद्गणितामृतस्य लहरीं तत्त्वार्थबोधप्रदां ।
नंदाभ्रर्तुम१२६०मामिति(!) शकगते वर्षे सहस्यासिते
पक्षे सर्वतिथौ सदाशिवपदार्चार्थं हि भूयात्सदा ॥

इति श्रीनृसिंह[दैवज्ञात्मजलक्ष्मण]दैवज्ञसुतसिद्धांतविद्दैवज्ञरामकृष्णविरचिता लीलावतीवृत्तिर्गणितामृतलहरी संपूर्णा ॥ संवत् १८७० रावर्षे शाके १७३५ प्रवर्तमाने मासोत्ममासे(? मासोत्तमासे) चैत्रमासे कृष्णपक्षे पंचम्यां तिथौ शुक्रवासरे ॥

Cp. the same author's commentary (*Bīja-prabodha*) on the *Bījagaṇita*, no. 2832; the colophon of which shows what has been omitted by the present copyist.

[DR. JOHN TAYLOR.]

2805.

1895. Foll. 96; size $6\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; good, clear Devanāgarī writing of 1814 A.D.; ten lines in a page.

A fragment of *Gaṅgādhara's Gaṇitāmṛita-sāgarī*, followed by the concluding portion of *Rāmakṛishṇa's Gaṇitāmṛitalaharī.*

The last colophon of the former work occurs on fol. 47*b*: इति भास्करीयलीलावत्या विवरणे गणकगंगाधरविरचिते श्रेढीव्यवहारविवृतिः समाप्ता ॥ (MS. 728, fol. 32*b*), while the first colophon of the latter commentary is found on fol. 73*a*: इति श्रीभास्करीयलीलावतीटीकायां सिद्धांतदैवज्ञरामकृष्णविरचितायां गणितामृतलहरीसंज्ञायां क्षेत्रव्यवहारः ॥ and the junction of the two commentaries occurring on fol. 56*b*, corresponding to fol. 56*a* of MS. 1807, from which indeed the latter portion of the volume is derived, containing as it does the same copyist's colophon with the Saṃvat and Śaka dates; and the special date Śaka 1736 added thereto.

[DR. JOHN TAYLOR.]

2806.

728. Foll. 61; size $12\frac{3}{4}$ in. by $6\frac{1}{4}$ in.; good, modern Bengalī handwriting; 13 lines in a page.

Gaṇitāmṛitasāgarī, or *Amṛitasāgarī* (*Līlāvatīpāṭīkāṭīkā*), a commentary on *Bhāskarācārya's Līlāvatī*, by *Gaṅgādhara*, son of *Govardhana*, grandson of *Divākara* of Jambūsaronagara, and younger brother of *Lakshmīdhara* and *Vishṇu Paṇḍita* (author of the *Gaṇitasāra*).

It begins:

आदित्यं जगदुद्भवस्थितिलयव्यापारपारंगमं[1]
धीरा ब्रह्म षडूर्मिदोषरहितं पश्यन्ति यं हृद्गतं ।
भक्तानां च मनोरथार्थफलदं क्लेशत्रयच्छेदकं
गीतं सत्स्तुतिभिः सदोदयमहं वन्दे जगद्भास्करं ॥ १ ॥

गुरोरङ्घ्रिपद्मद्वयं च प्रणौमि
प्रसादोन्मुखं[2] सिंधुरास्यं गणेशं ।
जगद्बोधरूपां मतिं विश्वमायां
गिरां चेश्वरीं ब्रह्मपुत्रीं प्रसन्नां ॥ २ ॥

महेश्वरो ऽभूच्च महेश्वरस्य
प्रसादलब्धोदयबुद्धिवृद्धिः ।
तस्यात्मजो भास्करलब्धबोधः
श्रीभास्कराचार्य इति प्रसिद्धः ॥ ३ ॥

वेदोपवेदवेदाङ्गवेत्ता विश्वैककोविदः ।
गणितज्ञगणाग्रे यो गणनायां द्विजोत्तमः ॥ ४ ॥

ब्रह्मादिर्जगदादिकालकलना पञ्चप्रकारा गतिः
खेटानां च सवासना च विनियन्नोलप्रपञ्चस्थितिः ।
यन्त्राणि द्विविधं च यत्र गणितं तेन क्रमाद्विस्तृतं
सत्सिद्धान्तशिरोमणौ सुकविना श्रीभास्करेण स्फुटं ॥ ५ ॥

विष्णुस्वरूपं गणितं रहस्यं
व्यक्तं तथाव्यक्तमिति द्विधा यत् ।
गुरुप्रसादाभ्यसनैर्विदित्वा
मुच्येत धीमान्महतो ऽपि मोहात् ॥ ६ ॥

अव्यक्तं बीजभूतत्वाद् गणितं बीजसंज्ञितं ।
व्यक्तं च पाटीगणितं प्राहुर्गणितवित्तमाः ॥ ७ ॥

तत्र लीलावती नाम गणितोत्तमपाटिका ।
रचिता भास्करेणान्यपाटिकोत्तंसरूपिणी ॥ ८ ॥

---

[1] MS. 1895 reads: °स्थितिविभुं भासां निधिं योगिनां; cf. Rāj. M.'s and Berl. MSS.

[2] Thus MS. 1895; प्रणम्य प्रसोदन्मुखं MS. 728.

श्रीयाज्ञवल्क्यमुनिवर्यकृतप्रतिष्ठं
जम्बूसरोनगरमस्ति सुतीर्थमग्र्यं ।
धीमांस्तु वत्सकुलजो ऽत्र दिवाकराख्य-
ज्ञानो दिवाकर इति प्रथितो द्विजो ऽभूत् ॥ ९ ॥

तत्सूनुर्गणितश्रुतिस्मृतिपुराणज्ञो ऽग्रगण्यो विदां
श्रीगोवर्धनपादपद्मशरणं स्वान्तःपवित्रात्मवान् ।
सद्वृत्तः सुयशाः परोपकृतिकृद् दीने दयालुः कृती
श्रीगोवर्धनसंज्ञितो द्विजवरः ख्यातो ऽस्ति भूमण्डले॥१०॥

तत्सूनुरनुजो विष्णोर्धीमान्[1] लक्ष्मीधराद्बुधात् ।
गङ्गाधरकृपालब्धोदयो गङ्गाधराह्वयः ॥ ११ ॥

तेन ध्यातदिवाकरेण सुधिया[2] विद्वत्सु च प्रीतिदा
संदेहार्तिविनाशिनी गणकधीवृद्धिप्रदारभ्यते ।
श्रीगोवर्धननन्दनेन विमला लीलावतीपाटिका-
टीका चामृतसागरीति[3] सरला गङ्गाधरेण स्फुटा॥१२॥०

From a passage occurring on fol. 60*a* [अथाग्रयोगादित्यादि शको पे ४२ भाद्रपदशुदि १५ शुक्रेत(!) श्रीसूर्यसिद्धान्तशिरोमणौ संसाधितो ऽहर्गणः १२०६३६०९४१९७ कल्पे कुदिनानि १५७७९६४५०००० रविभागाः ४७२०००००००० अतः साधितः राश्यादिरवेर्भगणः०] Colebrooke supposes this commentary to have been composed about Śaka 1342 (A.D. 1420); but in a marginal note on that passage he remarks that the number (of days from the beginning of the *Kalpa*) in the text seems to be wrong.

It ends:

तेषां विशुद्धगुणवर्णविभूषिताङ्गी
शुद्धाखिलव्यवहृतिः खलु कण्ठशक्त्या ।
लीलावती तु शरलोक्तिमुदा हरन्ति(? हरन्ती)
तेषां सदैव सुखसंपदुपैतु वृद्धिं ॥

इति श्रीगणकगङ्गाधरविरचितायाममृतसागर्यां लीलावतीविवृतिः समाप्ता ॥

Cf. Rāj. Mitra, Notices, iii., p. 243; Weber, Berlin Cat., nos. 831, 1739.

[H. T. Colebrooke.]

[1] वृत्तो धीमान् MS. 728.

[2] ध्यातदिवाकराप्तसुधिया MSS. 1895, Berl.

[3] ०पाटिका या चैकामृतसागरीति MS. 1895.

2807.

2278. Foll. 47 (paged 1–93); size 4to, 13 in. by 9¾ in.; good, modern Devanāgarī writing; 24 lines in a page.

Gaṇitāmṛitasāgarī; apparently copied from the preceding MS. [Calcutta.]

2808.

1061b. Foll. 13; size 6¾ in. by 4¼ in.; legibly written, in Devanāgarī, about 1780 A.D.; 13 lines in a page.

A fragment of the same work; viz. the second chapter (*parikarmāshṭaka*), extending from fol. 4*b* to 12*a* of MS. 728.

[H. T. Colebrooke.]

2809.

115. Foll. 114; size 10 in. by 4¼ in.; fair Devanāgarī writing of the latter part of the last century; 10 or 11 lines in a page.

Gaṇitāmṛitakūpikā, a commentary on the *Līlāvatī,* composed, in Śaka 1463 (A.D. 1541), by *Sūryadāsa* or *Sūryakavi,* son of *Jñānarāja,* and grandson of *Nāganātha,* of the *Bhāradvājakula,* a resident of Pārthapura, near the confluence of the Godā and Vidarbhā.‡

It begins:

यः पीयूषमयूखशोभितशिरोदेशः सुरेशार्चितः
शेषाशीविषभूषणो मदगलद्दानाम्बुपूरप्रदः ।
कर्णांदोलितचारुचामरमहन्मालाविलासोल्लसच्-
चित्तोन्मत्तमतंगतुंगवदनः पायादपायात्स वः ॥ १ ॥

* The Vidarbhā, according to Colebrooke, is the modern Wardhā; but as, on our maps, that river does not flow directly into the Godāvarī, but into the Prānhitā, the latter would seem here to be taken as forming the lower part of the Wardhā. No such name as Pārthapura is, however, given on our maps near the confluence of that river and the Godāvarī. Indeed, in our author's *Sūryaprakāśa* (no. 2823), this lower part of the river (resulting from the confluence of the Wardhā and the Pengangā) is called Mangalāgangā.

भृंगश्रेण्योव(? त)वेणी विलसति० ॥ २ ॥

अव्यक्तं गणितं सवासनतया व्याख्याय लीलावतीं
व्याख्यातुं विहितादरो ऽस्म्यहमथ व्यक्तोपपत्तिक्रमैः ।
श्रीमत्सुज्ञविधिज्ञपंडितवरज्ञानाधिराजात्मजः
स्वप्रज्ञापरिणामतः सुगणकः सूर्याभिधानः कविः ॥ ३ ॥

निर्मथ्य वीजगणितारवि(? णि)मात्मयत्नात्
सद्वासनामृतमवाप्तमिदं मया यत् ।
तत्संग्रहाय गणितार्णवकूपिकेयं(!)
टीका विरच्यत इहावनिदेवतुष्ट्यै ॥ ४ ॥ ०

It ends :

अस्ति त्रस्तसमस्तदोषनिचयं गोदाविदर्भायुतेः
क्रोशेनोत्तरतः तदुत्तरतटे पार्थाभिधानं पुरं ।
तत्राभूद्गणकोत्तमः पृथुयशाः श्रीनागनाथाभिधो
भारद्वाजकुले सदैव परमाचारो द्विजन्माग्रणीः ॥ १ ॥

पुत्रस्तस्य कलाकलापकुशलः क्ष्मापालमालार्चितः
सौजन्यैकसुधाकरः क्षितितले सौभागभाग्यास्पदं ।
कीर्तिर्यस्य दिगंतरेषु विविधैर्व्या[ख्या]नसंख्यागमैर्
विख्याता ननु सत्कविर्विजयते श्रीज्ञानराजाभिधः ॥ २ ॥

तत्सूनुर्गणितार्णवप्रतरणेः सत्कर्णधारः सुधीश्
छंदोऽलंकृतिगीतशास्त्रनिपुणो वैदग्ध्यपारंगतः ।
सूर्यो दैवविदां मुदे रचितवान्व्यक्तस्य टीकामिमाम्
आचार्याः सदसद्विचारचतुराः पश्यंतु तुष्यंतु च ॥ ३ ॥

दुर्ज्ञेया गणितोपपत्तिरथ० ॥ ४ ॥

आस्वादितापि विविधैरुपयाति वृद्धिं
व्यक्तादिपक्षयुगले ऽपि तनोति शोभां ।
पूर्णा कलाभिरत एव सुधांशुमूर्तेर्
आधिक्यमेति गणितामृतकूपिकेयं ॥ ५ ॥

परोपकारार्थमुदाहृतेन
मद्वाग्विलासेन रसोत्कटेन ।
शब्दाभिधं ब्रह्म यतः प्रवृत्तं
य($r.$ स) प्रीयतां यादवराजसिंहः ॥ ६ ॥

सदला त्रिसहस्री ३१०० स्यादनुष्टुभां ग्रंथसंमितिः शाके ।
त्रिरसपुरंदरगणिते गणितामृतकूपिका रचिता ॥ ७ ॥

व्याख्ये वासनयान्विते गणितयोर्लीलावतीवीजयोस्
तद्वच्छ्रीपतिपद्धतेश्च गणितं वीजं तरथेकं($r.$ तथैकं)
[व्यधात् ।
एकं ताजिकमच्युतार्थमपरं काव्यद्वयं प्रौढधीः
सूर्यो वोधसुधाकराख्यमकरोदध्यात्मशास्त्रे ऽष्टमं ॥ ८ ॥

The colophon, written by a different hand, runs: इति श्रीमत्सकलानवविद्याविद्योतमानमानसगणितोपनिषद्रहस्याभिज्ञदैवज्ञपंडितज्ञानराजतनयपंडितसूर्यदासविरचिता गणितामृतकूपिका भास्करीयलीलावतीटीका संपूर्णा ॥

Besides the above-mentioned eight works of the author,—viz. the commentaries on *Līlāvatī* and *Bījagaṇita*, and on the *Śrīpatipaddhati* (and a *Bījagaṇita* of his own), a *Tājika*, two *Kāvyas* (probably the *Nṛisiṃha-campū* and *Rāmakṛishṇa-kāvya*), and the *Bodhasudhākara* on the *Adhyātmaśāstra* (?)—he (subsequently to 1541 A.D.) composed other works, for which see Aufrecht, Cat. Cat., sub *Sūryakavi*.

For the earlier ancestry of our author see no. 2901. [H. T. COLEBROOKE.]

2810.

2275. Foll. 90 (erroneously counted 92); size 4to, 13 in. by 10 in.; good modern Devanāgarī writing; 23 lines in a page.

The same work. A reproduction of the preceding MS. [CALCUTTA.]

2811.

1012. Foll. 105; size 11¾ in. by 4½ in.; fairly good Bengalī handwriting of 1658 A.D.; ten lines in a page.

Buddhivilāsinī, a commentary on the *Līlāvatī*, composed, in Śaka 1467 (1545 A.D.), by *Gaṇeśa*, son of *Keśava*, of Nandigrāma.

It begins :

श्रीविद्याधरसेवितो द्विजपतिश्रीवर्धनो[1] यस्त्रयी-
मूर्तिः स्वोन्नमनात्सदा सुमनसामानन्दपूरप्रदः ।
कव्याचार्यविदो[2] ऽपि यत्पदमिताः[स्युः] स्वप्रकाशा अपि
द्युत्पूना जयति क्षितौ खगपतिः[3] श्रीकेशवः सद्गुरुः ॥

अथ त्रयी वाची ॥

शरज्ञाव इवानीश शनीरामुरधामश[4] ।
शमधाम वै पापाश शपाप हृदिज्ञावश[5] ॥

अष्टदलपद्मबन्धश्लोकः ॥

श्रीभास्करोक्तवचसामपि संस्फुटानां
व्याख्याविशेषकथनेन न चास्ति चित्रं ।
अत्रोपपत्तिकथने ऽखिलसारभूते
पश्यन्तु सुज्ञगणका मम बुद्धिचित्रं ॥

व्यक्ते ऽव्यक्तसंज्ञे यदुदितमखिलं नोपपत्तिं विना तच्चेद्
विभ्रान्ता नो ऽत्र ते तां सुगणकसदसि प्रौढतां नैति
[चायं(?) ।
प्रत्यक्षं दृश्यते सा करतलकलितादर्शवत्सुप्रसन्ना
तस्मादग्र्योपपत्तिं निगदितुमखिलामुत्सहे बुद्धिवृद्ध्यै ॥

नानागमार्थनिपुणः प्रथितो धरायां
श्रीकेशवो ऽस्य तनयेन गणेशनाम्ना ।
लीलावतीविवृतिरग्रिमबुद्धितुष्ट्यै
प्रारभ्यते विमलबुद्धिविलासिनीयं ॥

अत्रोच्चावचदैवज्ञा दृष्ट्वा व्याख्यानकौशलं ।
तुष्यन्तु मतिमन्तस्तु वासनावचनामृते ॥

Having explained his first two mysterious stanzas—the first in three different ways—he proceeds to explain his text. The first leaf of the MS. having suffered considerably through wear, a somewhat later hand has supplied a fresh copy of the first page on two leaves, the first of which has been inserted in front (in consequence of which the original pagination of the leaves was afterwards changed), and the second at the end of the volume.

After another stanza to *Keśava* (भुवनवदवरिष्ठे०), which he again thinks it necessary to explain, the author concludes his work as follows:

दृष्ट्वा केचिदिहोपपत्तिममलां तुष्यन्तु ये सज्जनाः
केचित् सत्कवितान्विता विशेषवचनां (?विरचनां)
[व्याख्यादिकं केचन ।
केचिद्विब्रुवते ऽत्र किंचिदपि नापूर्वं वचो ऽस्तीति ये
तुष्यन्तु स्वगिरैरतिपि(?) निखिलं पश्यन्तु सन्तः समं ॥

श्रीमत्सज्जनधामवृन्दरुचिरे क्षाराम्बुधेः प्राक्तटे*
नन्दिग्राम इहावसद् द्विजवरः श्रीकेशवो ऽस्यात्मजः ।
तत्पादाब्जयुगाप्तशास्त्रविभवः श्रीमद्गणेशः कृती
नानायुक्तिमतीमिमां हि कृतवान् लीलावतीव्याहृतिं ॥

श्रीशालिवाहनशके ऽद्रिरसेन्द्रतुल्ये १४६७
विश्वावसौ शरदि मासि मधौ सिताजे(!) ।
लीलावतीसुविवृतिं कृतवान् गणेशः
श्रीकेशविगणकवर्यकुलावतंसः ॥

श्रीकालागमाचार्यवर्यश्रीकेशवदैवज्ञसुतश्रीगणेशदैवज्ञविरचिता लीलावतीटीका बुद्धिविलासिनी समाप्ता ॥ ०

वारः शक्रयुतस्तिथिस्त्रिगुणिता वेदोत्थता वत्सरो
मासस्तस्य दलं च तद्युतिदलं खाष्टाहतं षष्टियुक् ।
शाकः स्यान्नगभूशतप्रपतितो नक्षत्रयोगाहतिः
स्याद् द्व्यूनाङ्ककृता भयो गजमितिर्नवाङ्कसप्तेन्दवः ॥
[१७६९ ॥

शके खनागेषुमहीमिते (1580) ऽङ्के लीलावतीबुद्धिविलासिनीयं। श्रीगङ्गारामशर्मणा लिखीतं नारसिंहिना सौरभुचावलिखे(!) ॥ श्रीरामचन्द्रचक्रवर्तीणः स्वकीयपुस्तकमिदं ॥

Cf. Colebrooke, Misc. Ess., ii., p. 451.

[H. T. COLEBROOKE.]

2812.

89b. Foll. 100; size 10 in. by 4½; fairly good Devanāgarī writing of 1797 A.D.; ten lines in a page.

---

[1] द्विजपतयो द्विजश्रेष्ठाः० तान् श्रिया लक्ष्म्या वर्धयतीति ॥० द्विजाः पक्षिणस्तेषां पतिर्गरुडः। तस्य श्रीस्तां वर्धयतीति तद्वा ॥ comm.

[2] कवयः प्रसिद्धाः। आचार्यविदो ऽध्यापकाः शास्त्राभिज्ञाः। comm.

[3] खगः श्रीसूर्यः ०। सूर्योपासक इत्यर्थः। comm.

[4] शरेषु बाणवृक्षेषु जातः कार्त्तिकेयः। तमवति पालयति प्रीणयति॥ शनिं शनिपीडां ईरयति निराकरोतीति शनीरा॥ असुरस्थानं श्यति तक्ष्णोतीति ० ॥

[5] शमः शान्तत्वं योगादित्वस्य धाम निकेतनं॥० शापाः(?शपः) द्वेष्टारः तान्न पाति न रक्षतीति शपापः ॥ हृदि जातः हृदिजः मनोभवस्तमवमत्यष(?०त्याय) श्यति तक्ष्णोतीति हृदिजावज्ञः ॥

* That is, on the shore to the east of the (western) ocean; for we know from the *Grahalāghava* that Nandigrāma was situated in the Aparānta country in the west (the northern Konkan, according to Prof. Bhandarkar, Rep. 1882-3, p. 29).

Buddhivilāsinī. This MS. is written in the same hand as the text of the *Līlāvatī* contained in the same volume.

Whether the following verse at the end refers to the copyist of the present or a former MS. does not appear:

शांडिल्याख्यकुले स्वकीर्तिविमले श्रीमल्लिनाथो ऽभवत्
तस्यासीत्तनयः कृतातिविनयः श्रीत्र्यंबकाख्यो महान्।
ज्योतिःशास्त्रविचारसारचतुरो गोपालनामाकरो
वृद्धीनां जगदंबिकांघ्रिकमलद्वंद्वातिसेवापरः ॥

संवत् १८५४ वैशाखमासे शुक्लपक्षे अष्टम्यां गुरुवारे ॥

[H. T. Colebrooke.]

2813.

2279. Foll. 96; size 4to, 13 in. by 9¾ in.; good, clear Devanāgarī writing of 1812 A.D.; 23 lines in a page.

The same work. A reproduction of the preceding MS.

[Calcutta.]

2814.

133. Foll. 89; size 9¾ in. by 4¾ in.; good, clear, modern Devanāgarī writing; eleven lines in a page.

Mitabhāshiṇī, a commentary (*vivṛiti*) on *Bhāskara's Līlāvatī,* by *Gaṇakasārvabhauma Raṅganātha,* son of *Nṛisiṃha daivajña,* and brother of *Divākara* and *Kamalākara.*

It begins:

यत्पादपद्मभजनादतिमंदबुद्धिर्
यन्मादृशो ऽपि सुतरां सुमतिः प्रजातः ।
वंदे तमीशभजनाप्तमतिप्रसारं
श्रीमच्छिवं गणकवर्यकुलावतंसं ॥ १ ॥

सरस्वती यद्रसनाग्रगा नरी-
नृतीति तं पंडितमंडनायितम् ।
कलाकलापाकलनाकुलानिधिं
गुरुं गुरूणां कलये दिवाकरम् ॥ २ ॥

गुणमंडितपंडिताग्रणीं विधिविन्मंडलमंडनायितम् ।
दधतं श्रियमुत्तमां गुरुं सततश्रीकमलाकरं भजे ॥ ३ ॥

या भास्करोक्ता चतुरोक्तिशालिनी
लीलावती तत्र विलोकयंतु ।
मद्वासनाचारुविचारचातुरी-
चमत्कृतिं चारुविचारवंतः ॥ ४ ॥

या ऽव्यक्तरीत्या यदलेखि पूर्वैर्
युक्तिर्न युक्तात्र नयोऽस्तु भेदात्(?) ।
व्यक्तानवद्या हृदये ऽत्र हृद्या
विद्यावतां तोषकरी भवद्भिः ॥ ५ ॥

इत्थं हि सच्छिष्यगणैर्विशिष्य
संप्रार्थितो ऽहं कृतिरंगनाथः ।
तद्वासना[चारुवि]चारसारं
व्याख्यावतारं प्रकटीकरिष्ये ॥ ६ ॥

श्रीभास्करकृतेर्व्याख्यामाख्यातुमपि न क्षमः ।
तथाप्यनुग्रहाद्भानोः करोमि मितभाषिणीम् ॥

अथ विशिष्टशिष्टाचारपरिप्राप्तं मंगलमाचरन् चिकीर्षितं प्रतिजानीते । प्रीतिमिति ० ॥

It ends:

दैवज्ञवर्यगणसेव्यनृसिंहजन्म-
श्रीरंगनाथगणकेन विनिर्मिते ऽस्मिन् ।
लीलावतीविवरणे बहुयुक्तियुक्ते
यातोंकपाश इति चारुविधानलभ्यः ॥

इति श्रीसकलगणकसार्वभौमश्रीमन्नृसिंहदैवज्ञसुतरंगनाथकृतायां लीलावतीविवृतौ मितभाषिणीसमाख्यायां अंकपाशाध्यायः समाप्तिमगमत् ॥

The author quotes his brother *Kamalākara* (foll. 27*b*, 36*b*, 37*b*, 41*b*), his father *Nṛisiṃha* (foll. 50*a*, 53*a*), *Padmanābha* (fol. 67*b*), *Śrīdhara* (foll. 47*b*, 50*a*, 67*b*); and the works *Gaṇitakaumudī* (foll. 47*b*, 49*a*, 50*a*), *Pāṭīratna* (foll. 44*a*, 47*b*), *Śriṅgāratilaka* (foll. 42*a*, 53*a*).

Colebrooke, Misc. Ess., ii., p. 452, puts the author's date about the middle of the 16th century of the Śaka era (*c.* 1630 A.D.). His brother *Kamalākara,* indeed, wrote his *Siddhāntatattvaviveka* (no. 2890-91) in 1658 A.D.

[H. T. Colebrooke.]

2815.

2276. Foll. 40; size 4to, 13 in. by 10 in.; fair, modern Devanāgarī writing; 26 lines in a page.

Mitabhāshiṇī, transcribed from the preceding MS. [CALCUTTA.]

2816.

1742. Foll. 59 (one of which, 53, seems to be missing); size 9¼ in. by 4 in.; legibly written in Devanāgarī, about 1750 A.D.; 13 lines in a page.

Manorañjana, a commentary (*vivaraṇa*) on the *Līlāvatī,* by *Rāmakrishṇa Deva,* son of *Sadāśiva Āpadeva* and *Bhavānī,* grandson of *Śrīpati Deva,* a resident of Devālayapura, great-grandson of *Nīlakaṇṭha Deva,* and great-great-grandson of *Gopāla Deva,* of the *Ātreya-gotra.*

It begins: प्रीतिमिति । अहं भास्कराचार्यः०

It ends:

लीलावती सुगहना शक्या नैव कथंचन ।
उपायेन वशीकर्तुमिति सर्वत्र निश्चितं ॥ १ ॥
आपदेवसुतत्वेन धृत्वोभयसमांशकं ।
मनोरंजनमात्रेण रामकृष्णस्तथाकरोत् ॥ २ ॥
आत्रेयगोत्रे सुतरां पवित्रे
गोपालदेवो विबुधादिदेवः ।
अभूद्भूमिः प्रतिवादिजन्मनां
पराभवानां भुवनैकमान्यः ॥ ३ ॥
तस्मादभूच्छास्त्रविदां वरिष्ठः
श्रीनीलकंठो ऽर्चितनीलकंठः ।
तस्मादभूत्पंडितमंडलीडितः
श्रीश्रीपतिः श्रीपतिसक्तचेताः ॥ ४ ॥
शेषपन्नगगरी रुचिरैकवक्त्रा
तर्कनीतिरदनोपनिषत्सुवक्षाः ।
ज्योतिषामयननेत्रमनोऽभिरामा
छंदसां चितिपदा सकलागमांगी ॥ ५ ॥
जिह्वाप्रांगणरंगे विद्याविद्याधरी यस्य ।
नृत्यति नानाभावान्विदुषामुपदर्शयंतीव ॥ ६ ॥
सदाशिवो ऽस्ति तत्पुत्रः समर्चितसदाशिवः ।
शब्दधर्मनयाभिज्ञ आपदेवापराभिधः ॥ ७ ॥
तदंगजन्मना रामकृष्णदेवेन निर्मितं ।
लीलावतीविवरणं मनोरंजनसंज्ञकं ॥ ८ ॥
संप्रार्थये ऽहं सततं कृतांजलिर्
निर्म[त्स]रा ये ऽत्र वसंति लोके ।
संशोध्य संशोध्य कृतिं मदीयां
विपश्चितस्ते परिशीलयंतु ॥ ९ ॥

इति श्रीमद्विद्वन्मुकुटमाणिक्यपदवाक्यप्रमाणपारावारीणधुरीण-श्रीमन्नीलकंठदेवात्मजसकलविद्यानिधानश्रीमच्छ्रीपतिदेवात्मज-श्रीमत्सदाशिवदेवापराभिधानश्रीमदापदेवसुतभवानीगर्भजराम-कृष्णदेवनिर्मिते लीलावतीविवरणे मनोरंजनाभिधे ऽंकपाशाध्यायः ॥ समाप्तश्चायं ग्रंथः ॥

देवालयपुरावासिदेवश्रीपतिजन्मनः ।
आपदेवस्य विदुषो जगज्जानातु पुस्तकम् ॥

The MS. from which this verse was copied would thus seem to have been the very one which the author presented to his father. Colebrooke, Misc. Ess., ii., p. 453–4, remarks that this commentary "bears no date, nor any indication whatsoever of the period when the author wrote." As regards the author's grandfather, *Śrīpati,* it may be remarked that the *Daivajñavallabha* (see Cat. Cat.) is ascribed either to *Śrīpati* or to (? his father) *Nīlakaṇṭha.* [H. T. COLEBROOKE.]

2817.

2277. Foll. 46; size 4to, 13 in. by 10 in.; good, modern Devanāgarī writing; 25 lines in a page.

The same work; apparently transcribed from the preceding MS. [CALCUTTA.]

2818.

1976. Foll. 88; size 8¾ in. by 3½ in.; clear, modern Devanāgarī writing; ten lines in a page.

Pāṭīvyākhyāna, also called *Pāṭīgaṇita* or *Līlāvatyudāharaṇa,* a practical commentary on the *Līlāvatī,* consisting chiefly of a series of examples in illustration of its rules; by *Paṇḍita Vīreśvara.*

It begins: श्रीवरदमूर्तये नमः ॥ श्रीगुरुमूर्तये नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीढुंढिराजमीडे भूयः परिवारसंयुतं ब्रह्म ॥

पाटीपुटत्वं न विनाधिगंतुं
बीजं समर्थो विबुधो ऽपि कश्चित् ।
उदाहृतिं नास्ति विना तदस्मात्
संक्षेपतस्तां कथयामि तावत् ॥ १ ॥

विशिष्टविशिष्टाचारपरिप्राप्तं मंगलमाचरन् चिकीर्षितं प्रतिजानीते । प्रीतिमिति । अहं भास्कराचार्यनिर्दूषणगणितस्य पाटीं परिपाटीं व्यक्तगणितमिति यावत् । °

The MS. is incomplete: it breaks off abruptly in the *Kuṭṭakādhyāya;* the *sthira-kuṭṭaka* beginning on fol. 85*b*. The author quotes a *Pāṭīratna* (fol. 6*a*, 48*a*), besides the *Gaṇitakaumudī, Lakshmīdāsa-miśra,* and *Śrīdharācārya.* [Dr. John Taylor.]

2819.

871b. Foll. 36; size 10 in. by 4½ in.; good, small Bengalī handwriting of 1790 A.D.; 10–12 lines in a page.

Bījagaṇita, being the second, or algebraic, section of *Bhāskarācārya's Siddhāntaśiromaṇi,* acknowledged by the author to be founded on the works of *Brahmagupta, Śrīdhara,* and *Padmanābha* on the same subject.

Editions of the text were published at Calcutta in 1834 and 1853; and an English translation, by H. T. Colebrooke, in his "Algebra with Arithmetic and Mensuration," London, 1817.

The MS. was copied, by order of Colebrooke Sāhib, by *mahopādhyāya Citrapatiśarman.* [H. T. Colebrooke.]

2820.

871c. Foll. 25; size 10¼ in. by 4 in.; legibly written, in Devanāgarī, about 1730 A.D.; 14–16 lines in a page.

Another copy of *Bhāskarācārya's Bījagaṇita,* imperfect at the end.

The last leaf, numbered 26, and dated Benares (*vāṇāraśī*) Saṃvat 1841, Śaka 1706, is in a different hand from the rest, and follows upon fol. 24, leaving a gap of one leaf in the text. Fol. 19 has likewise been supplied by a more modern hand.

This MS. is followed by two more leaves in Bengalī writing, containing fragments of some astronomical treatise.

[H. T. Colebrooke.]

2821.

611a. Foll. 51; size 10 in. by 4½ in.; good, clear Devanāgarī writing of 1704 A.D.; nine lines in a page.

Bhāskarācārya's Bījagaṇita.

Dated: संवत् १७६१ वरषे अगहनसूदिनवमी ९ सूक्रवासरे प्रयागमध्य अनुपसीद्यलेखक इदं पुस्तकं लीख्यते ॥

[H. T. Colebrooke.]

2822.

2293. Foll. 37; size 4to, 13 in. by 10 in.; fair Devanāgarī writing of 1813 A.D.; 23 lines in a page.

Another MS. of the *Bījagaṇita,* copied from the preceding MS. [Calcutta.]

2823.

1533a. Foll. 73; size, royal 8vo, 9 in. by 6¼ in.; good, modern Devanāgarī writing; 26-28 lines in a page.

Sūryaprakāśa Bījavyākhyā, a commentary on *Bhāskara's Bījagaṇita,* composed, in 1541 A.D.,

at the age of 31, by *Sūryadāsa*, son of *Jñānarāja*, and grandson of *Nāganātha*, of Pārthapura, near the confluence of the Godā (Godāvarī) and Maṅgalāgaṅgā (Vidarbhā, Colebr.).

It begins:

भाले प्रालेयरश्मिः सुनयनयुगलोन्मीलने सिद्धयो ऽष्टौ
कंठे श्रीकंठपीठे स्फुरति फणिफणासन्मणीनां*
[प्रकाशः ।
आस्ते ब्रह्मादिमौलिस्थलमधुपगणो यत्पदांभोजपीठ-
प्रांते ऽनंतप्रभावं गणपतिरिति यज्जातिरव्यादिहा-
[स्मान् ॥ १ ॥
[यावत्कालकनीलवर्णरुचिरं पीतं सितं लोहितं
वासो हासकराधरैरिव गुणं हारप्रवर्गं दधत् ।
सन्मूलं समशोधनैरधिगतव्यक्ताभिधं वा धिया
वेद्यं योगविशेषतः किमपि तत्कृणोति बीजं भजे ॥ २ ॥
[om. A.]
यत्पादांबुरुहप्रसादकणिकासंजातबोधादहं
पाटीकुट्टकबीजतंत्रगहनाकूपारपारंगमः(°गतः B.C.)।
छंदोऽलंकृतिकाव्यनाटकमहासंगीतशास्त्रार्थवित्
तं वंदे निजतातमुत्तमगुणं श्रीज्ञानराजं गुरुं ॥ ३ ॥
चक्रे चक्रविहंगयोरिव युतिं निघ्नन्विमोहक्षयं
विश्लेषे गणितार्थयोः कविमुखांभोजं समुल्लासयन् ।
शृंगारादिरसानुसक्तविबुधेंद्राणामसौ पूरयन्
शश्वद्विष्णुपदस्थिरो विजयते सद्बोधसूर्योदयः ॥ ४ ॥
स्फुरद्बीजांभोधौ विविधरचनागाधसलिले
तितीर्षूणां मा भूदयमतिमतीनां (भूदपगतम° B., C.)
विमुग्धानामित्यादृतसदयचेताः परिमिताम् [श्रमभरः ।
इमां व्याख्यानावं सपदि रचये सूर्यगणकः ॥ ५ ॥
बीजाक्षरार्थः प्रथमं दुरापः
का वासना तत्र विचारणीया ।
तथापि सूर्यो ऽहमुदारबुद्धिर्
बीजं सबीजं विशदीकरोमि ॥ ६ ॥

तत्र° भास्करः° निबध्नाति । उत्पादकमिति । °

It ends (as collated):

दैवज्ञज्ञानराजात्मजकविगणकाचार्यसूर्याभिधान-
प्रोक्ते सद्बीजभाष्ये सुजनबुधजनानंदसंदोहहेतौ ।
सम्यक् सूर्यप्रकाशे पटुवदुहृदयध्वांतविध्वंसदक्षे
तूर्णं संपूर्णमेतद्विविधमतिभरैर्भावितार्थ्यं हि बीजं ॥ १ ॥
यः षट्कर्मविचक्षणैकसुलभः सद्बीजवर्णाश्रयो
यत्र स्वर्णविशोधनादिविधिना व्यक्तं फलं दृश्यते ।
मूलं भावनया परं प्रकृतितो ऽप्यानंदहेतुर्नृणां
ध्यातॄणां† च गुरूक्तितो विजयते ह्यव्यक्तशास्त्रागमः॥२॥
गोदोदक्कटपूर्णतीर्थनिकटावासे तथा मंगला-
गंगासंगमतस्तु पश्चिमदिशि क्रोशांतरेण स्थिते ।
श्रीमत्पार्थपुरे बभूव परमाचारो द्विजन्माग्रणीर्
ज्योतिःशास्त्रविचारविस्तृतमतिः श्रीनागनाथाभिधः॥३॥
पुत्रस्तस्य कलाकलापकुशलः क्ष्मापालमालार्चितः
सौजन्यैकसुधाकरः क्षितितले सौभाग्यभाग्यास्पदं ।
कीर्तिर्यस्य दिगंतरेषु विबुधैर्व्याख्यात(° न)संख्यागमैर् ‡
विख्यातो ननु सत्कविर्विजयते श्रीज्ञानराजाभिधः॥४॥
सिद्धांतं सुंदराख्यं ग्रहगणितविधौ जातके चैकमेकं
साहित्ये गीतशास्त्रे परमिदमकरोद् यश्चतुर्ग्रंथरत्नं ।
तत्सूनुः सूर्यदासः सुजनविधिविदां प्रीतये बीजभाष्यं
चक्रे सूर्यप्रकाशं स्वमतिपरिचयादादितः सोपपत्तिं
[॥ ५ ॥
सुजनगणकवर्याः संनिरीक्ष्य प्रयांतु
प्रमुदमिह मदुक्तान्सद्विशेषानशेषान् ।
मुखविवरविकासैर्वा हि संतो ऽप्यसंतः
स्वहृदयगतमोहस्योज्झितं दर्शयंतु ॥ ६ ॥
षष्टिशक्रगणिते शके कृतं भाष्यमिंदुगुणवत्सरे निजे ।
पंचविंशति शतान्यनुष्टुभां ग्रंथसंमितिरिहास्ति केवलं॥७॥
व्याख्ये वासनयान्विते गणितयोर्लीलावतीबीजयोस्
तद्वच्छ्रीपतिपद्धतेश्च गणितं बीजं तथैकं व्यधात् ।
एकं ताजकमच्युता[न्य B., r. र्थ]मपरं काव्यद्वयं प्रौढधीः
सूर्यो बोधसुधाकराख्यमकरोदध्यात्मशास्त्रे ऽष्टमं§ ॥ ८ ॥
परोपकारार्थमुदाहृतेन मद्वाग्विलासेन रसोज्ज्वलेन ।
शब्दाभिधं ब्रह्म यतः प्रवृत्तं स प्रीयतां यादवराजसिंहः॥९॥

Cf. the same author's commentary on the *Līlāvatī* (no. 2809), where the verse enumerating the author's works occurs likewise. See also Colebrooke, Misc. Ess., ii., p. 451; Weber, Berl. Cat., no. 832.

[H. T. COLEBROOKE.]

* श्रीकंठमूनोर्द्युमणिफणि° B. (°मूनोद्वि°) C.

† शत्रूणां B.; C. om. this stanza.

‡ व्याख्या हि शास्त्रागमैर् B.; व्याख्यासांख्यागमैर् C.

§ सूर्यो बोधकराख्यकाव्यमकरोद्° B.; C. om. this verse and the next.

2824.

1891. Foll. 71; size $12\frac{1}{4}$ in. by 4 in.; clear Devanāgarī writing (European paper); 24 lines in a page.

Sūryadāsa's Sūryaprakāśa. [B.]

Though by no means faultless, this MS. is useful for checking the misreadings of the preceding MS. [Dr. J. Taylor.]

2825.

789. Foll. 134 (counted 133, nos. 62 and 73 being double, and 87 passed over); size $9\frac{3}{4}$ in. by 4 in.; fair, modern Devanāgarī writing; ten lines in a page.

Another copy of the *Sūryaprakāsa*, not very correct. [C.] [H. T. Colebrooke.]

2826.

2290. Foll. 74; size 4to, 13 in. by $9\frac{3}{4}$ in.; good, modern Devanāgarī writing; 24 lines in a page.

The same work; being a reproduction of the preceding MS., slightly corrected by the copyist. [Calcutta.]

2827.

1533b. Foll. 86+71; size royal 8vo, $9\frac{3}{4}$ in. by $6\frac{1}{4}$ in.; good, modern Devanāgarī writing; 22–24 lines in a page.

Bījavivṛiti-Kalpalatāvatāra, also called *Bīja-pallava,* a commentary on the metrical portions of *Bhāskara's Bījagaṇita,* by *Kṛishṇa Gaṇaka,* son of *Ballāla.* [A.]

The author was the disciple of *Vishṇu,* who, on his part, was the pupil of *Nṛisiṃha* (nephew of *Gaṇeśa,* son of *Keśava*). The date of the work is fixed approximately by Colebrooke at about the close of the 16th century, "by the notice of it and of the author in a work of his brother *Raṅganātha,* dated 1524 Śaka (A.D. 1602), as well as in one by his nephew *Munīśvara*" (Misc. Ess., 2nd ed., ii., p. 407). Cf. no. 2775.

It begins (as collated and slightly corrected):

शिवयोर्भजनातिगौरवाद्यत्
  सुतलीलाधृतकुंजरास्यरूपम् ।
अपहंतु ममांतरं तमस्तत्
  सततानंदमयं महो महीय: ॥ १ ॥

यदीयचरणांभोजस्मर्तु: सकलसिद्धय: ।
भवंति वशवर्तिन्य: सिद्धेशीं तामहं भजे ॥ २ ॥

मिहिरमिव(! MSS., ? i.e. मिहिरं or मिहरिव)
  [वराहमिहिरं वंदे संदेहभेदिनं जगताम् ।
ज्योतिश्चक्रविभावनहेतुं जगदेकचक्षुरक्षुद्रं ॥ ३ ॥

कविबुधजनमूर्धनि स्फुरंतं
  कविबुधसंततसेवनीयपार्श्वम् ।
गणितनिपुणतां प्रवर्तयंतं
  प्रणमत भास्करमीप्सितार्थसिद्ध्यै ॥ ४ ॥

कदापि नैव संभ्रम: स्थितश्च भौममंडले ।
अपूर्वमार्गमाश्रयन् जयत्यपूर्वभास्कर: ॥ ५ ॥

आसीदसीमगुणरत्ननिधानकुंभ:
  कुंभोद्भवाभरणदिग्ललनाललाम ।
आशैशवार्जितविशेषकलानुवर्ती
  श्रीकेशव: सुगणितागमचक्रवर्ती ॥ ६ ॥

तस्मादभूद्भुवनभूषणभूतमूर्ति:
  श्रीमानगण्यगुणगौरवगेयकीर्ति: ।
ज्योतिर्विदागमगुरुर्गुरुसंप्रदाय-
  प्रज्ञातशास्त्रहृदय: सदयो गणेश: ॥ ७ ॥

भ्रातु: सुतस्तस्य यथार्थनामा नृसिंह इत्यद्भुतरूपशोभ: ।
अवर्धयद्यो जगतामभीष्टं प्रह्लादमाश्चर्यकर: सुराणाम् ॥ ८ ॥

तच्छिष्यो विष्णुनामा स जयति जगतीजागरूकप्रतिष्ठ:*
  शिष्टानामग्रगण्य: सुभणितगणिताम्नायविद्याशरण्य: ।
यद्वक्त्रोन्मुक्तमुक्ताफलविमलवचोवीचिमालागलंतो
  द्वित्रा: सिद्धांतलेशा जगति विदधते ऽज्ञे ऽपि मार्वे-
    [ज्ञ्यगर्वम् † ॥ ९ ॥

---

* जगतीजागरूक: प्रदिष्ट: B. C.

† सर्वज्ञगर्वं B.; सर्वज्ञवर्गं D.

तस्मादधीत्य विधिवत् त्रिस्कंधं ज्योतिषं गुरोः ।
कृष्णो दैवविदां श्रेष्ठस्तनुते बीजपल्लवम् ॥ १० ॥

अव्यक्तत्वादिदं बीजमित्युक्तं शास्त्रकृद्भिः ।
तद्व्यक्तीकरणं शक्यं न विना गुर्वनुग्रहम् ॥ ११ ॥

अत्र शांडिल्यगोत्रमुनिवरवंशावतंसजडविडनगरनिवासिकुंभोद्भवभूषणादिग्भूषणसकलागमाचार्यवर्यश्रीमहेश्वरोपाध्यायतनयनिखिलविद्यावाचस्पतिगणितविद्याचतुराननधरणितरणिश्रीभास्कराचार्यः खगगणितरूपं सिद्धांतशिरोमणिं चिकीर्षुः° निबध्नाति । तत्रादवं°

The colophon of the first part runs as follows:

दैवज्ञवर्यगणसंततसेव्यपार्श्वे-
वल्लालसंज्ञगणकात्मजनिर्मिते ऽस्मिन् ।
बीजक्रियाविवृतिकल्पलतावतारे
जाता कृतिप्रकृतिरत्र तु चक्रवालं ॥

अत्र वर्गप्रकृतौ चक्रवालमपि वर्गप्रकृत्यंतर्गतमित्यर्थः ॥ इति श्रीसकलगणकसार्वभौमश्रीवल्लालदैवज्ञसुत- कृष्णदैवज्ञविरचिते बीजविवृतिकल्पलतावतारे निजभेदचक्रवालयुक्तवर्गप्रकृतिविवरणं ॥

The second part begins: अत्र अतो बीजं प्रवक्ष्यामीति बीजनिरूपणं°

It ends (as collated):

अभूत्पृथिव्यां प्रथितो गुणौघैर्
चिंतामणिर्दैवविदां वरिष्ठः ।
संपूजनानेहसि यस्य गौरी
स्मृता स्तुता प्रत्यहमाविरासीत् ॥ १ ॥

तत्सूनवः पंच बभूवुरेषां
ज्येष्ठो ऽभिरामः किल रामनामा ।
भविष्यदर्थज्ञतया हि यस्य
विदर्भराजो ऽपि निदेशकर्ता ॥ २ ॥

रामादभूतां सीतायां पुत्रौ कुशलवाविव ।
त्रिमल्लो गोपिराजश्च गुणैः सर्वैः समन्वितौ ॥ ३ ॥

त्रिमल्लसूनुर्जयति द्विजेंद्रो
वल्लालसंज्ञः शितिकंठभक्तः ।
यः संततं रुद्रजपादिसंगाद्
ब्राह्मं(ब्राह्मयं B. C.) महो मूर्तमिवावभाति ॥ ४ ॥

दैवज्ञवर्यगणसंततसेव्यपार्श्वे-
वल्लालसंज्ञगणकस्य सुतो ऽस्ति कृष्णः ।
रामानुजः स परमेश्वरतुष्टिहेतोर्
बीजक्रियाविवृतिकल्पलतामकार्षीत् ॥ ५ ॥

यद्भास्करेण निजधामगुणातिरेकात्
संपादितं सगुणवर्गघनं(°धनं C.; वर्गधनं B.) हि [बीजं ।
तत्कृष्णभूमिमधिगम्य विचारवारि-
संसिक्तमंकुरजनुष्प्रभवत्समर्थं ॥ ६ ॥

यैर्यैः श्रमैर्विचरितो ऽस्ति नवांकुरो ऽसौ
तेषामभिज्ञ इह कः परमात्मनो ऽन्यः ।
इत्थं विचिंत्य जगदीश तवैव तुष्ट्यै
सर्वज्ञ ते चरणयोर्निहितस्ततो ऽयं ॥ ७ ॥

In Aufrecht's Cat. Cat. a *Bījavivṛitikalpalatā*, by *Paramasukha*, is mentioned from the Cat. of N.W. Pr. MSS. But this is possibly based on a wrong reading in the above 5th final *śloka*.

[H. T. COLEBROOKE.]

2828.

1946. Foll. 162; size 10 in. by 4 in.; legibly written, in Devanāgarī, in 1654 A.D.; 9–13 lines in a page.

Kalpalatāvatāra. [B.] A good, though by no means faultless, copy.

Dated: शके १५७६ जयसंवत्सरे वैशाखशुक्ल १ शुक्रे समाप्ता लिखितं ॥

[DR. JOHN TAYLOR.]

2829.

1974. Foll. 196 (counted 195, no. 138 being double); size 8½ in. by 6 in.; good, modern Devanāgarī writing; foll. 1–49, 15–18; foll. 50–196 (by a different hand), 12 or 13 lines in a page.

The same work. [C.]

On fol. 1*a* it is by mistake called *Vījāvataṃsa*, under which title it has figured in the old list. [DR. JOHN TAYLOR.]

2830.

611b. Foll. 122; size 10 in. by 4½ in.; good, clear Devanāgarī writing; nine lines in a page.

Another copy of *Kṛishṇa's Kalpalatāvatāra*, incomplete at the end; the last two chapters being wanting. [D.]

A few lines have been added by a modern hand, including the colophon.

The MS. was copied by the same hand as the text of the *Bījagaṇita* (dated 1704 A.D.), which precedes it. [H. T. COLEBROOKE.]

2831.

2291. Foll. 84; size 4to, 13 in by 10 in.; fair Devanāgarī writing of 1813 A.D.; 23 lines in a page.

The same work, copied from the preceding MS. [CALCUTTA.]

2832.

1945. Foll. 196; size 9½ in. by 5 in.; good, modern Devanāgarī writing; generally twelve lines in a page.

Bījaprabodha, a commentary on *Bhāskara's Bījagaṇita* (the text of which is given in full), by *Rāmakṛishṇa*, son of *Lakshmaṇa*, and grandson of *Nṛisiṃha*, of Amarāvatī.

The commentary begins:

सर्वज्ञं भास्करं नौमि सोमनाथं च सद्गुरुं ।
मुनीश्वरं महाप्रौढं प्रौढतत्त्वार्थसागरं ॥ १ ॥

ज्योतिर्विद्रामकृष्णः स च भुवि विदुषां शीतलत्वं प्रपन्नो
भ्रांत्वा पुण्यौघदेशान् गुरुपदभजनात्प्राप्तबोधो बुधो ऽहं ।
प्रौढश्रीभास्करीयं लघुतरगणितं बीजसंज्ञानिपणं
तस्योपायं च कुर्वे दिनकरसुमुदे ऽसौ दयालस्य(?) भूयात्
[॥ २ ॥

अथ शांडिलगोत्रोत्पन्नजडबिडनगरनिवासी सकलागमाचार्यवर्यमहेश्वरोपाध्यायतनयो निखिलतत्त्वार्थविच्छ्रीमद्भास्कराचार्यो ग्रहगणितस्वरूपसिद्धांतशिरोमणिं चिकीर्षुस्तदुपयोगितया तदध्यायात्मकं पाटीगणितमुक्त्वा तथाभूतमव्यक्तगणितं प्रारभमाणः प्रत्यूहव्यूहनिरासाय शिष्टाचारपरिपालनाय च मंगलमाचरन् शिष्यशिक्षार्थं बध्नाति । उत्पादकमिति । ०

It ends:

नृसिंहपदसेवनात्सकलसिद्धिपारंगतो
नृसिंह इति नामतो नृपजनैरभूद्बंहितः(? वंदितः or
तदात्मज उदारधीर्विबुधलक्ष्मणस्तत्सुतो [बृंहितः) ।
विधाय गुरुदेवतां स्वहृदि रामकृष्णाभिधः ॥ १ ॥

श्रीप्राणनाथयदुरामकुबेरमुख्यैः
संप्रेरितः सुजनतंत्रविदां [सु]खार्थं ।
बीजप्रबोधमकरोदमरावतीस्थो
देवाधिदेवचरणे स समर्पितो ऽस्तु ॥ २ ॥

ये रामकृष्णभजने विहितादरा ये
ऽहंकारदोषरहिताः परिशुद्धचित्ताः ।
बीजप्रबोधपरिचिंतनवर्तमानास्
तेषां सदैव सुखसंपदुपैति वृद्धिः ॥ ३ ॥

इति श्रीअमरावतिस्थश्रीमन्नृसिंहदैवज्ञात्मजलक्ष्मणदैवज्ञसुतसिद्धांतविद्दैवज्ञरामकृष्णविरचिते बीजप्रबोधे ग्रंथालंकारः समाप्तः॥

[H. T. COLEBROOKE.]

2833.

1356. Foll. 140 (counted 139, fol. 23 being double); size 10 in. by 5 in.; good, clear, modern Devanāgarī writing; eleven lines in a page.

Bījodāharaṇa-Bālabodhinī, a commentary on the *Bījagaṇita*, composed (in Śaka 1714, A.D. 1792) by *Kṛipārāma Miśra*, of Ahmadābād in Gujarāt, son of *Miśra Lakshmīnārāyaṇa*, and pupil of *Lakshmīnātha*.

It begins:

महेशानं गौरीगणपतियुतं शुद्धमनसा
प्रणम्य ज्ञानाम्भोनिधिमथ गुरुं कायवचसा ।
कृपारामो मिश्रः प्रकुरुत ऋजुं बीजगणिते
ऽवबोधध्वांतौघप्रहरणपरोदाहृतिमिमां ॥ १ ॥

उत्पादकमिति ०

It ends:

देशे गुर्जरनाम्नि धाम्नि यशसः स्थाने ऽमदावादके
भारद्वाजकुलप्रसूतिरभवन्मोटद्विजौघाग्रणीः ।
विद्यावेदकलामलाचलगतिः स्फूर्जन्मतिर्जोपिता(!)
मिश्रः श्रीमदनन्दवन्दितपदद्वन्द्वश्चतुर्वेदिकः ॥ १ ॥
लक्ष्मीनारायण इति मतिख्यातकीर्तिर्धरित्र्यां
तस्यात्मासीद्गगनगतिज्ञानगीर्वाण एव ।
सूनुस्तस्याध्ययनविधिनोपात्तसिद्धांतविद्यो
लक्ष्मीनाथान्निजगुरुवराच्छ्रीकृपारामनामा ॥ २ ॥
भुवनात्यष्टिमे शाके सुनभःपूर्णिमागुरौ ।
वीजस्योदाहृतिमिमामकरोद्बालबोधिनीम् ॥ ३ ॥

इति श्रीगुर्जरब्राह्मणमोटचातुर्वेदीमिश्रलक्ष्मीनारायणात्मज-मिश्रकृपारामदैवज्ञविरचिते वीजोदाहरणे बालबोधिन्याख्यं ग्रंथं समाप्तम् ॥ [H. T. Colebrooke.]

2834.

1046. Foll. 96 (foll. 1, 2 and 56 of which are wanting); size 8 in. by $4\frac{1}{4}$ in.; fair Devanāgarī writing of 1688 A.D.; 9 or 10 lines in a page.

Gaṇitādhyāya and *Golādhyāya,* being the last two chapters, the 4th and 5th, of *Bhāskarācārya's Siddhāntaśiromaṇi,* containing the astronomical portion of the work.

Editions of these sections (with the *Vāsanābhāshya*) have been published, by L. Wilkinson, Calc., 1842, and by *Paṇḍit Bāpū Deva Śāstrī,* Benares, 1866. An English translation of the *Golādhyāya,* by Wilkinson, revised by *Bāpū Deva Śāstrī,* Bibl. Ind., 1861.

This MS. agrees, on the whole, with the Benares text, except that the two chapters before the last, as well as part of the last chapter itself, are omitted; and the author's genealogy is taken out of the *praśnādhyāya,* and placed at the end of the work, with the date of its composition as given by Colebrooke, Misc. Ess., ii., 349–419. The MS., which is not very correct, was copied by one *ṛishi Narasiṅgha.* [H. T. Colebrooke.]

2835.

312a. Foll. 64; size $13\frac{1}{2}$ in. by $4\frac{1}{2}$ in.; modern Bengalī handwriting; seven lines in a page.

Gaṇitādhyāya and *Golādhyāya.*

The variations from the printed text are more considerable in this than in the previous MS., the last 7 chapters (after fol. 52*b*) being contracted into 3, and the sections differently arranged. Fol. 46 has been by mistake inserted between 34 and 35.

[H. T. Colebrooke.]

2836.

2267. Foll. 54; size 4to, 13 in. by $9\frac{3}{4}$ in.; good, modern Devanāgarī writing; 24 lines in a page.

The same two chapters of the *Siddhāntaśiromaṇi.*

This MS., being one of the set of modern copies referred to under no. 2770, was probably transcribed from another Devanāgarī MS., avoiding as it does those mistakes peculiar to transcripts from a Bengalī original.

[Calcutta.]

2837.

871a. Foll. 27; size 11 in. by $4\frac{1}{2}$ in.; modern Bengalī handwriting; 9–11 lines in a page.

Gaṇitādhyāya. [H. T. Colebrooke.]

2838.

159. Foll. 124 + 85 + 33; size $12\frac{1}{4}$ in. by $6\frac{1}{4}$ in.; fair, large Devanāgarī writing of the Kaśmīr type of about 1750 A.D., with coloured borders; twelve lines in a page.

Gaṇitādhyāya and *Golādhyāya* of *Bhāskara's Siddhāntaśiromaṇi,* with the author's own commentary, *Vāsanābhāshya,* also known by the special title of *Mitāksharā.*

The *Gaṇitādhyāya* here consists of two sections, numbered separately, the first of which has been accidentally placed at the end of the volume. The MS. agrees, on the whole, with the Benares edition.

[H. T. COLEBROOKE.]

2839.

2268. Foll. 23 + 81 + 56 (two of these, 26 and 27, being double); size 4to, 13 in. by 9¾ in.; good, modern Devanāgarī writing; 23 lines in a page.

Gaṇitādhyāya and *Golādhyāya*, with the *Vāsanābhāshya.*

This MS. seems to be a reproduction of the preceding volume; the sections being, however, bound in the proper order.

[CALCUTTA.]

2840.

1319. Foll. 67 + 136; size 12¼ in. by 4¼ in.; fair Devanāgarī writing of 1799 and 1805 A.D.; nine lines in a page.

Golādhyāya and *Gaṇitādhyāya,* with the *Vāsanābhāshya* or *Mitāksharā.*

In the pagination of the second part, nos. 17 and 46 have been passed over, whilst foll. 10 and 118 are double.

[H. T. COLEBROOKE.]

2841.

2285. Foll. 60 + 100; size 4to, 13 in. by 9¾ in.; good Devanāgarī writing of 1799 and 1817 A.D.; 23 lines in a page.

Golādhyāya and *Gaṇitādhyāya,* with the author's commentary; apparently a reproduction of the preceding volume, or copied from the same original; with corrections by a different hand. [CALCUTTA.]

2842, 2843.

340a, b. Foll. 130 + 75; size 11½ in. by 8¾ in.; fairly good Devanāgarī writing of 1790 A.D.; 19 lines in a page.

Gaṇitādhyāya and *Golādhyāya,* with the *Vāsanābhāshya.*

In the first part a gap occurs, foll. 102, 103 and 104*a* having been left blank, corresponding exactly to as many pages in the Benares edition. [H. T. COLEBROOKE.]

2844.

2012. Foll. 231; size 9¼ in. by 5 in.; modern Devanāgarī writing; nine lines in a page.

Gaṇitādhyāya, with the *Vāsanābhāshya.* An indifferent copy, a good deal worm-eaten.

[DR. JOHN TAYLOR.]

2845.

2287. Foll. 118; size 4to, 13 in. by 9½ in.; good Devanāgarī writing of 1790 A.D.; 19 lines in a page.

Gaṇitādhyāya, with the *Vāsanābhāshya.*

[CALCUTTA.]

2846.

1529. Foll. 60; size 10¼ in. by 6½ in.; good, modern Devanāgarī writing of the Kaśmīr type; enclosed in gold and coloured borders; eight lines in a page.

The first portion of the *Gaṇitādhyāya,* with the author's commentary; corresponding to the section at the end of MS. 159, and to pp. 1–55 of the Benares edition.

[H. T. COLEBROOKE.]

2847.

1855. Foll. 98; size 10½ in. by 4 in.; fair Devanāgarī writing of 1660 A.D.; 8–10 lines in a page.

Golādhyāya, with the author's *Vāsanābhāshya*, or *Mitāksharā*.

Dated: शाके १५८२ शार्वरीवत्सरे। अधिकज्येष्ठशुक्ल ८ चंद्रे॥

[Dr. John Taylor.]

2848.

1221. Foll. 86; size 10¾ in. by 4¼ in.; fair Devanāgarī writing of 1800 A.D.; nine lines in a page.

Golādhyāya, with *Vāsanābhāshya*.

[H. T. Colebrooke.]

2849.

2286. Foll. 59; size 4to, 13 in. by 10 in.; good, modern Devanāgarī writing; 23 lines in a page.

Golādhyāya, with *Vāsanābhāshya*.

[Calcutta.]

2850.

2288. Foll. 75; size 4to, 13 in. by 9¾ in.; good Devanāgarī writing of 1790 A.D.; 19 lines in a page.

Golādhyāya, with *Vāsanābhāshya*.

[Calcutta.]

2851.

1326. Foll. 208 + 65; size 4to, 11¾ in. by 9¼ in.; fair, modern Devanāgarī writing; 19–23 lines in a page.

Gaṇitatattvacintāmaṇi, a commentary on the *Gaṇitādhyāya* and *Golādhyāya* of *Bhāskarācārya's Siddhāntaśiromaṇi*, composed in 1501 A.D., by *Lakshmīdāsa*, son of *Vācaspati Miśra*, and grandson of *Keśava*, of the *Upamanyugotra*. [A.]

It begins:

यः पद्मोद्भवदेवदानवपितृक्षोणीतलस्य(स्य B.) क्षपा-
ह:संध्यादिविभागबोधितजगत्प्राग्भारमध्यान्तकृत्।
गाढध्वान्ततिरोहिताखिलपदार्थानात्मभाभिर्जनो-
द्वेगोत्थव्यथयेव भासयति तं वन्दे ग्रहाणां पतिं॥ १॥

Cf. Aufrecht, Cat. Trin. Coll. Camb., p. 51–4, where also a list of the authorities quoted is given; Weber, Berlin Cat., no. 843.

Numerous marginal notes, in Colebrooke's hand, bear evidence to his careful study of the work, and the help it afforded him in acquiring his knowledge of early Indian astronomy.

Appended to the MS. are 18 leaves containing an excellent index to the work.

The original MS. from which this was transcribed was executed, at Argalāpura, in Saṃvat 1656 (A.D. 1599), in the reign of *Pādishāh Akbar*. [H. T. Colebrooke.]

2852.

2269. Foll. 262 (numbered 272; nos. 201–210 having been passed over); size 4to, 13 in. by 9 in.; good Devanāgarī writing of 1812 A.D.; 23 lines in a page.

The same work.

A reproduction of the preceding volume; foll. 1–183 containing the *Gaṇitādhyāya*, the remaining leaves the *Golādhyāya*.

The index has likewise been copied on 16 leaves, with the reference numbers daubed over, as it was discovered that they could not be applied to the present MS. [Calcutta.]

2853.

2093. Foll. 253 (numbered 255; nos. 139 and 199 having been passed over); size 9½ in. by 5½ in.; good Devanāgarī writing of 1762 A.D.; 10–12 lines in a page.

Lakshmīdāsa's Gaṇitatattvacintāmaṇi on the *Gaṇitādhyāya* of the *Siddhāntaśiromaṇi*. [B.]

The text presented by this copy is more correct than that of MS. 1326.

Dated: संवत् १८१९ वर्षे मितिमार्गशीरसुदी ७ गुरुवासरे लिषितं रोडूराम ओडपुरामध्ये॥ नंदग्राम॥ [Gaikawar.]

2854, 2855.

594, 134. Foll. 1–153 and 154-306; size $9\frac{3}{4}$ in. by 5 in.; clear Devanāgarī writing of 1778 A.D.; eleven lines in a page.

Gaṇitatattvacintāmaṇi on the *Gaṇitādhyāya* of the *Siddhāntaśiromaṇi.*

Although not very correct, it is none the less useful for checking the mistakes of the other two MSS. Dated:

वर्षे पंचाग्निवस्विंदुमितहरिदिने कार्त्तिके कृष्णपक्षे
वारे सूर्यस्य सांघ्रिर्जैयहरिनगरे गोमतीतीरवासी ।
ज्ञातौ श्रीपार्वतीयः शुकतनयवरः शंकरो भास्करीय-
टीकां तत्त्वाख्यचिंतामणिमयमलिखत्स्वार्थपुत्रार्थसिद्ध्यै ॥

[H. T. Colebrooke.]

2856.

1389a. Foll. 19; size 14 in. by 5 in.; modern Bengalī handwriting; seven lines in a page.

A fragment of the *Golādhyāya,* with *Lakshmīdāsa's Gaṇitatattvacintāmaṇi,* consisting of the 2nd chapter, or *bhuvanakośa.*

[H. T. Colebrooke.]

2857, 2858.

1648, 1706. Foll. 133 and 85 (or rather 86, fol. 43 being double); size $9\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; fairly good Devanāgarī writing of 1751 A.D.; 10 and 11 lines in a page.

Siddhāntaśiromaṇi-Vāsanāvārttika, a commentary on the *Gaṇitādhyāya* and *Golādhyāya* of *Bhāskarācārya's Siddhāntaśiromaṇi-Vāsanābhāshya;* by *Nṛisiṃha,* son of *Kṛishṇa,* and grandson of *Divākara,* who was the pupil of the son of *Keśava* (? i.e. *Gaṇeśa*) of Koṅkaṇa (the Concan). [A.]

The author's ancestry is traced still further up to *Bhaṭṭācārya, Divākara's* father, who was the son of *Rāma,* a *Mahārāshṭriya* Brāhman residing at Golagrāma on the Godāvarī.

The work was composed in Śaka 1543 (1621 A.D.), when the author had attained the age of 35.

Part I. begins (as collated with MS. 1939):

यस्मात्सर्वमिदं जगत्समुदितं स्वोत्सृष्टभूतैः पुरं(? पुरः)
कृत्वा तत्र निविश्य मानसगुणान्स्वस्मिन्वृथा मन्यते ।
स्वाज्ञानादिव बद्धमुक्त इति यं वेदो निबंधावधिं
[(निषेधा° B.)
ब्रह्मेत्याह न वेद कश्चिदपि यं प्रेमास्पदं तं भजे ॥ १ ॥
गंगाधरायामितविक्रमाय त्र्यक्षाय शर्वाय दिगंबराय ।
त्रिशूलहस्ताय नमः शिवाय सुरेंद्रवंद्याय जटाधराय॥२॥
नमामि लक्ष्मीपतिमिंद्रवंद्यमुपेंद्रमिंद्रावरजं चतुर्भुजं ।
गदारथांगाब्जसुशंखहस्तं सुपर्णपृष्ठोपरिगं वरप्रदं ॥ ३ ॥
यां मूलप्रकृतिं जगाद कपिलो वेदांतिनो यां महा-
मायामित्यपरे हरस्य गृहिणीं त्रैलोक्यरक्षाकरीं ।
भक्तापद्विनिवारिणीं सुरगणैर्वंद्यामनिंद्यां जगद्-
वंद्यां तां प्रणमामि विश्वजननीं वेदैर्विमृग्यां परां ॥४॥
यद्भावः खगभादिके जलमये संमूर्छिता भास्करा
ध्वांतं तत्क्षपयंति नैशमनिशं यः सर्वदा भासते ।
कालात्मा खलु कालकृत् समयदिग्देशस्य यो व्यंजकस्
तस्मै चंद्रतनोः क्षयोपचययोः कर्त्रे सवित्रे नमः ॥ ५ ॥
लंबोदरं विघ्नविनाशनाय गजाननं नौमि परावरेशं ।
यः कर्मकाले स्मरणेन सद्यः कार्यस्य सिद्धिं विदधाति
[पुंसां ॥ ६ ॥
यस्याः प्रसादमासाद्य जडो याति बुधार्यतां ।
ब्राह्मी जयति सा वाणी वीणापुस्तकधारिणी ॥ ७ ॥
निजतातस्य कृष्णस्य कृत्वा पादांबुजं हृदि ।
शास्त्रं पितृव्यतोऽधीत्य वक्ष्ये पूर्वां सुवासनां ॥ ८ ॥
सिद्धांतवासनाभाष्यममितार्थं मिताक्षरं ।
व्याख्यायते नृसिंहेन गणकानंदहेतवे ॥ ९ ॥
विधाय सूर्यसिद्धांतवासनाभाष्यमुत्तमं ।
वासनावार्त्तिकं कर्तुमुद्यतोऽस्मि शिरोमणेः ॥ १० ॥

अथ शांडिल्यमुनिवरगोत्रावतंसः° श्रीभास्कराचार्यः° सिद्धांतशिरोमणिं प्रणिनाय ॥ °

This part ends thus:

श्रीमत्कौंकणवासिकेशवसुतप्राप्तावबोधाद्बुधाद्
भट्टाचार्यसुताद्दिवाकर इति ख्याताज्जनिं प्राप्तवान् ।
यः कृष्णस्तनयेन तस्य रचिते सद्वासनावार्त्तिके
सत्सिद्धांतशिरोमणेरयमगात्पाताधिकारः स्फुटः ॥

इति नृसिंहकृतौ वासनावार्त्तिके ग्रहगणिताध्यायः ॥

Part II. begins:

विश्वेश्वरं नमस्कृत्य मल्लारिं च गजाननं ।
भास्करीयस्य गोलस्य वार्त्तिकं क्रियते ऽधुना ॥ १ ॥
कविन्नमार्गादुपरि स्फुरंतं समं व्रजंतं ⏑⏑न⏑भेन ।
अधः स्थितं(!) चाप्यवलं[व]मानमुच्चं गुरोर्भास्करमात-
[नोति ॥ २ ॥ °

It ends: इति श्रीसकलगणकचक्रचूडामणिकृष्णदैवज्ञसुत-नृसिंहगणकविरचिते सिद्धांतशिरोमणिवासनावार्त्तिके ज्योत्पत्तिः॥

बुद्धैर्विबुद्धे गणितप्रबंधविचारसारामृतमावहंती ।
सद्वासनासितमानसानां मदुक्तिरेषा मुदमादधातु ॥ १ ॥
गुणवेदशरेंदुसंमिते १५४३ शककाले नगरे पुरेशितुः ।
वसता वरणा⏑–⏑–⏑नृसिंहेन विनिर्मितं त्विदं ॥ २ ॥
जिते(? निजे) तत्त्वमिते वर्षे सौरभाष्यं मया कृतं ।
पंचत्रिंशन्मिते वर्षे वासनावार्तिकं कृतं ॥ ३ ॥
नवीनयुक्तिप्रतिपादनेन पूर्वोक्तमंत्रादपि सद्विशेषं ।
नरप्रणीताद्बृहरिप्रणीतं स्वीकार्यमार्यैः स्वधिया विचार्य
[॥ ४ ॥

गोदावरीसौम्यतटोपकंठ-
ग्रामे च गोलेऽभिधया(? गोलाभि°) प्रसिद्धे ।
विप्रो महाराष्ट्रसुगीतकीर्तिर्
बभूव रामो गणकार्यवंद्यः ॥ ५ ॥
अग्रणीस्त्रैत्तिरीयाणां भट्टाचार्यस्तु तत्सुतः ।
आसीन्मीमांसकश्रेष्ठः कुमारिल इवापरः ॥ ६ ॥
गोत्रे भरद्वाजमुनेः पवित्रे
दिवाकरस्तत्तनयो बभूव ।
वेदांतशास्त्राभ्यसनेन काश्यां
यः पुण्यराश्यां तनुमुत्ससर्ज ॥ ७ ॥
सांवत्सरार्यस्य दिवाकरस्य
श्रीकृष्णदैवज्ञ इति प्रसिद्धः ।
बभूव पुत्रः सुतरां पवित्रः
सत्तीर्थिकर्ताखिलशास्त्रवेत्ता ॥ ८ ॥
तज्जस्तु तस्यैव कृपालवेन
तातानुजावाप्तसमस्तविद्यः ।
सद्वासनावार्त्तिकनामधेयं
ग्रंथं नृसिंहो रचयां बभूव ॥ ९ ॥
न या वराहेण च जिष्णुजेन
पृथूदकेनार्यभटेन जुष्टाः ।
असंस्तुता भास्करदर्शनेन
ता वासनावार्त्तिक एव लभ्याः ॥ १० ॥
सदुक्तिसद्युक्तिजलांजलीभिः
संदेहसंदेहवधं विधाय ।
बुध[ाः प्रभां] भास्करदर्शनोत्थाम्
आस्वादयंतो ऽभिमतानि कुर्युः ॥ ११ ॥

इति श्रीगणचक्रचूडामणिनृसिंहकृते सिद्धांतशिरोमणिवासनावार्त्तिके ग्रंथसमाप्त्यलंकारः ॥

Of less known works quoted by the author may be mentioned a *Śaivāgamasārasaṃgraha*, and a *Saṃgrahakārikā*, i., fol. 9*a*. See also the list of authorities quoted in the author's commentary on the *Sūryasidhānta*, Aufrecht, Cat. Trin. Coll. Camb., p. 43.

[H. T. Colebrooke.]

2859, 2860.

2289, 2283. Foll. 87 and 58 resp.; size 4to, 13 in. by 10 in.; good, modern Devanāgarī writing; 24 and 23 lines in a page.

Vāsanāvārttika on the *Gaṇitādhyāya* and *Golādhyāya*. A reproduction of the preceding two volumes. [Calcutta.]

2861.

1939. Foll. 130 (of which 39–42, 45–50 are wanting); size 10½ in. by 4 in.; legibly written, in Devanāgarī, about 1700 A.D.; 9–11 lines in a page.

Gaṇitādhyāya of *Nṛisiṃha's Vāsanāvārttika*. [B.]

At the end the following definition of *sūtra*, *bhāshya* and *vārttika* has been added:

भाष्यलक्षणं ॥
सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।
स्वपदानि च वर्ण्यंते भाष्यं भाष्यविदो विदुः ॥
सूत्रलक्षणं ॥
अल्पाक्षरमसंदिग्धं सारवत्सर्वतोमुखं ।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥
उक्तानुक्तदुरुक्तचिंतावार्त्तिकमिति वार्त्तिकलक्षणं ॥

[Dr. John Taylor.]

2862–2868.

188, 207b, 182, 1231a, b, 190, 585. Foll. 834; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; fairly good Devanāgarī writing of the end of last century; 9–13 lines in a page.

Marīci, a copious and excellent commentary on the *Gaṇitādhyāya* and *Golādhyāya* of *Bhāskara's Siddhāntaśiromaṇi,* by *Munīśvara,* surnamed *Viśvarūpa,* son of *Raṅganātha* (who was one of five sons, the 4th, of *Ballāla*), and pupil of his uncle *Kṛishṇa.* Cf. nos. 2775, 2827.

At the end of his *Gūḍhaprakāśa* (Hall, *Sūryasiddhānta,* p. 388), *Raṅganātha* states that Wednesday, *śambhutithi,* of the light fortnight of *Caitra* of the year Śaka 1524 or 1525 (A.D. 1602-3) witnessed both the completion of his work, and the birth of his son *Munīśvara.*

I. *Gaṇitādhyāya* begins (somewhat amended):

प्रातर्बोधितपद्मपत्रविकसन्नेत्रो नवीनो(ना)बुद-
श्यामः पीतदुकूलशोभिततनुः श्रीवत्समुद्रान्वितः ।
वंशीवादनतत्परो रविसुतातीरोपगो नैचकी-
गोपीभिः परिवेष्टितो मम मनस्यास्तां रमावल्लभः ॥ १ ॥

यः पूरयत्यनुदिनं प्रणतस्य कामान्
स्वांतस्थितान् स[क]लविघ्नचयं निरस्य ।
सिंदूरपूरपरिपूरितकुंभयुग्मो
भूयान्मुदे गणपतिर्गजराजवक्त्रः ॥ २ ॥

या भारती सर्वबुधावलीना
मुखान्तरंगे नटनं करोति ।
सा मे मुखे वास्तुविधिं करोतु
वस्तुं सदालंकृतिभूषितांगी ॥ ३ ॥

यो बोधयत्यनुदिनं विबुधारविंदं
तत्पूर्वपक्षरजनीतिमिरं निरस्य ।
ज्योतिर्विभावनविधेस्तु निदानभूतं
श्रीमद्वराहमिहिरं मिहिरं च वंदे ॥ ४ ॥

येनाधायि कुतूहलादतितमां पाठे सुधांभोनिधेः
प्रौढाहंकृतिवादिवारणगणन्यक्कारढक्कारवः ।
ज्योतिःशास्त्रदुरंतकाननमहासंचारपंचाननं
तं चातुर्यकलापकुशलं श्रीभास्करं भावये ॥ ५ ॥

गौरीभक्तेर्भजनकलया नीतकालः पितृव्यः
श्रीमद्रामो निखिलविषये मन्नबुद्धिप्रकाशः ।
ज्योतिस्त[ा]कानलकवलने मूलभूतश्चकोरः(?)
कृष्णभ्राता जयति नितरां मद्गुरुर्वैर्यवर्यः ॥ ६ ॥

सिद्धांतांबुजबोधनैकमिहिरस्त्रिस्कंधपारंगमो
न्यायेनात्तमतिः कचित्वकरणे साक्षात्पुराणो मुनिः ।
आम्नायप्रतिपादितार्थदृढताविख्यातसारस्वतो
विष्णुः कृष्णगुरुर्जयत्यतितरां श्रीमद्गणेशात्मधीः ॥ ७ ॥

यः श्रीकृष्णपदांबुजाहितमतिः सिद्धांतपारां निधेः
पोतः श्रीजहगीरभूमितिलकस्याननविश्वासभूः ।
षट्शास्त्रेषु कृतश्रमो ऽखिलगुरुर्मान्यो वदान्यो विदां
श्रीकृष्णः किमु वर्णनीयविभवः श्रीकृष्ण एवापरः ॥ ८ ॥

श्रीरंगनाथाभिधतातपादाः
कृष्णानुजाः श्रीकमलाधिपास्ते ।
त्रिस्कंधपारंगमरंगमल्ला
बल्लालजा भूमितले जयंति ॥ ९ ॥

नारायणो गणितशास्त्रकलाप[विज्ञ]:
श्रीसेवितः सकलशास्त्रसरोजभृंगः ।
दैवज्ञकृष्णगुरुपादरतो गुरुर्मे
क्ष्मायां जयत्यखिलपंडितवंद्यपादः ॥ १० ॥

मुनीश्वरापराख्येन विश्वरूपेण शुध्यते
शुद्धिशाणे मरीच्यर्थं सत्सिद्धांतशिरोमणिः ॥ ११ ॥

अत्रोपपत्तिविषये तु मया यदुक्तं
तत्सर्वमेव परिभावितमस्ति मन्यैः ।
मान्यान्प्रणम्य विहितांजलिश्च याचे
सद्भिस्तथापि परिभाव्य शोधनीयं ॥ १२ ॥

ग्रंथारंभे° निबध्नाति । यत्र त्रातुमिदमिति । °

Vol. I. (MS. 188), foll. 127, corresponds to pp. 1–55 of *Bāpū Deva Śāstrī's* edition of the *Siddhāntaśiromaṇivāsanābhāshya;* and is dated Saṃvat 1849.

Vol. II. (MS. 207*b*), foll. 96 (from fol. 87 wrongly numbered 88–97), corresponds to pp. 56–94 of the edition.

Vol. III. (MS. 182), foll. 226 (numbered 228; nos. 95 and 175 being double, and 113, 163, 172, 173 passed over; and the first leaf wanting),

corresponds to pp. 95–186 of the edition. Between this and the following volume there is a gap extending over the *grahacchāyā-*, *grahodayāsta-*, and *śriṅgonnati-adhikāras* of *Bhāskara's* work.

Vol. IV. (MS. 1231*a*, *b*), foll. 44+75, contains resp. the end of the *Gaṇitādhyāya* and the beginning of the *Golādhyāya* as far as p. 277 of the edition.

Vol. V. (MS. 190), foll. 110, corresponds to pp. 277–315 of the edition.

Vol. VI. (MS. 585), foll. 156 (numbered 157; no. 63 being passed over), corresponds to pp. 315–379 of the edition. Besides the Śaka date '*khāṅgavāṇadharaṇī*' (i.e. 1560), which must have been that of a former MS., it gives its own date as Saṃvat 1842 (A.D. 1785).

II. *Golādhyāya* [A] begins (as collated with MS. 163):

नित्यानन्दज्ञानरूपं महो ऽहं
विश्वाज्ञानध्वान्तविध्वंसदक्षं ।
श्रीकृष्णाख्यं सर्वदाभीष्टसिद्ध्यै
ध्यायामीशं सर्वगं सर्वहेतुं ॥ १ ॥

अथोत्तरार्धं गुरुरामकृष्णपितृव्यपादाब्जयुगप्रसादात् ।
व्याख्यायते सद्गणकाभितुष्ट्यै प्रज्ञानुसारेण मुनीश्वरेण ॥२॥

अथ ग्रन्थादौ ० प्रतिजानीते । सिद्धिं साध्यामुपैति ० ॥

It ends:

द्विखण्डयोगान्मणिमेतमार्यो
न जातु हातुं धिषणां दधातु ।
यतो ऽस्य शुद्धा खलु विश्वरूप-
प्रकाशिनी चारुतरा मरीचिः ॥ १ ॥

गङ्गाभैशिलनगराज्ञोदावर्यनुगतादुपाया[सी]त् ।
एलचपुरसमदेशे तटे पयोष्ण्याः शुभे दधिग्रामे ॥ १ ॥

ज्योतिर्विद्याविद्भिः सकलैः शिरसा सदा बुधैर्धार्यः ।
विजयतु यजुःश्रुतिज्ञो गणकश्चिन्तामणिर्नाम्ना ॥ २ ॥

तस्मादभवद्रामः सकलैः सुगुणैर्नितान्तमभिरामः ।
विरमे[ते]ति (*Bh. P.,* XII. 7, 21) । वृत्तित्रयं जाग्रत्स्वप्नसुषुप्तिरूपं । आत्मानं परमात्मानं स्वयं वामदेवादेरिव मायामयत्नानुसंधानेन देवहूत्यादेरिवानुष्ठितेन योगेन वा ततश्च ईहायाः तदनुशीलनव्यतिरिक्तचेष्टायाः ॥ १२ । ७ ॥ श्रीसूतः(? *r.* श्रीसूतोद्दिष्ट°) ॥ उद्दिष्टसंबन्धः ॥ इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीश्रीकृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसंदर्भे तत्त्वसंदर्भो नाम प्रथमः संदर्भः ॥ अत्र श्लोकसंख्या ४७५ (577 Rāj. M.) ॥ समाप्तश्चायं ग्रन्थः ॥

[H. T. Colebrooke.]

3527.

462 b. Foll. 26; size 16¼ in. by 5¼ in.; fair, modern Bengalī handwriting (the same as in last MS.); nine lines in a page.

Paramātmasandarbha, the 3rd section of *Jīva Gosvāmin's Bhāgavatasandarbha,* treating of the divine spirit.

In the margin of the leaves the treatise is (apparently erroneously) called *Paramārthasandarbha* (cf. Cat. Catt., *s.v.*).

It begins:

तौ संतोषयता सन्तौ श्रीलरूपसनातनौ ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितं ।
पर्यालोच्याथ पर्यायं कृत्वा लिखति जीवकः ॥

अथ परमात्मा विव्रियते ॥ तत्र तं जीवनिरूपणपूर्वकं निरूपयति द्वाभ्यां । क्षेत्रज्ञ एता मनसो विभूतीर्जीवस्य मायारचितस्य नित्याः । ० (*Bh. P.*, v. 11, 12. 13).

The greater part of the treatise is wanting, the MS. ending abruptly (in the 71st paragraph) at the end of fol. 16*b*, in the middle of a word.

Cf. Rāj. Mitra, Notices, iv., p. 233 (foll. 67).

[H. T. Colebrooke.]

3528.

462 a. Foll. 106; the same size and handwriting as in preceding MS.

Krishṇasandarbha, the 4th section of the *Bhāgavatasandarbha,* treating of *Krishṇa* as the divine spirit.

It begins: तौ संतोषयता सन्तौ ० ॥ तस्याद्यं ग्रन्थनालेखं ० ॥

अथ पूर्वसंदर्भत्रयेण यस्य सर्वपरत्वं साधितं तस्य श्रीभगवतो निर्धारणाय संदर्भो ऽयमारभ्यते । तत्र प्रथमस्य द्वितीये वदन्तीत्यादिना तदेकमेव तत्त्वं ब्रह्मादितया शब्द्यत इत्युक्तं । तदेव ब्रह्मादित्रयं तस्य तृतीये विविच्यते । ०

The subject is treated in 190 paragraphs, ending thus:

गौरश्यामलस्यामलाभिरमणैरङ्गोर्विलासोत्सवैर्
नृत्यन्तीभिरशेषमादनकलावैदग्धदिग्धात्मभिः ।
अन्योन्यप्रियतासुधापरिमलस्तोमोन्मदान्तैः(०भिः R.M.) सदा
राधामाधवमाधुरीभिरभितश्चित्ते ममाक्राम्यतां(०त्तं ०क्र०) ॥

इति कलियुगपावन ० श्रीभागवतसंदर्भे श्रीकृष्णसंदर्भो नाम चतुर्थः संदर्भः समाप्तः ॥

Cf. Rāj. Mitra, Notices, iv., p. 234.

On the first and last pages of this volume the two treatises contained therein are, by Colebrooke's Paṇḍit, assigned to *Rūpa Gosvāmin.* Cf. Burnouf's préf., p. clxvi.

[H. T. Colebrooke.]

3529.

707. Foll. 141 (counted 140; no. 61 being double); size 16 in. by 4¾ in.; clear, modern Bengalī writing, by two different hands; nine lines in a page.

Bhaktisandarbha, the 5th section of the *Bhāgavatasandarbha,* here ascribed (in the colophon) to *Sanātana Gosvāmin;* treating, in 330 paragraphs, of faith.

It begins: तौ संतोषयता सन्तौ ० ॥ तस्याद्यं ग्रन्थनालेखं ० ॥

अत्र पूर्वसन्दर्भचतुष्टयेन संबन्धो व्याख्यातः । तत्र पूर्णसनातनपरमानन्दलक्षणं पञ्चत्वरूपसंबन्धि च ब्रह्म परमात्मा भगवानिति त्रिभिराविर्भावतया शब्दितमिति निरूपितं । तत्र च भगवत्त्वेनैवाविर्भावस्य परमोत्कर्षः प्रतिपादितः । ०

It ends: टीका च अन्तरङ्गां भक्तिमाह त्रिभिः । सर्वभूते चात्मनि चात्मानमीश्वरं स्थितं मामेव ईक्षतेत्यथा कथंभूतमीश्वरं बहिरन्तःपूर्णमित्यर्थः । तत्कुतः अपावृतं अनावरणं तदपि कुतः यथाखं असङ्गत्वाविभुत्वाच्चेत्यर्थः । अत्र मामेवेति श्रीकृष्णरूपमेवेक्षते न तु केवलान्तर्यामिरूपमित्यभिप्रायेणैवान्तरङ्गां भक्तिमाह इति व्याख्यातं । ततश्च ।

इति सर्वाणि भूतानि सद्भावेन महाद्युते ।
सभाजयन्मन्यमानो ज्ञानं केवलमाश्रितः ॥

ब्राह्मणे पुक्कसे स्तेने ब्रह्मण्यकें स्फुलिङ्गके ।
अक्रूरे क्रूरके चैव समदृक् पण्डितो गतः ॥

इति श्रीसनातनगोस्वामिविरचितः श्रीभक्तिसंदर्भः समाप्तः ॥

[H. T. Colebrooke.]

3530.

814. Foll. 212 (counted 211; no. 49 being double); size 15¾ in. by 5 in.; modern Bengalī handwriting; eight lines in a page.

Kramasandarbha, the 7th (and last) section of *Jīva's Bhāgavatasandarbha*, forming a running (and supplementing) commentary on the *Bhāgavatapurāṇa*. *Skandhas* I.–V.

It begins: श्रीराधाकृष्णाभ्यां नमः ॥ तौ संतोषयता सन्तौ ० ॥ तस्याद्य ग्रन्थनाले ० लिखति जीवकः ॥

पूर्वं यान्येव वाक्यानि धृतान्यर्थविशेषतः ।
तानि मूलक्रमेणापि धार्याणि क्रमलब्धये ॥
धार्याण्यर्थविशेषार्थमधृतान्यपि कानिचित् ।
तत्रेतिशब्दः कर्तव्यः क्वचिद्व्याख्या च केवला ॥
स्थानं च मुहुरङ्काभ्यां ज्ञेयं संदर्भवाक्ययोः ।
तत्राङ्कान्तत आ शब्दात्तदङ्कादिप्यतीप्यतां ॥
व्याशब्दात्तत्तव्याख्यागतं तद्वाक्यमीप्यतां (०मिष्यतां) ।
तथा पुनर्श्चेतिशब्दादन्यत्रापीति दृश्यतां ॥
यत्र व्याख्यागतं वाक्यव्याख्यानं तच्चिदाकृति ।
द्वौ तत्र प्रणवौ लेख्यौ तयोर्मध्यं तु गृह्यतां ॥
यः स्कन्धाध्याययोरङ्कः स तु तच्छेदकः स्फुटः ।
न तत्र प्रणवापेक्षापीति सर्वत्र वीक्ष्यतां ॥

अथ प्रथमस्कन्धस्य क्रमसंदर्भः ।

At the end of the first *skandha* (fol. 59) we read: इति कलियुगपावन० श्रीरूपसनातनानुशासनभारतीगर्भे सप्तसंदर्भात्मकश्रीभागवतसंदर्भे प्रथमस्कन्धस्य क्रमसंदर्भः समाप्तः ॥

The final colophon runs thus: इति पञ्चमक्रमसंदर्भे षड्विंशः ॥ श्रीभागवतक्रमसंदर्भे पञ्चमक्रमसंदर्भः समाप्तः ॥

For MSS. of the first six *skandhas* of this work see Rāj. Mitra, Notices, iv., pp. 231, 235, 243–45.

On the margin of the last page Colebrooke's Paṇḍit calls the work, in Devanāgarī: श्रीभागवतटी(!) श्रीरूपसनातनगोस्वामिकृता क्रमसंदर्भटीका प्रथमावधि पंचपर्यंत पत्र २११ श्लोक ६५०० ॥ Hence the mistake regarding the authorship of the work, repeated by Burnouf, préf., p. clxvi., from the old catalogue of the India House.

[H. T. Colebrooke.]

3531.

1174 a. Foll. 32; size 13¼ in. by 4¾ in.; good, small, modern Bengalī handwriting; seven lines in a page.

Śrutistutyarthavivaraṇa, a philosophical commentary, by *Rādhāmohana*, on the so-called *Vedastuti* (*Śrutistuti* or *Śrutyadhyāya*)—the 87th *adhyāya* of the 10th *skandha* of the *Bhāgavatapurāṇa*—composed with the view of establishing *Kṛishṇa* as the *Brahman* or divine spirit.

The original text is only vaguely alluded to as '*ayaṃ granthaḥ*' (fol. 8*a*, l. 1 *infr.*), and as being composed in *ślokas* (fol. 3*a*, l. 2).

It begins:

प्रणम्य राधिकाकान्तं श्रीराधामोहनद्विजः ।
पूर्वदृष्ट्या यथाज्ञानं व्याकरोति श्रुतिस्तुतिं ॥

ब्रह्मन्निति टीकायां अप्रमाण्ये कारणरहितानामिति शब्दस्याप्रामाण्ये कारणत्वं प्रमदादिरूपदोषजन्यत्वं वेदवक्तुरीश्वरस्य तादृशदोषरहितत्वेन तदजन्यत्वं वेदानामित्यर्थः तत्प्रश्ने विषयत्वं सप्तम्यर्थः शब्दवृत्तिः । अर्थविशेषबोधानुकूलपदपदार्थयोः संबन्धविशेषः । ०

It ends: कैवल्येन अपृच्यत स्वभावेन निरस्ता तिरस्कृता योनिर्माया येन तं । अत एवाभयं भयनिवर्तकं ॥ ५० ॥ इति श्रुतिस्तुत्यर्थविवरणं ॥

Then follow three lines more, beginning: मापाततोभजनमात्रप्रवृत्त्यर्थं यथाकथञ्चिज्जने ऽपि लोकानामनर्थनिवृत्तिः स्यादिति० and ending abruptly: केषाञ्चित् प्राक्तनपुण्यपुञ्जकृतपार्षदभावत्वात्—

The *Vaishṇavatoshaṇī* is frequently quoted in this treatise, which is probably only a part of a larger work on the whole of the 10th *skandha.*

On fol. 1*a* another hand calls the treatise '*śrutyadhyāyaṭīkā śrutistutināmnī.*'

For other commentaries on the same section of the *Purāṇa,* see Rāj. Mitra, Notices, ii., p. 349; vii., p. 222.

[H. T. Colebrooke.]

3532.

2540. Foll. 101 (of which fol. 42 is wanting, and fol. 57 supplied by another hand); size 11¼ in. by 4½ in.; fair Devanāgarī writing of about 1750 A.D.; nine lines in a page.

Nāmacandrikā, a commentary — by *Raghunātha,* son of *Viṭṭhala* and *Rukmiṇī,* and grandson of *Vallabha*(?) — on the *Kṛishṇasahasranāma,* or *Purushottamasahasranāma,* an enumeration of a thousand (or rather some 1050) epithets of *Kṛishṇa* in 256 *ślokas,* professing to be attached to the *Bhāgavatapurāṇa.*

The commentary begins:

व्रजस्त्रीविप्रयोगाग्निशमनाय य उत्थितः ।
दिनान्ते ऽद्भुतजीमूतस्तच्छायास्तु सदा मयि ॥ १ ॥

आचार्यचरणद्वंद्वं भक्तिज्ञानाब्जभास्करं ।
नमस्यामि मनःकर्मवाग्भिरंतस्तमोऽपहं ॥ २ ॥

यत्कृपादृष्टिवृष्टेन दैवदग्धो ऽपि तत्क्षणात् ।
प्ररोहति निजेच्छाभिस्तं वंदे कमपीश्वरं ॥ ३ ॥

इह तावत्प्रथमं सकलनिगमकल्पपादपफलरूपश्रीभागवतशास्त्रस्य स्वल्पाक्षरैः सर्वपरिज्ञानार्थं तत्प्रतिपाद्य लीलाविशिष्टश्रीकृष्णसहस्रनामानि विवक्षवो वस्तुनिर्देशरूपं मंगलमाचरन्त्याचार्याः ॥ पुराणपुरुष इति ॥ गीतायामन्यत्रापि पुराणो यः पुरुषः स एव पुरुषोत्तमपदवाच्यः सो ऽत्र श्रीकृष्ण एव । °

Several editions of the original text, under the titles *Purushottamasahasranāma* (*-stotra*) and *Śrīkṛishṇasahasranāma,* have appeared in India.

It ends: ॥ २५५ ॥ श्रीकृष्णेति । श्रीकृष्णभक्तान् पाहीत्यन्वयः ° श्रवणमात्रेणैव परमकल्याणरूप इत्यर्थः ॥ २५६ ॥

कृष्णनामसहस्राख्यमालेयं वाङ्मणीमयी ।
ग्रथिता श्रुतिसूत्रेण रचिता कृष्णपादयोः ॥ १ ॥

श्रीविठ्ठलतनूजेन रुक्मिणीगर्भसंभुवा ।
रघुनाथेन गाथेयं नामसु व्यरचि स्फुटा ॥ २ ॥

इति श्रीमद्वल्लभनन्दनचरणकमलपरागमात्रसनाथरघुनाथस्य कृतौ नामचन्द्रिका समाप्ता ॥

Besides quotations from *Purāṇas* and the epics, illustrative passages are constantly quoted (probably from the *Bhāgavatapurāṇa* itself) simply introduced by '*tad uktam.*' Sometimes we find '*tad uktam bhagavatā*' (foll. 5*b*, 10*a*, 15*b*, 16*b*) or '*bhagavān apy āha* (fol. 12*a*), where *Kṛishṇa* himself seems to speak. Otherwise only: अत एव आचार्यैरप्युक्तं fol. 11*a*; आचार्यैस्तथैवाम्नातं टीकायां fol. 66*b*.

[H. T. Colebrooke.]

3533.

1288. Foll. 48; size 13 in. by 5 in.; fair Devanāgarī writing of the latter part of last century; nine lines in a page.

Harilīlā, an *anukramaṇī* to the *Bhāgavatapurāṇa,* by *Vopadeva;* with a commentary, called *Harilīlāviveka,* by (*Hemādri,* revised by) *Madhusūdana Sarasvatī.*

The text begins:

श्रीमद्भागवतस्कंधाध्यायार्थादि निरूप्यते ।
विदुषा वोपदेवेन मंत्रिहेमाद्रितुष्टये ॥

The commentary begins:

नमः कृष्णाय नित्यैकसच्चिदानंदरूपिणे ।
जगत्सर्गविसर्गादिसाक्षिणे ऽचिंत्यशक्तये ॥

जयंति वोपदेवस्य वाचो विबुधसंस्तुताः ।
घनसारोज्ज्वलाभासाः क्षीरोदस्येव वीचयः ॥
श्रीमद्भागवतस्यानुक्रमणी तद्विनिर्मिता(हृ° Oxf.) ।
हरिलीलाभिधानेयं यथाबुद्धि विविच्यते ॥

The commentary ends:

हरिलीलाविवेको ऽयं कामराजस्य वेश्मनि ।
कटके रचयां चक्रे तुष्ट्यै हेमाद्रिणा सतां ॥

इति श्रीहरिलीलाविवेकः समाप्तिमगमत् ॥
सरस्वतीश्रीमधुसूदनेन निर्व्यूढमेतद्बुधमोदनेन ।
जनः समस्तो ऽपि रसायनेन व्रजेशभक्तिं व्रजतादनेन ।
शतमष्टौ च पंचाशत्कृत्स्नं ग्रंथविनिर्मितं ॥

For more particulars about this work, cf. Aufrecht, Cat. Bodl., no. 92. See also Burnouf, préf., p. ciii.

For the verse in which the authorship of the commentary is ascribed to *Hemādri*, see the final verse of the same author's *Kaivalyadīpikā* (no. 3542).

[H. T. Colebrooke.]

3534.

484. Foll. 36; size 12½ in. by 5¼ in.; Devanāgarī writing; twelve lines in a page.

Harilīlā, with the *Harilīlāviveka*. A carelessly written, modern MS.

[H. T. Colebrooke.]

3535.

2791b. Foll. 26; size 10 in. by 5½ in.; good Devanāgarī writing of 1595 A.D.; eleven lines in a page.

Bhagavadbhaktiratnāvalī, or simply *Bhaktiratnāvalī*, a compendium of the principal tenets of *Vaishṇava* belief, in the form of verses extracted from the *Bhāgavatapurāṇa*, by *Vishṇupurī*, a native of Tīrabhukti. [A.]

It begins: ये मुक्तावपि निःस्पृहाः प्रतिपदप्रोन्मीलदानंददां °

See Aufrecht, Cat. Bodl., no. 90; Florentine Sansk. MSS., no. 236; Rāj. Mitra, Notices, i., p. 240.

After the 12th chapter this MS. contains 16 verses (instead of 10 of the Oxf. MS.), counted (from the beginning of the work) 396–411, the last three of which, at all events, together with the colophon, evidently belong to the commentary:

साधूनां स्वत एव संमतिरिह स्यादेव भक्त्यर्थिनां°॥[४०]७॥
एष स्यामहमल्पबुद्धिविभवो ऽप्येको ऽपि वा स्यां भुवं
मध्ये भक्तजनस्य मत्कृतिरियं न स्यादवज्ञास्पदं ।
किं चिद्याः सरघाः[1] किमुज्ज्वलकुलाः किं पौरुषाः किं [गुणास्
तत्किं सुंदरमादरेण रसिकैर्नापीयते तन्मधु ॥ [४०]८ ॥
इत्येषा बहुयत्नतः कृतवता[2] श्रीभक्तिरत्नावली
तत्प्रीत्यैव तथैव संप्रकटिता तत्कांतिमाला मया[3] ।
अत्र श्रीधरतः समोक्तिलिखने[4] न्यूनाधिकं यत्त्वभूत्
तत्क्षंतु सुधियो ऽहैय स्वरचनालुब्धस्य मे चापलं॥[४०]९॥
महायज्ञशरप्राणशशांकगणिते शके ।
फाल्गुने कृष्णपक्षस्य द्वितीयायां सुमंगले ॥ [४]१० ॥
वाराणस्यां महेशस्य सान्निध्ये हरिमंदिरे ।
भक्तिरत्नावली सिद्धा सहिता कांतिमालया ॥ [४]११ ॥

इति श्रीमत्पुरुषोत्तमचरणारविंदकृपामकरंदबिंदुप्रोन्मीलितविवेकतैरभुक्तपरमहंसश्रीविष्णुपुरीग्रथितायां श्रीभागवतामृताब्धिलब्धश्रीमद्भक्तिरत्नावलीकांतिमाला(!) समाप्ता ॥

संवत् १६५२ वर्षे मधुमासे सिते पक्षे दशमीसोमवासरे लिखितमेतत् ॥ करकृतमपराधं क्षंतुमर्हंति संतः ॥ शंकरपुरकृतालयेन रामकृष्णेन लिखितेयं भगवद्भक्तिरत्नावली ॥ भट्टश्रीविठ्ठलदास आत्मपठनार्थं च परोपकाराय ॥ शिवमस्तु सर्वजगतः ॥

There is some difficulty in reconciling the date of the work (Śaka 1555 = A.D. 1633–4;

---

[1] शरघा मधुमक्षिका: comm. (see next MS.).

[2] खलु कृता B. [3] प्रिया B.

[4] श्रीधरमुक्तिलिखने(!) B; श्रीधरसत्तमोक्तिलिखने C.

cf. Florent. MS.) with the date (Saṃv. 1652 = A.D. 1595) of the present MS., which, as far as appearance goes, one could hardly take to be more modern. [COLL. OF FORT WILLIAM.]

3536.

2592. Foll. 92; size 11¾ in. by 5 in.; fair Devanāgarī writing of 1732 A.D.; nine lines in a page.

Vishṇupurī Tairabhukta's Bhagavadbhakti-ratnāvalī, with the author's own commentary, entitled *Kāntimālā*. [B.]

See Rāj. Mitra, Notices, i., p. 240. The references to the *Bhāgavata* are always given, but they do not seem to correspond to the divisions of our editions.

The concluding verses of the preceding MS. are explained as far as v. 408, after which the text of v. 409 is given, followed by the colophon: इति श्रीपुरुषोत्तम° भक्तिरत्नावली सकांतिमाला समाप्ता ॥

Then follow the verses:

> इति लिखनमनर्घ्यं यत्स्वविज्ञानहेतोर्
> उत भवतु समस्तो दर्शनाद्विष्णुभक्तः ।
> प्रचरतु हरिभक्तिग्राहिणी कापि शक्तिस्
> तदखिलमखिलात्मन्नार्पितं माधवेन ॥
> श्रीकांतस्य तमालशाखिन इव क्लेशच्छिदो जन्मना
> नानाकेलिकथाफलानि मधुराण्याजज्ञिरे यद्भुवि ।
> लक्षीकृत्यपरिक्षितं शुकमुखाद्विस्तारितं तद्रसः
> स्वैरं विष्णुपुरीकृतं ग्रथनमत्पात्रेण संपीयतां ॥

महायज्ञ° गणिते शके । फाल्गुने कृष्ण (marg. corr. शुक्ल) पक्षस्य° ॥ वाराणस्यां महेशस्य° ॥

इति श्रीहरिजीव्यासस्य पुस्तकं श्रीरामनाथेनालेखि ॥ संवत् १७८९ ॥

[MACKENZIE COLLECTION.]

3537.

1184 c. Foll. 39; size 13½ in. by 4¾ in.; fair, modern Bengalī handwriting; eleven lines in a page.

Kāntimālā, without the text of the *Bhakti-ratnāvalī*. [C.]

It begins: सत्सदाचारानुमितश्रुतिबोधितप्रारिप्सितान-विघ्नपरिसमाप्तिकारणं श्रीकृष्णकीर्तनरूपं मङ्गलमाचरति श्री-भागवतपद्येनैव °

In this MS. the verses up to 407 are like-wise explained, and then the text of v. 408 is given; but the MS. omits the last two verses containing the date.

Colophon: इति श्रीभक्तिरत्नावली(!) समाप्ता ॥

[H. T. COLEBROOKE.]

3538.

946. Foll. 72; size 12 in. by 4¾ in.; fair, modern Devanāgarī writing; eight lines in a page.

Fragment of *Vishṇupurī's Bhaktiratnāvalī*, with an anonymous commentary in Hindi.

As far as fol. 67, the text (vv. 1–87 of the 1st chapter) agrees on the whole with that of the preceding MSS. After this there are only five more *ślokas*, which, however, are not found in this connection in the other MSS.

[H. T. COLEBROOKE.]

3539.

1234. Foll. 161 (counted 162, no. 153 being passed over); size 12½ in. by 6 in.; good, modern Bengalī handwriting; twelve, from fol. 64 ten, lines in a page.

Bhāgavata-Kathāsaṃgraha, also called *Hari-bhaktitaraṅgiṇī*, an epitome of the *Bhāgavata-purāṇa* with partial quotations of whole verses from the original, by *Keśava Śarman*, or *Keśava Pañcānana Bhaṭṭācārya*, as he calls himself at the end of *skandha* x.

It begins:

प्रणम्य जगतामीशं श्रीमत्केशवशर्म्मणा ।
कथा भागवती वाच्या हरिभक्तितरङ्गिणी ॥

अशीतिलक्ष इत्यादि यैर्न श्रुतमित्यादि ।
आगन्तुकव्याधिविघातहेतुरापीयते तिक्तकषायकादि ।
भवस्थिरव्याधिविनाशनाय न पीयते किं मधुरं पुराणं ॥

अथ नानाशास्त्रपुराणप्रबन्धैश्चित्तप्रसादमलभमानस्तत्तत्रापरितुष्यन्नारदोपदेशतः श्रीमद्भगवद्गुणवर्णनप्रधानं भागवतशास्त्रं प्रारिप्सुर्वेदव्यासस्तत्प्रतिपाद्य परमदेवतानुस्मरणलक्षणं मङ्गलमाचरति ॥

यं ब्रह्मवेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशकाय ॥

तस्मै नमः यं वेदान्तिनो ब्रह्म वदन्ति मीमांसकाः परं कर्मात्मकं सांख्याः प्रधानं पाताञ्जलाः पुरुषमन्तर्यामिनं नैयायिका ईश्वरमिति जगत्कारणं । वैशेषिका अपि वाशब्दात्परमात्मानं वदन्तीति सर्वत्रान्वयः ॥ सर्वविघ्ननाशकाय सर्वदर्शनसिद्धमुक्त्वा वेदान्तप्रतिपाद्यमेव परमवस्त्वित्याह ॥ ओं जन्माद्यस्य यतो° (*Bh. P.* I., 1) ॥ तं परं परमेश्वरं धीमहि ध्यायेम । अस्य विश्वस्य यतो जन्मादि जन्मस्थितिभङ्गं यतो भवति । अर्थेषु कार्येषु सर्वत्र सद्रूपेणान्वयात् । °

The *skandhas* end as follows: I., fol. 18*b*; II., fol. 21*b*; III., fol. 31*a*; IV., fol. 41*b*; V., fol. 49*b*; VI., fol. 58*a*; VII., fol. 63*b*; VIII., fol. 72*a*; IX., fol. 84*b*; X., fol. 144*a*; XI., fol. 155*a*; XII., fol. 162*b*.

It concludes with the two verses (*Bh. P.* XI., 20, 21): नमस्तस्मै भगवते° ॥ योगीन्द्राय नमस्तस्मै° ॥ followed by the colophon: इति श्रीभागवतकथासंग्रहः समाप्तः ॥

On the margin of the last page another hand has written, in Devanāgarī, the title *Bhāgavatasaṃgrahakathā*; and on fol. 1*a*, in Bengalī and Devanāgarī, *Bhāgavatasaṃgraha*.

The old number of the MS. was 464, under which the work is referred to by Burnouf, préf., p. clxvi.

For another work of the same title see above, no. 3518. [H. T. COLEBROOKE.]

3540.

1491c. Foll. 51; size $15\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; modern Bengalī handwriting; six lines in a page.

Saṃkshepa-Bhāgavatāmṛita, or *Laghu-Bhāgavatāmṛita*, an epitome of authoritative opinions regarding the divine nature of *Kṛishṇa*, his attributes, and his identity with the different manifestations of *Vishṇu*; abridged, by *Rūpa Gosvāmin*, from a more extensive compendium compiled by his brother, *Sanātana Gosvāmin*.

The MS. contains only the first *khaṇḍa*, called *Śrīkṛishṇāmṛita*, while the whole work seems to consist of two *khaṇḍas*, the second being apparently devoted to the praise of *Kṛishṇa's* female companion, *Śrī*.

It begins (with the numbers added):

नमस्तस्मै भगवते कृष्णायाकुण्ठमेधसे ।
यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥ १ ॥ Cf. [p. 1275*b*, note.

कृष्णवर्णं त्विषाकृष्णं साङ्गोपाङ्गास्त्रपार्षदं ।
यज्ञैः संकीर्तनप्रायैर्यजन्ति हि सुमेधसः ॥ २ ॥

मुखारविन्दनिस्यन्दमरन्दभरतुन्दिनाः(°ला) ।
ममानन्दं मुकुन्दस्य संदुग्धां वेणुकाकली ॥ ३ ॥

श्रीचैतन्यमुखोद्गीर्णा हरे कृष्णेति वर्णकाः ।
मज्जयन्तो जगत्प्रेम्णि विजयन्तां तदाह्वयाः ॥ ४ ॥

श्रीमत्प्रभुपदाम्भोजैः श्रीमद्भागवतामृतं ।
यद्व्यतानि तदेवेदं संक्षेपेण निषेव्यते ॥ ५ ॥

इदं श्रीकृष्णतद्भक्तसंबन्धादमृतं द्विधा ।
आदौ कृष्णामृतं तत्र सुहृद्भ्यः परिविष्यते ॥ ६ ॥

निर्बन्धं युक्तिविस्तारे मयात्र परिमुञ्चता ।
प्रधानत्वात्प्रमाणेषु शब्द एव प्रमाण्यते ॥ ७ ॥

अतस्तैः शास्त्रयोनित्वादिति न्यायप्रदर्शनात् ।
शब्दस्यैव प्रमाणत्वं स्वीकृतं परमर्षिभिः ॥ ८ ॥

किं च तर्काप्रतिष्ठानादिति न्यायविधानतः ।
अमीभिरेव सुव्यक्तं तर्कस्यानादरः कृतः ॥ ९ ॥

अथोपास्ये सुमुख्यत्वं वक्तुमुत्कर्षभूमतः ।
कृष्णस्य तत्त्वरूपाणि निरूप्यन्ते क्रमादिह ॥ १० ॥
स्वयंरूपस्तदेकात्मरूप आवेशनामकः ।
इत्यसौ त्रिविधं भाति प्रपञ्चातीतधामसु ॥ ११ ॥
तत्र स्वयंरूपः ॥
अनन्यापेक्षि यद्रूपं स्वयंरूपः स उच्यते ॥ १२ ॥
यथा ब्रह्मसंहितायां ॥ ०

The work is founded mainly on the *Bhāgavatapurāṇa*; but, by way of illustration, extracts are given from other *Purāṇas* and similar works, such as *Vishṇudharmottara*, *Mathurākhaṇḍa* of the *Skandapurāṇa* (fol. 44*b*), *Bṛihadvaishṇava* (fol. 42*a*), *Nāradapañcarātra*, *Bhagavadgītā*, and *Harivaṃśa*. Each passage is followed by a short gloss (*kārikā*) added by the compiler.

It ends: यथा तन्त्रे ।

कन्दर्पकोट्यर्बुदरूपशोभा
नीराज्य पादाबुलखाञ्चलस्य (!) ।
कुत्राप्यदृष्टश्रुतिरम्यकान्तेर्
ध्यानं परं नन्दसुतस्य वक्ष्ये ॥

द्वादशमे च । त्रैलोक्यसौभगमिदं च निरीक्ष्य रूपं यद्गोगाद्विद्रुममृगाः पुलकान्यबिभ्रन्निति ॥ इति संक्षेपभागवतामृते श्रीकृष्णामृतं नाम पूर्वखण्डं ॥

The title '*Laghubhāgavatāmṛita*' — which also appears in a MS. in Bühler's Cat. of Gujarāṭ etc. MSS., ii., p. 26 (where no author's name is given) — is inscribed, both in Bengalī and Hindī, on the first page of the MS. It is doubtless meant to convey the same idea as the '*Saṃkshepabhāgavatāmṛita*' of the colophon. In Kielhorn's Cat. of Sansk. MSS. in the Central Provinces (Nagpur 1874) a work of the latter title is attributed (probably erroneously) to *Kṛishṇacaitanya* himself; whilst in Stein's Cat. of Kashmir MSS. (p. 225) no author is mentioned. A *Bhāgavatāmṛita* is mentioned as one of *Sanātana's* works at the end of a MS. (Rāj. Mitra, Notices, vi., p. 193) of that author's *Vaishṇavatoshiṇī* (in an epilogue added thereto by his nephew, *Jīva Gosvāmin*); cf. also Wilson, Essays on the Rel. of the Hindus, i., p. 167; and according to the commentator's explanation (see next MS.) of v. 5 of the introduction, the present work is an abridgment of *Sanātana's* compendium. Wilson, *l.c.*, also credits *Rūpa* with a *Laghubhāgavata*, or abridgment of the *Bhāgavatapurāṇa*.

For another MS. of the same section of the work, see Roth's Cat. of Tübingen MSS., p. 16. [H. T. COLEBROOKE.]

3541.

1418. Foll. 116; size 12½ in. by 4¾ in.; fair, modern Bengalī handwriting; six lines in a page.

A commentary on the *Saṃkshepa-Bhāgavatāmṛita*, by *Rādhāmohana Śarman*. Incomplete.

It begins:

राधामुखेन्दुकिरणामृतलोभलोल-
चक्षुश्चकोरपरिहारितमालरूपः ।
रज्यन्नवीनरमणीनलिनीपरीतः
को[ऽ]पि व्रजेन्द्रतनयः परिपातु विश्वं ॥

नत्वा श्रीचरणाम्बुजं परिनमद्वृन्दावनान्तःस्थली-
क्रीडाकाननलम्पटस्य मुरलीराधामृतोद्घर्षिणः ।
श्रीमद्भागवतामृतं सुमधुरं व्याख्यायते श्रीमता
राधामोहनशर्मणा भगवती ऽद्वैतस्य वंशोद्भुवा ॥

वन्दे चैतन्यचन्द्रं तमद्वैताद्वैतविग्रहं ।
नित्यानन्दमयं कृष्णचरणाम्बुजलिप्सया ॥

प्रारिप्सितग्रन्थसमाप्तिप्रतिकूलविघ्नपरम्परापराभावुकश्रीकृष्णप्रणतिरूपं मङ्गलमादौ शिष्यशिक्षायै दशमनारदोक्तपादान् * दर्शयति । नमस्तस्मा इति ।

* *Bhāg. P.* (Bomb. 1853) x., 87, 46: नारद उवाच ॥
नमस्तस्मै भगवते कृष्णायामलकीर्तये ।
यो धत्ते सर्वभूतानामभवायोशतीः कलाः ॥

Fol. 5*b* : श्रीकृष्णस्वरूपनिरूपणे ग्रन्थे ऽस्मिन् शिष्यप्रवृत्त्यर्थं यो धत्त इत्यादिना प्रदर्शितभक्त्यानुग्राहकत्वदार्ढ्याय परमाराध्यत्वप्रदर्शनाय च एकादशस्यपद्यमुद्योतयति । कृष्णवर्णमिति (*Bh. P.* XI., 5, 33) ।

Fol. 8*b*: भगवन्नमस्कारादिकं तत्संपर्कमात्रेण वेणुध्वनिरपि(रेणु° MS.) ममाभीष्टं संपादयितुं समर्थ इति मनसिकृत्य तमेव प्रार्थयते । मुखारविन्देति । ° मुखारविन्दात् निस्यन्दो निर्गमनमरन्दभरः मकरन्दनिकरस्तेन तुन्दिला तत्पूरितत्वेन मधुरा(!) मम मयि आनन्दं आनन्दस्वरूपं श्रीकृष्णं तद्भावं वा संदुग्धां प्रकटयतु । °

Fol. 9*a*: इदानीं शिष्यप्रवर्त्तनाय ग्रन्थस्य प्रेक्षावत्संमतत्वमाह श्रीमदिति श्रीमत्प्रभुमुखाम्भोजैः श्रीमद्भव्यसनातनगोस्वामिमुखपद्मैः मुखचन्द्रैरिति वा यद्धतानि विस्तारितं भागवतामृतं भगवत्स्वरूपनिरूपणादिरूपममृतं एतेन भागवतममृतं यत्रेति व्युत्पत्त्या ग्रन्थनामापि ज्ञेयं तदेव तदर्थतात्पर्यैकमेव इदमनुपदवक्ष्यमाणभागवतामृताख्यं संक्षेपेण निपेव्यते निबध्यते मया रूपगोस्वामिनेति शेषः ।

As contained in this MS., the commentary does not even extend to the end of the first section, but breaks off abruptly, in the middle of fol. 116*b*, in the comment on a *kārikā* — मथुरामिति विस्पष्टं मथुरामण्डले व्रजं । तदानीं सुहृदो तत्र मधुपुर्यामभावतः ॥ — found on fol. 48*a*, l. 1 of the MS. of the text. There being no colophon, the title of the commentary is not given in the MS. itself; but on fol. 1*a* another hand has inscribed, in Devanāgarī, the erroneous title श्रीराधामोहनगोस्वामिकृतवृहद्भागवतामृतं.

The MS. is referred to, under its old number 1532, by Burnouf, préf., p. clxvi.

[H. T. Colebrooke.]

3542.

2034. Foll. 145; size 12¾ in. by 5¼ in.; good Devanāgarī writing, of about 1700 A.D.; 7–14 lines in a page.

Muktāphala, a summary of *Vaishṇava* doctrines as propounded in the *Bhāgavata-purāṇa;* composed by *Vopadeva,* son of the physician *Keśava,* and pupil of *Dhaneśa;* with a commentary, entitled *Kaivalyadīpikā,* composed (at his father's house in Kaṭaka) by *Hemādri,* son of *Kāmadeva,* and at the time minister of king *Rāmarāja* (or *Rāmacandra,* A.D. 1271–1309) of Devagiri. [A.]

Vopadeva's work, being exclusively based on the *Bhāgavata,* is sometimes described * as a mere commentary or gloss on that *Purāṇa.* It consists of three divisions, treating respectively: (*a*) of the nature of *Vishṇu,* and the true mode of his worship (*Vishṇubhakti*), foll. 1–54; (*b*) of the duties and rites to be performed by his votaries (*Vishṇubhaktijanya*), foll. 54–74; (*c*) of the nine different grades or dispositions (*rasa*) to be attained by them successively in the perception of his all-pervading power, foll. 75–145.

The text begins:

विष्णुं पंचात्मकं वंदे भक्त्याष्टादशभेदया ।
सांगवर्गोनविंशत्या भक्तैर्नवभिराश्रितम् ॥ १ ॥

विष्णुप्रीत्यै चतुर्वर्गचिंतामण्यामजीगणत् ।
भेदान्व्रतानां दानानां तीर्थानां मोक्षवर्त्मनां ॥ २ ॥

मूर्तिप्रासादपूजानां हेमाद्रिर्गणकाग्रणीः ।
विष्णुभक्त्यंगभक्तानां गणयत्युक्तसारधीः ॥ ३ ॥

मुक्ताफलेन ग्रंथेन सद्भागवतशुक्तिना ।
भक्तिस्वात्यंबुना मुग्धमार्कंडेयशिशुश्रिया ॥ ४ ॥

मुक्ताफलं सुखचितस्फुटभक्तिभेद-
प्रत्यक्षराजितलसत्पदपद्मरागं ।
हेमाद्रिसंभवसुवर्णनिवेशरम्यं
कंठे कुरुध्वमवरुंध्वमपूर्वलक्ष्मीं ॥ ५ ॥

तत्रादौ विष्णुप्रकरणं ॥ तत्र विष्णोर्लक्षणं भेदाश्च ॥

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च यो ऽवशिष्येत सो ऽस्म्यहम् ॥ ६ ॥

* As, for instance, in *Gopālācārya's Bhāgavatabhūshaṇa,* printed at Bombay and Benares.

स द्वेधा। निराकारः साकारश्च। अनवच्छिन्नं चैतन्यं निराकारः। सत्त्वावच्छिन्नं चैतन्यं साकारः॥ रजस्तमोभ्यां युक्ते सत्त्वे पुरुषः। रजसा ब्रह्मा। तमसा रुद्रः। शुद्धे विष्णुरेव। ०

Hemādri's commentary, *Kaivalyadīpikā*, begins:

यज्ज्योतिरुन्मिषति चेतसि धर्ममेघम्
  आतस्थुषामिह वशे परिकर्ममुख्यैः।
तच्छुद्धसत्त्वमुकुरप्रतिबिंबभावात्
  कृष्णाभिधामुपगतं भुवि भावयेम॥ १॥

समूलघातं प्रणिहत्य योऽर्धं
  मृणालिनीं चेतयते मनीषां।
यत्पादसंगाज्जगती कृतार्था
  गुरुं विवस्वंतमिहानुवे तं॥ २॥

श्रीवोपदेवस्य निधेर्गुणानां
  जयंति ते ते भुवि वाग्विलासाः।
विकुंठ्य येषु स्वयमीश्वरो ऽपि
  सर्वज्ञशब्दं स्वमवैति रूढं॥ ३॥

अस्मिन्समस्मिन्नपि वाङ्मयाब्धाव्
  अपारपारीणमनीषयोच्चैः।
विवृण्वतश्चिज्जडवस्तुभेदं
  गुणा गणेया भुवि नास्य कैः कैः॥ ४॥

अमुष्य वैदग्ध्यनिधेर्हृदिस्पृशो
  मुदं ददंते ऽत्र न कस्य सूक्तयः।
मुक्ता मृषाद्वेषिमनांस्यनारतं
  वियोगिहृंदीव कलाः कलानिधेः॥ ५॥

तेन मुक्ताफलं तेने यल्लोकमनुगृह्णता।
तत्र टीकां यथाबुद्धि कुर्वे कैवल्यदीपिकां॥ ६॥

मृष्टां त्रिलोकगुरुणार्धमिवेंदुलेखां
  सर्वज्ञमंडनकरीमकलंकशंकां।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा
  कुर्यामिमां तदिह यांतु बुधाः प्रसादं॥ ७॥

इह मुमुक्षूपकाराय रुचिरं प्रकरणं चिकीर्षुराचार्यस्तस्य परिसमाप्तिप्रचयपरिपंथिविघ्नविघाताय शिष्टाचारपरिपालनाय च समुचितेष्टदेवतां वंदमानस्तत्प्रतिपाद्यमर्थं श्रोतृप्रवृत्त्यंगतया संक्षिप्याह। विष्णुमित्यादि। ०

From the comments on vv. 2–5 (throughout interproted in a double sense) we extract the following passages:

इह च स्वकर्तृकत्वे ऽपि यदुराजमहामंत्रिणा हेमाद्रिणा अभ्यर्थितस्तत्कर्तृकत्वं ख्यापितवान्। तदेवाह। विप्रावत्यादि। चतुर्णां धर्मादीनां वर्गश्चतुर्वर्गः। तत्रेष्टसमर्पको ग्रंथश्चिंतामणिः। मणिर्द्वयोरित्यभिधानात् स्त्रीत्वं तस्यां हेमाद्रिव्रतादिभेदानजीगणत्। ०॥ गणकाग्रणीः। गणकेषु देशकोशयोरायव्ययौ लिखत्सु अग्रणीर्मुख्यः। ०॥ सती प्रशस्ता भागवतमेव शुक्तिर्जन्मस्थानं यस्य तत्तथा तेन भक्तिर्भजनं कर्तुरनुरागः स एव स्वात्यंबु यस्य तत्तथा तेन। ०। मुग्धो भ्रांतः मार्कंडेयो यस्मिन् शिशौ शिशुरूपे विष्णौ स तथा तस्य श्रीः शोभा यस्मात्तत्तथा तेन। भाषितपुंस्कत्वाद्विभाषाभावः। मार्कंडेयो हि हिमवति पुष्पभद्रातीरे भगवन्मायां दिदृक्षुरतिदीर्घं तपस्तप्यमानः कदाचित्प्रसन्नेन भगवता प्रकटितायां मायायां निखिललोकसंप्रवोदके मुहुर्मज्जनोन्मज्जनानि भजन् अकस्माद्वटपर्णसंपुटे शयानमतिसुंदरं भगवद्बालमालोक्य प्रमुमोह। यो हि मुनिः पुंजिकस्थलादिविभ्रमे पुनर्बभ्राम सो ऽप्यत्र मुग्ध इति शिशोः सुंदरत्वमुक्तं तस्याप्येतदलंकार इत्यतिशयः। एकं च मुक्ताफलं प्रायेण बालानलं करोतीति भंगिविशेषोक्तिः। ०॥ हेमाद्रिः पुरुषविशेषः तत्संभवानि तेनोच्चारितानि सुष्ठु सुरेखाणि यानि वर्णानि अक्षराणि तेषां निवेशेन तत्र तत्रोचितस्थानेषु न्यासेन रम्यं सुश्लिष्टं। वर्णग्रहणेन स्ववाक्यानां श्लोकत्वमुक्तं। तत्कंठे कुरुध्वं कंठस्थं यथा स्यात्तथा ऽभ्यस्यध्वमित्यर्थः। ०

The text of the *Muktāphala* ends (with the numbers supplied from MS. B):

उद्गायतीनामरविंदलोचनं
  व्रजांगनानां दिवमस्पृशद् ध्वनिः।
दध्नश्च निर्मंथनशब्दमिश्रितो
  निरस्यते येन दिशाममंगलं॥ [४५]॥

स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां
  ध्यायंतु भूतानि शिवं मिथो धिया।
मनश्च भद्रं भजतादधोक्षजे
  ऽप्यावेश्यतां नो मतिरप्यहेतुकी॥ [४६]॥

चतुरेण चतुर्वर्गचिंतामणिवणिज्यया।
हेमाद्रिणार्जितं मुक्ताफलं पश्यत कौतुकात्॥ [४७]॥

निर्मथ्य पयसां राशिं मंदरः कौस्तुभं न्यधात्।
हेमाद्रिर्वचसां मुक्ताफलं रत्नं हृदि प्रभोः॥ [४८]॥

हेमाद्रिमाद्रियत एव गुणेन येन
तेनैव पूरितसुखेन सुबद्धमेतत् ।
मुक्ताफलं प्रतिफलज्जगदीशरूपं
यत्कर्णकंठकुहरे सुषमास्य काचित् ॥ [४९] ॥

द्वे एव चित्रे रामस्य सिंधुर्बद्धः पुराधुना ।
हेमाद्रिः स्वमुपानीतः सूर्यवृत्तप्रदक्षिणः ॥ [५०] ॥

विद्वद्धनेशशिष्येण भिषक्केशवसूनुना ।
हेमाद्रिर्वोपदेवेन मुक्ताफलमचीकरत् ॥ [५१] ॥

स्वर्गे गीर्वाणनाथः सुरपतिमभितः शाब्दिकानां वरेण्यं
पाताले नागराजः फणिपतिसदृशो यस्य गायंति कीर्तिं ।
यस्तीर्णः शास्त्रपाथोनिधिमखिलमदो ग्रंथरत्नं सुवृत्तं
चक्रे शिष्यो धनेशः कविकुलतिलकः केशवेर्वोपदेवः ॥

इति मुक्ताफलं समाप्तं ॥

The last verse is not found in the other MSS., nor is it explained in the *Kaivalya-dīpikā*, from which we extract a few passages of comment on the preceding verses (again explained in a double sense):

इह च स्वकर्तृके ऽपि यदुराजमहामंत्रिणा हेमाद्रिणा ऽभ्यर्थित आचार्यस्तत्कर्तृकत्वं ख्यापितवानिति प्रागुक्तं तदेतत्पर्यंते ऽपि स्फावयन्नाह चतुरेणेति । चतुर्वर्गचिंतामण्याख्ये ग्रंथमहोदधेर्वणिज्या तया चतुरेण विदितग्रंथरचनारीतिविशेषेण । यथा हि वणिज्यायां तत्तद्देशेभ्यस्तानि प्रियवस्तून्याहृत्य पुमान् तत्तद्विषये चतुरो भवति तथैतेन तत्तत्स्मृतीतिहासपुराणादिभ्यस्तानि तानि निःशेषव्रतदानतीर्थमोक्षादिप्रतिपादनपराणि वाक्यान्याहृत्य ग्रंथरचनायां कौशलमासादितं । ततस्तयैव रेखया भागवतस्य तत्तत्स्कंधेभ्यस्तानि तानि विष्णवादिवस्तुचतुष्टयप्रतिपादनपराणि पद्यान्युद्धृत्य मुक्ताफलाख्यं प्रकरणं कृतं । ० [४७] ॥ ० पयसां राशिं क्षीरोदं मंदरो मंथाचलः न्यधात् निक्षिप्तवान् हेमाद्रिर्मेरुः कामदेवात्मजश्च वचसां राशिं भागवताख्यं निर्मथ्य मुक्ताफलाख्यं रत्नं ग्रंथं च प्रभोः श्रीकृष्णस्य हृदि न्यधादित्यर्थः ॥ [४९] ॥ द्वे एवेति । रामो दाशरथिर्देवगिरीश्वरश्च तस्य पुरा त्रेतायां चरित्रेषु मध्ये द्वे एव चित्रे यत्सिंधुः समुद्रो बद्धः यच्च हेमाद्रिर्मेरुः स्वमुपानीतः स्वस्य निकटीकृतः । किंभूतस्य सूर्यस्य रवेरावृत्त्या आवृत्तिं गता प्रदक्षिणो परिभ्रमणो यस्मिन्मेरौ स तथा । ० । अन्यत्रैव तस्य तु रामस्य अधुना यदुकुले अवतीर्णस्य द्वे एव चित्रे यत्सिंधुर्गजमदो बद्धः । सिंधुशब्देन तद्वंतो गजा लक्ष्यंते । सिंधुरिति जातावेकवचनं । प्रत्यर्थिनो राज्ञः पराभूय तत्सिंधुराः स्वगृहे बद्धा इत्यर्थः । यच्च हेमाद्रिर्द्विजविशेषः स्वमुपानीतः स्वसाम्राज्यस्य महामात्यस्य पदे ऽधिकर्तुमित्यर्थः । कीदृशः । सूरिषु पदवाक्यमप्रतीति (*r.* पदवाक्यप्रमाणादिप्रवीणेषु with B, C) आवृत्त्या शतशः क्रियमाणत्वादावृत्तिं गता प्रकृष्टा दक्षिणा दानं यस्य स तथा । को हि नाम वृहस्पतिमपि प्रज्ञया प्रहसतस्तादृशस्य मंत्रस्य शिरोमणेर्निजनिकटीकरणाच्चित्रीयते ॥ [५०] ॥ विद्वद्धनेशशिष्ये[णेत्यतिरोहितार्थं] ॥ [५१] ॥ ० । यत्किंचिदत्रभवतः खलु वोपदेवसूरेः कृतिर्निजधिया परिवर्त्यते मे । उद्दिश्य(!) कोविदजनोपकृतिं तदेतदाराधनं भगवतः परमेश्वरस्य ॥

छायावतीममृतदामपि नैकचित्रां
पुण्यप्रपामिव भुवि प्रथितां तदीयां ।
टीकां प्रियां परमहंसजनस्य दृष्ट्वा
ग्रंथः कृतो ऽत्र कृतिनां हृदुपैति तेषां[1] ॥

अतत्त्वे तत्त्वधीर्येषां तत्त्वे वातत्त्वधीर्नृणां ।
न तानानंदयंत्येता वोपदेवस्य सूक्तयः ॥

यस्य व्याकरणे वरेण्यघटनाः स्फीताः प्रबंधा दश
प्रख्याता नव वैद्यके ऽथ तिथिनिर्धारार्थमेको ऽद्भुतः ।
साहित्ये त्रय एव भागवततत्त्वोक्ते(०क्तौ B, C) त्रय-
[स्तस्य भु(०स्य च C)-
र्व्यंतर्वाणि(भूगिर्वाण C)शिरोमणिरिव गुणाः के केन
[लोकोत्तराः ॥

टीकां मुक्ताफलस्येमां नाम्ना कैवल्यदीपिकां ।
हेमाद्रिः कटके चक्रे कामराजस्य वेश्मनि ॥

इति हेमाद्रिदेवविरचिता मुक्ताफलटीका समाप्ता ॥

[GAIKAWAR.]

3543.

55. Foll. 163; size $10\frac{1}{4}$ in. by $4\frac{1}{2}$ in.; careless Devanāgarī writing of the latter part of last century; ten lines in a page.

Vopadeva's Muktāphala (foll. 52), followed by *Hemādri's Kaivalyadīpikā* (foll. 112; part of fol. 91, and the whole of fol. 92 being, however, left blank). [B.]

[1] हृदयैतुयैतुतोषं B; हृपुपैतु तोषं C; ? *r.* हृदयं तुतोष ॥

The gap in the commentary extends from fol. 107*b*, l. 1, to fol. 108*b*, l. 2 *infra* in A.

Though much less correct than A, this copy is very useful in correcting the not infrequent mistakes of that MS.

[H. T. COLEBROOKE.]

3544.

1229. Foll. 141 (numbered 140, no. 92 being double); size 11¼ in. by 6 in.; Devanāgarī writing; European paper (watermark 1801); 7–15 lines in a page.

Muktāphala, with the *Kaivalyadīpikā*. [C.]

To the four verses of the epilogue of the commentary this MS. adds the following:

सकलविबुधमानः श्रीनिकेतंवदान्यः(?°ते व°)
समदविबुधसिंहः श्रीनिवासोग्निसेहः(°वः) ।
जयति विनयसिंधुर्वामनेशः सुबंधः
प्रणतसकलभूपः कृष्णवंशैकदीपः ॥

इति श्रीवोपदेवकृता मुक्ताफलटीका कैवल्यदीपिका समाप्ता ॥

[H. T. COLEBROOKE.]

3545.

846 d. Foll. 7; size 12 in. by 4¾ in.; good, modern Devanāgarī writing (European paper); seven lines in a page.

Durjanamukhacapeṭikā, 'a slap in the face of wicked men,' being a vindication of the *Bhāgavata* as one of the original *Purāṇas* promulgated by *Vyāsa*, and not the work of *Vopadeva;* professing to have been written by *Rāmāśrama*.

A note in Colebrooke's hand, on the margin of the last page, however, states that "*Maṇirām Tārā* is of opinion that this little tract is not the work of *Rāmāśrama*, but of *Rāma Krishṇa Bhaṭṭa*, a *Paṇḍit* now living at Benares. *Rāmāśrama* was pupil of *Bhaṭṭoji*." E. Burnouf, who has translated this tract in his preface to the *Bhāgavatapurāṇa* (p. 59), on the other hand, is in favour of *Rāmāśrama's* authorship, on the ground that the author of the *Capeṭikā* dates *Vopadeva* five centuries back instead of six, as the contemporary of Colebrooke ought to have done.

It begins:

बल्लवीवल्लभं नत्वा ब्रुवे विद्वद्विनिश्चयम् ।
भागवताभिधे ग्रंथे स्वार्षानार्षत्वसंशये ॥ १ ॥

भागवतमनार्षमिति वदंतः प्रष्टव्याः कथमनार्षत्वमिति ग्रंथे व्यासनामदर्शनात् । यो हि ग्रंथं कृत्वा ऽन्यस्य नाम लिखति स हि प्रीत्या यथा विद्यारण्यैर्वेदभाष्ये माधवनाम । धनादिलोभाद्वा यथा वोपदेवेन हेमाद्रेर्नाम । °

Fol. 2*a*: किं च । माध्वेन विजयध्वजेन भागवते टीकाकृता तत्रादावष्टौ टीका स्वलोक्येत्युक्तं हनुमट्टीका शंकराचार्यटीका चेत्याद्युक्तं तत्कथं संगच्छतां । वोपदेवस्य पञ्चशती संवत्सराणां व्यतीता शंकराचार्याणां सप्तदशशती व्यतिक्रान्ता । °

It ends: ननु स्मृतीनामृपिप्रणीतत्वे सति वेदाविरुद्धार्थकत्वेन प्रामाण्यमिति चेन्न लाघवेन वेदार्थकत्वेन तत्प्रामाण्यस्योचितत्वात् ॥ इति श्रीरामाश्रमविरचिता दुर्जनमुखचपेटिका समाप्ता ॥

For a second treatise of the same title see above, no. 3367.

[H. T. COLEBROOKE.]

3546.

846 c. Foll. 9; the same size and hand.

Durjanamukhapadmapādukā, 'a kick in the face of wicked men,' being a reply, by an unknown author to the preceding tract; advocating *Vopadeva's* claim to the authorship of the *Bhāgavatapurāṇa*. Translated by Burnouf, préf., p. 73.

It begins: यदुक्तमत्र च व्यासनामलेखने ग्रन्थकर्तुः किं कारणं। नापि धनादिलोभो नापि प्रीत्यतिशय इति। तत्र पृच्छामः। यदत्र शेमुषीवैशद्यं दर्शयता भवता वैष्णवाभिमतभागवतनिर्माणे धनादिलोभो न कारणमित्युच्यते तत्किं व्यासस्य धनादिवितरणसामर्थ्यविरहादाहो स्विद्ग्रन्थकर्तुर्निःस्पृहत्वात्।०

It ends:

इह जगति खलानां कण्टकानां द्विधैव
प्रतिकृतिरतिरम्या प्रोदिता पण्डितेन्द्रैः।
निकटमुपगतानामास्यभङ्गो ऽङ्घ्रिरक्षैर्
व्यवहितवसतीनां सर्वथोपेक्षणैव॥

इति दुर्जनमुखपद्मपादुका समाप्ता॥

[H. T. Colebrooke.]

3547.

457. Foll. 208; size 16¾ in. by 5 in.; clear Bengalī handwriting; European paper (watermark 1802); eight lines in a page.

Mahā-Bhāgavatapurāṇa, an apocryphal *Purāṇa* recounting the story and exploits of *Devī*, and urging her claims to being worshipped as the supreme deity.

The MS. contains only *Khaṇḍa* I., consisting of 80 *adhyāyas*. Perhaps, however, the work was never carried any further.

The first *adhyāya* runs as follows: ओं

नारायणं नमस्कृत्य ०॥

यामाराध्य विरिञ्चिरस्य जगतः स्रष्टा हरिः पालकः
संहर्ता गिरिशः स्वयं समभवद् ध्येया च या योगिभिः।
यामाद्यां प्रकृतिं वदन्ति मुनयस्तत्त्वार्थविज्ञाः परां
तां देवीं प्रणमामि विश्वजननीं स्वर्गापवर्गप्रदां॥

या स्वेच्छयास्य जगतः प्रविधाय सृष्टिं
संप्राप्य जन्म च तथा पतिमाप शम्भुं।
उग्रैस्तपोभिरपि यां समवाप्य पत्नीं
शम्भुः पदं हृदि दधे परिपातु सा वः॥

एकदा नैमिषारण्ये शौनकाद्या महर्षयः।
पप्रच्छुर्मुनिशार्दूलं सूतं वेदविदां वरं॥

ऋषय ऊचुः॥

व्यासशिष्य महाप्राज्ञ सर्ववेदविदां वर।
पुराणं सांप्रतं ब्रूहि स्वर्गमोक्षसुखप्रदं॥

विद्यते विस्तृतं यत्र देव्या माहात्म्यमुत्तमं।
जायते च दृढा भक्तिर्यस्य संश्रवणेन वै।
देव्यां ज्ञानविहीनानां नृणामपि महामते॥

सूत उवाच॥

यदुक्तं श्रीमहेशेन नारदेन महात्मना।
पुराणं परमं गुह्यं महाभागवताह्वयं॥

तदाह भगवान्व्यासः श्रद्धया भक्तिशालिने।
स्वयं जैमिनये पूर्वं पुनस्ततो ब्रवीम्यहं॥

गोपनीयं प्रयत्नेन न प्रकाश्यं कदाचन।
एतस्य श्रवणे पाठे यत्पुण्यं जायते द्विजाः॥

तद्वक्तुं न महेशो ऽपि शक्तो वर्षशतैरपि।
किमहं कथयिष्यामि संख्याविरहितं यतः॥

श्रुत्वैव विस्मयाविष्टा ऋषयस्ते ऽतिहर्षिताः।
पुनरूचुर्मुनिश्रेष्ठं सूतं वेदविदां वरं॥

ऋषय ऊचुः॥

यथा पुराणश्रेष्ठं तत् प्रकाशमभवत्क्षितौ।
एकदाचक्ष्व (एत०) तत्त्वेन कृपया मुनिपुङ्गव॥

सूत उवाच॥

महर्षिर्भगवान् व्यासः सर्ववेदविदां वरः।
अशेषधर्मशास्त्राणां वक्ता ज्ञानी महामतिः॥

कृत्वा सप्तदशैतानि पुराणानि महामुनिः।
न तृप्तिमभिलेभे स कथंचिदपि धर्मवित्॥

महापुराणं परमं यत्परं नास्ति भूतले।
भगवत्याः परं तत्त्वं माहात्म्यं यत्र विस्तृतं॥

तत्कथं वर्णयिष्ये ऽहमिति चिंतापरायणः।
देव्यास्तत्त्वमविज्ञाय क्षुब्धचित्तो बभूव सः॥

यस्यास्तत्त्वं न जानाति महाज्ञानी महेश्वरः।
तस्याः कथं परं तत्त्वं ज्ञातव्यमिति दुष्करं॥

विचिन्त्यैवं महाबुद्धिश्चचार परमं तपः।
गत्वा हिमवतः पृष्ठं दुर्गाभक्तिपरायणः॥

तेनैव तपसा तुष्टा सर्वाणी(श०) भक्तवत्सला।
अदृष्टरूपा चाकाशे स्थित्वेदं वाक्यमब्रवीत्॥

यत्र ताः श्रुतयः सर्वा ब्रह्मलोकं महामुने ।
गच्छ तत्र परं तत्त्वं मम वेत्स्यसि निष्कलं ॥

प्रत्यक्षतां गमिष्यामि तत्रैव श्रुतिभि[ः] स्तुता ।
तच्च संपादयिष्यामि तवाभिलषितं च यत् ॥

तच्छ्रुत्वा भगवान्व्यासो ब्रह्मलोकं तदा ययौ ।
वेदान्प्रणम्य पप्रच्छ किं ब्रह्म परमव्ययं ॥

ऋषेस्तद्वचनं श्रुत्वा विनयावनतस्य वै ।
वेदाः प्रत्येकतः प्राहुस्तत्क्षणान्मुनिपुंगवं ॥

ऋग्वेद उवाच ॥

यदन्तःस्थानि भूतानि यतः सर्वं प्रवर्तते ।
यदाहुस्तत्परं तत्त्वं साक्षा भगवती स्वयं ॥

यजुरुवाच ॥

या यज्ञैरखिलाधीशा योगेन च समिज्यते ।
यतः प्रमाणं हि वयं सैका भगवती स्वयं ॥

सामोवाच ॥

ययेदं भ्राम्यते विश्वं योगिभिर्या विचिन्त्यते ।
यद्भासा भासते विश्वं सैका दुर्गा जगन्मयी ॥

अथर्वोवाच ॥

यां प्रपश्यंति देवेशीं भक्त्यानुग्राहिणो जनाः ।
तामाहुः परमं ब्रह्म दुर्गां भगवतीं मुने ॥

सूत उवाच ॥

श्रुतीरितं निशम्येत्थं व्यासः सत्यवतीसुतः ।
दुर्गां भगवतीं मेने परं ब्रह्मेति निश्चितं ॥

श्रुतयस्त्वेवमुक्ता साः(*r.* ताः) पुनरूचुर्महामुनिं ।
प्रत्यक्षं दर्शयिष्यामो यथास्माभिरुदाहृतं ॥

इत्येवमुक्त्वा श्रुतयस्तुष्टुवुः परमेश्वरीं ।
सर्वदेवमयीं शुद्धां सच्चिदानन्दविग्रहां ॥

श्रुतय ऊचुः ॥

दुर्गे विश्वमपि प्रसीद परमे सृष्ट्यादिकार्यत्रये
ब्रह्माद्यान्पुरुषत्रयान्निजगुणैस्त्वं स्वेच्छया कल्पिता ।
नो ते कोऽपि च कल्पको ऽत्र भुवने विद्येत मातर्यतः
कः शक्तः परिवर्णितुं तव गुणान् लोके भवेद्दुर्गमं ॥

त्वामाराध्य हरिर्निहत्य समरे दैत्यान्रणे दुर्जयान्
त्रैलोक्यं परिपाति शम्भुरपि ते धृत्वा पदं रक्षसि ।
त्रैलोक्यक्षयकारकं समपिबत्तत्कालकूटं विषं
किं ते वाचयितुं वयं त्रिजगतां ब्रूमः परे ऽपक्षिके ॥

या पुंसः परमस्य देहिन इह स्वीयैर्गुणैर्मायया
देहाख्यापि चिदात्मिकापि च परस्पन्दादिशक्तिः परा ।
तन्मायापरिमोहितास्तनुभृतो यामेव देहस्थितां
भेदज्ञानवशाद्वदन्ति पुरुषं तस्यै नमस्ते ऽम्बिके ॥

स्त्रीपुंस्त्वप्रमुखैरुपाधिनिचयैर्हीनं परं ब्रह्म यत्
त्वत्तो या प्रथमं बभूव जगतां सृष्टौ सिसृक्षा स्वयं ।
सा शक्तिः परतो ऽपि यच्च समभून्मूर्तिद्वयं शक्तितस्
त्वन्मायामयमेव तेन हि परं ब्रह्मापि शक्त्यात्मकं ॥

तोयोत्थं करकादिकं जलमयं दृष्ट्वा तथा निश्चयम्
तोयत्वेन भवेद्ग्रहो मतिमतां तथ्यं तथैव ध्रुवं ।
ब्रह्मोत्थं सकलं विलोक्य मनसा शक्त्यात्मकं ब्रह्म त-
च्छक्तित्वेन विनिश्चितः पुरुषधीः पारस्परा ब्रह्मणि ॥

षट्चक्रेषु लयन्ति ये तनुभृतां ब्रह्मादयः षट् शिवास्
ते प्रेता भवदाश्रयाच्च परमेशत्वं समायान्ति हि ।
तस्मादीश्वरता शिवेन हि शिवे त्वय्येव विश्वाम्बिके
त्वं देवि त्रिदशैकवन्दितपदे दुर्गे प्रसीदस्व नः ॥

इत्येवं स्तुतिवाक्यैस्तु श्रुतिभिः संस्तुता सती ।
स्वरूपं दर्शयामास जगदाद्या सनातनी ॥

ज्योतीरूपा हि या देवी सर्वप्राणिष्ववस्थिता ।
व्यासस्य संशयं छेत्तुं स्वतन्त्वाकृतिमादधे ॥

स्फुरत्सूर्यसहस्राभा चन्द्रकोटिसमद्युतिं ।
सहस्रबाहुभिर्युक्ता दिव्यास्त्रैरतिशोभितैः ॥

सिंहपृष्ठसमारूढा कदाचित् शतवाहना(!) ।
चतुर्भिर्बाहुभिर्युक्ता नवीनजलदप्रभा ॥

द्विभुजा च चतुर्हस्ता तथा दशभुजा क्षणे ।
अष्टादशभुजा क्वापि शतसंख्यभुजा तथा ॥

अनन्तबाहुभिर्युक्ता दिव्यरूपधरा क्षणे ।
कदाचिद्विष्णुरूपा च वामस्था कमलासना ॥

राधया सहिताकस्मात् कदाचित्कृष्णरूपिणी ।
वामाङ्काधिगता वाणी कदाचिद् ब्रह्मवादिनी ॥

सूत उवाच ॥

एवंरूपाणि संलोक्य पराशरसुतो मुनिः ।
तां ज्ञात्वा परमं ब्रह्म जीवन्मुक्तो बभूव ह ॥

ततो भगवती देवी ज्ञात्वा तस्याभिवाञ्छितं ।
स्वपादतलसंलग्नं पङ्कजं समदर्शयत् ॥

मुनिस्तस्य सहस्रेषु दलेषु परमाक्षरं ।
महाभागवतं नाम पुराणं समलोकयत् ॥

प्रणम्य शिरसा देवीं नानास्तुतिभिरादरात् ।
जगाम स्वाश्रमं भूयः कृतकृत्यः स्वयं द्विजाः ॥

यद्यावत्पङ्कजं दृष्टं पुराणं परमाक्षरं ।
महाभागवतं पुण्यं प्रकाशमकरोत्तथा ॥

स्नेहात्तु कथितं तेन श्रुतं चाधिगतं मया ।
स्नेहाद्वः कथयिष्यामि गोपनीयं प्रयत्नतः ॥

अश्वमेधसहस्राणि वाजपेयशतानि च ।
महाभागवतस्यास्य कलां नार्हन्ति षोडशीं ॥

एवं महाभावगतं प्रकाशमभवत्क्षितौ ।
परित्राणाय लोकानां महापातकिनामपि ॥

इति° महाभागवतप्रकाशनं नाम प्रथमो ऽध्यायः ॥

The contents of the chapters are only indicated in a few of the colophons. At the end of *adhys.* 16–20 the work is styled श्रीमहाभागवते महापुराणे श्रीभगवतीगीतासूपनिषद्विद्यायां योगशास्त्रे° ॥

Adhys. 70–74 contain the *Gaṅgāmāhātmya;* 75–77, the *Kāmākhyāmāhātmya;* 78, the *Tulasīmāhātmya;* 79, the *Rudrākshamāhātmya.*

It ends: व्यास उवाच ॥

एतावदुक्तं देवेन पृष्टेन मुनिना स्वयं ।
खण्डे ऽस्मिन् जैमिने वाक्यं पुण्यं परमशोभनं ॥

एतद्यः शृणुयान्मर्त्यः पठेद्वा भक्तिसंयुतः ।
सो ऽन्ते निर्वाणमाप्नोति भुक्त्वा भोगान्मनोरथान् ॥

सुगुप्तमेतत्परमं कथितं शूलपाणिना ।
महात्मने मुनीन्द्राय नारदाय महामते ॥

यस्य संविद्यते गेहे तमापन्न स्पृशेत्क्वचित् ।
य इदं परमख्यानं श्रावयेद् द्विजसन्निधौ ।
सद्भक्त्या जैमिने तस्य पापं नश्यति तत्क्षणात् ॥

अप्यनेकशतकोटिजन्मान्तरसुसंचितं ।
एतदाकर्ण्य संत्यज्य पापं मोक्षमवाप्नुयात् ॥

इति श्रीमहाभागवते महापुराणे प्रथमखण्डसमाप्तिर्नामाशीतितमो ऽध्यायः ॥ ८० ॥ समाप्तश्चायं प्रथमखण्डः ॥

Cf. Rāj. Mitra, Notices, i., p. 203 (48 *adhy.*); R. Roth, Cat. of Tübingen MSS., p. 15 (80 *adhy.*); Burnouf, *Bhāgav. Pour.*, préf., p. cxl., note, refers to this MS. under its old no. 321, but erroneously takes it to contain the first book of the *Devībhāgavata.*

[H. T. Colebrooke.]

3548.

1918. Foll. 320; size 13¾ in. by 6 in.; clear Devanāgarī writing of 1525 A.D.; 14–16 lines in a page. From fol. 278 to the end many leaves have suffered somewhat from damp and wear.

Matsyapurāṇa.

For an analysis of the work see Aufrecht, Cat. Bodl., no. 95. Several editions of the work have appeared in India.

The MS., which was written by two brothers, *Tripurāri* and *Lakshmīdhara*, begins:

प्रणव(*r.* प्रचंड)तांडवाटोपप्रक्षिप्ताक्षिप्तदिग्गजाः ।
भवंतु विघ्नभंगाय भवस्य भवतां भुजाः ॥ १ ॥

Colophon: संवत् १५८२ वर्षे उत्तरायणगते श्रीसूर्ये ग्रीष्मर्तौ आषाढे मासे शुक्लपक्षे चतुर्थ्यां शनिवासरे मघनक्षत्रे सिद्धिनाम्नि योगे सिंहलग्ने ॥ मिथुनस्थे सूर्यनक्षत्रे मेषस्थे गुरौ शेषेषु ग्रहेषु यथास्थानस्थितेषु ॥ तस्मिन्दिने पुस्तकं लिखितं ॥ आमेटाह्वाते ज्ञो॰ गणपापुत्रज्येत्र(° ष्ठ)पुत्रत्रिपुरारि अपरार्धं लिखितं लघुपुत्रलक्ष्मीधरेण पूर्वार्धं लिखितं पुस्तकं ॥ राणाश्रीसंग्रामराज्ये महिषपुरवास्तव्ये ॥

[Dr. John Taylor.]

3549.

2032. Foll. 334; size 13¾ in. by 6 in.; fair Devanāgarī writing of 1767 A.D.; 15–18 lines in a page.

Matsyapurāṇa.

Colophon: लिपावितं श्रीसाहाजी श्रीकीर्तसींहजीपुत्रस्य साहाजी श्रीनंदलालजी । चिरंजीवी भाइ श्रीजेत-

सोंपजी तस्य पुत्र श्रीकुवेर श्रीसुपदेवजी चिरंजीव । कल्याणमस्तु । लिखितं भटसुपराम । हरितवंसी(*r.* हरीतवंशी) ॥ संवत् १८२४ वर्षे ञासोजमासे शुक्लपक्षे ५ तिथौ रविवासरे ॥

[GAIKAWAR.]

3550.

1080. Foll. 344; size 13½ in. by 6¾ in.; fair Devanāgarī writing of 1795 A.D.; fifteen lines in a page.

The same work.

This MS. was collated with the Oxford one by Prof. Aufrecht, and found inferior.

[H. T. COLEBROOKE.]

3551, 3552.

406, 407. Foll. 459 (of which foll. 29, 135–145 are wanting; whilst nos. 103 & 355 are double; and fol. 219 is wrongly bound between 226 & 227); size 12½ in. by 6 in.; modern Devanāgarī writing; thirteen lines in a page.

Matsyapurāṇa, in two volumes, with continuous pagination; likewise collated by Prof. Aufrecht.

[H. T. COLEBROOKE.]

3553.

2831. Foll. 420; size 6½ in. by 9 in.; fair, modern Devanāgarī writing (European paper); sixteen lines in a page.

A portion of the *Matsyapurāṇa*, comprising the first 127 (of the 278) *adhyāyas*.

The copyist has left frequent gaps in the text.

[SIR CHARLES WILKINS.]

3554.

2320 b. Foll. 18; size 11¾ in. by 6 in.; clear Devanāgarī writing of 1807 A.D.; seventeen lines in a page.

Prayāgamāhātmya, in 12 *adhyāyas*; ascribed to the *Matsyapurāṇa*.

The writing of the first two pages has been somewhat damaged by the leaves sticking together.

It begins: नारायणं नमस्कृत्य° ॥ सूत उवाच ॥
अ[तः प]रं प्रवक्ष्यामि प्रयागस्योपवर्णनं ।
[मार्कंडेयेन क]थितं यत्पुरा पांडुसूनवे ॥ १ ॥
भारते तु यथा(यदा ed.) वृते प्राप्तराज्ये पृथासुते ।
एतस्मिन्नंतरे राजा कुंतीपुत्रो युधिष्ठिरः ॥ २ ॥
भ्रातृशोकेन संतप्तश्चिंतयन्स पुनः पुनः ।
आसीत्सुयोधनो राजा एकादशचमूपतिः ॥ ३ ॥
अस्मान्संपीड्य वहुशः सर्वे ते निधनं गताः ।
वासुदेवं समाश्रित्य पंच शेषास्तु पांडवाः ॥ ४ ॥
कथं भीष्मश्च द्रोणश्च कर्णश्चैव महावलः ।
सुयोधनश्च राजासौ पुत्रभ्रातृसमावृतः* ॥ ५ ॥
राजानश्चैव निहताः सर्वे ये शूरमानिनः ।
किं नो राज्येन कर्तव्यं किं भोगैर्जीवितेन वा ॥ ६ ॥

Cf. Aufrecht, Cat. Bodl., no. 96. A lithographed edition of the treatise was published at Benares in 1854.

Compared with the corresponding section in the *Purāṇa* itself (ed. *Jīb. Vidy.* 1876, *adhy.* 102 seqq.) this *Māhātmya* will be found to be an enlargement on the original version. Thus, ed. *adhy.* 102 (verses 25) corresponds to MS. *adhy.* 1 (vv. 57); 103 (vv. 19) to 2 (vv. 38); 104 (vv. 22) to 3 (vv. 41); 105 (vv. 56) to 4 (vv. 80); 106 (vv. 21) to 5 (vv. 22); 107 (vv. 1–18) to 6 (vv. 129); 107 (vv. 19–34) to 7 (vv. 49); 108 (vv. 24) scattered over 8 (vv. 75), 9 (vv. 50), 10 (vv. 71); 109 (vv. 19) to 11 (vv. 47).

---

* हत्वा भीष्मं च द्रोणं च कर्णं चैव महावलम् ।
दुर्योधनं च राजानं पुत्रभ्रातृसमन्वितम् ॥ ed. *M. Pur.*

It ends:

नारदेन कुमारेण प्रोक्तं पौराणिकं परं ।
इदं प्रयागमाहात्म्यं शृणोति श्रावयेच्च यः ॥ ३४ ॥
प्रयागस्नानजं सर्वं पुण्यं प्राप्नोति भक्तिमान् ।
यज्ञैर्दानैस्तपोभिश्च व्रतैश्च नियमैरपि ॥ ३५ ॥
लभ्यते यत्फलं सम्यक् तदस्य श्रवणाद्भवेत् ।
य एतच्छ्रावयेद्विद्वान् विष्णुभक्तिपरायणः ॥ ३६ ॥
तीर्थाभिगामी धर्मात्मा पूजयेत प्रयत्नवान् ।
वस्त्रालंकरणाद्यैश्च दक्षिणाभिः प्रतोषयेत् ॥ ३७ ॥
तस्मिन्संतोषिते विप्रे प्रपद्यंते मनोरथाः ॥ ३८ ॥

इति श्रीमत्स्यपुराणे प्रयागमाहात्म्ये द्वादशो ऽध्यायः ॥ °

The MS. was written by one *Rādhākṛishṇa Duveda* (*? Dvivedin*).

[F. BUCHANNAN.]

3555.

2329. Foll. 326; size 11 in. by 5¼ in.; clear, modern Devanāgarī character; ten lines in a page.

Mārkaṇḍeyapurāṇa. [A.]

Like the two other copies, the MS. agrees more with that class of MSS. called the *Maithila* MSS. by the editor of this work in the Bibl. Ind., the Rev. K. M. Banerjea.

It begins: नारायणं नमस्कृत्य ° ॥

तपःस्वाध्यायनिरतं मार्कंडेयं महामुनिं ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥

Adhyāya 136 of the edition is followed in this MS. by the two chapters (here in one) given there in the appendix: इति प्रतिज्ञाय° ॥ -- अष्टादश पुराणानि ° ॥ but differing considerably, especially in the latter part; and for the last two *ślokas* it has the following: जैमिनिरुवाच ॥

भारते नाभवद्यन्मे संदेहस्फोटनं द्विजाः ।
तद्भवद्भिः कृतं नैव(मैत्रं C) कश्चिदन्यं(*r.*°न्यः) करिष्यति॥
यूयं दीर्घायुषः संतु न रोगाः स्मृतिसंयुताः* ।
सांख्ययोगे तथा चास्तु बुद्धिरव्यभिचारिणी ।
पितृशापकृताद्दुःखाद्(°दोषाद् C) दौर्मनस्यं व्यपैतु वः॥
एतावदुक्त्वा वचनं स जगाम स्वमाश्रमं ।
चिंतयन्परमोदारं पक्षिणां वाक्यमीरितं ॥
यं ब्रह्मा वरुणेंद्ररुद्रमरुतः स्तुवंति दैव्यैः स्तवैर्
वेदैः सांगपदक्रमोपनिषदैर्गायंति यं सामगाः ।
ध्यानावस्थिततद्गतेन मनसा पश्यंति यं योगिनो
यस्यांतं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥
इति श्रीमार्कंडेयपुराणे जैमिनिषंडं प्रथमं समाप्तं ॥

[GAIKAWAR.]

3556.

412. Foll. 239; size 12¾ in. by 6 in.; fair, modern Devanāgarī writing; thirteen lines in a page.

The same work. [B.]

The pagination, which omits nos. 130–139, stops altogether after fol. 193.

It begins:

प्रपद्ये देवमीशानं शाश्वतं ध्रुवमव्ययं ।
महादेवं महात्मानं विश्वस्य जगतः पतिं ॥ १ ॥
यद्योगिभिर्भवभयार्तिविनाशयोग्यम् ° ॥ २ ॥
पायात्स वः सकलकल्मषभेददक्षः ° ॥ ३ ॥
नारायणं नमस्कृत्य ° ॥ ४ ॥
पृथिव्यां नैमिषं श्रेष्ठं यत्र योगेश्वरो हरिः ।
स्वयंभूर्देवदेवेशो यत्र सा लिंगधारिणी ॥ ५ ॥
गोमती सरितां श्रेष्ठा यत्र ते मुनयः स्थिताः ।
मार्कंडेयं मुनिश्रेष्ठं जैमिनिः प्रत्यपूजयत् ॥ ६ ॥
तपःस्वाध्यायनिरतं मार्कंडेयं महामुनिं ।
व्यासशिष्यो महातेजा जैमिनिः पर्यपृच्छत ॥ ७ ॥
प्रष्टुमि[च्छामि] ते ब्रह्मन्संदेहान्भारतादिमान् ।
व्यासेनोक्तान्मुनिश्रेष्ठ संदेहांस्तान्ब्रवीतु(*r.* ब्रवीहि) मे ।
श्रुत्वा तान्मुनिशार्दूल कृतकृत्यो भवाम्यहं ॥ ८ ॥

---

* यूयं दीर्घायुषः संतु प्रजा वृद्धिर्विवर्धिता ॥ B; यूयं दीर्घायुषस्योश्चैर्नीरोगा वृत्तिसंयुताः ॥ C.

श्रवणं ये करिष्यंति तेषां भवभयं कुतः ।
आधिव्याधिविनाशश्च आयुरारोग्यवर्धनं ॥ ९ ॥
वर्धनं धनपुत्राणां तत्पुराणं प्रचक्ष्व मे ।
पठनाच्छ्रवणाच्चैव महापापैः (नरः पापैः C) प्रमुच्यते॥१०॥
भगवन् भारताख्यानं°

It ends in the same way as A, omitting, however, the last verse of that MS.; the colophon being followed by (cf. end of edition):

पुराणस्यास्य संख्या च कथिता तत्त्वबुद्धिना ।
श्लोकानां षट् सहस्राणि तथा चाष्ट शतानि च ॥ १ ॥
श्लोकाश्चात्र नवाशीति एकादशसमाहिताः ।
कथितं मुनिना तेन मार्कंडेयेन धीमता ॥ २ ॥
पुरा पवित्रा पुण्या च समाप्ता सह संहिता ॥

This is followed by an *anukramaṇikā:* मार्कंडेयजैमिनिसंवादः । अप्सरसः शापः । कंकवधः । ° — — दमचरितमिति समाप्तं चेदं मार्कंडेयपुराणं ॥

[H. T. Colebrooke.]

3557.

932. Foll. 213; size 12¼ in. by 6 in.; good, clear Devanāgari writing of 1793 A.D.; twelve lines in a page.

Mārkaṇḍeyapurāṇa.

It begins: यद्योगिभिर्भवभयार्तिविनाशयोग्यम्° ॥ पायात्स वः सकलकल्मषभेददक्षः° ॥ तपःस्वाध्यायनिरतो(!)° ॥ प्रष्टुमिच्छामि ते ब्रह्मन्° ब्रवीमि तु मे(!) । श्रुत्वा तान्मुनिशार्दूल कृतकृत्यो भवामहे(!) ॥ ° as B.

It ends as A, but omitting the final (*śārdūlavikrīḍita*) verse.

Fol. 1*a* has the following note by Colebrooke:—

"The holy *Márcandéya* (son of *Mrïcanda*) will live through twenty-four ages of *Brahmá*. See the story in the *Bhágavata;* his life was originally limited to six years, but grants of larger periods of life (were) made in consequence of successive acts of austere devotion. Seven others are acknowledged to be long-lived:—*Aśvatthāman* (son of *Droṇa*), *Bali*, *Vyása*, *Henumat*, *Vibhíshaṇa*, *Crïpáchárya*, and *Paraśuráma.*"

[H. T. Colebrooke.]

3558.

2258. Foll. 8 & 66; size 7¼ in. by 4 in.; clear Devanāgarī writing of 1775 A.D.; 6–8 lines in a page.

Devīmāhātmya, a section of the *Mārkaṇḍeyapurāṇa,* viz. *adhyāyas* 81–93 in the Bibl. Ind. edition, but here divided into 12 chapters.

रविप्रभेवास्तु तमो हरन्ती
दृशः प्रबोधाय सरस्वती वः ॥ १ ॥
श्रीलौलराजसुतपण्डितभट्टनोन-
राजात्मजः सहृदयैर्विहिताभ्यनुज्ञः ।
काव्ये पुरारिचरिते कुरुते ऽभियोगं
वाच्यार्थमात्रविवृतिं प्रति जोनराजः ॥ २ ॥
शेषार्थयोरिह विवक्षितबालबोध(विहस्तित° *K.*)-
श्रद्धाप्रतीतिररणिस्थहुताशतुल्या ।
कष्टेन यस्य सुचिरादुपतिष्ठते ऽन्नं
मांसस्पृहा भवति तस्य हि हासहेतुः ॥ ३ ॥ °

It ends:

श्रीकण्ठकाव्यविवृतिं विरचय्य जोन-
राजः सतो नमति सन्नमतिप्रतिष्ठः[1]।
हेलात्र(°स्तु *K.*) वस्तदपि यत्नमकार्षमस्यां
दीपो बिलाध्वहरणान्नरणेः समः किम् ॥
कुर्वन्तु तत्स्खलितयोजनमत्र सन्तः
श्रीकण्ठभक्तिरभसात्खलदर्शनाच्च ।
सेतुं खनन्ति सलिलानि हि रन्ध्रलाभात्
तन्मार्गमुज्झति जनो ऽथ चिराय खातम् ॥

This last verse is omitted in the edition.

इति श्रीकण्ठचरितकाव्यस्य पण्डितलौलपुत्रपण्डितनोन-राजपुत्रश्रीजोनराजकृता विवृतिः समाप्ता ॥ [GAIKAWAR.]

3850.

1148 c. Foll. 19; size 9 in. by 4 in.; good Devanāgarī writing of 1719 A.D.; eight lines in a page.

Śambhuvilāsa, a devotional poem in honour of *Śiva,* in three cantos, by *Viśvanātha,* surnamed *Rāṇaḍa* (?), of the *Cittapāvana* family.

It begins:

श्रीपट्टेन समन्वितं प्रथमतो नत्वा गुरुं बुद्धिदं
विघ्नध्वंसपारायणं च हृदये ध्यात्वा गणाधीश्वरं ।
नानालंकृतिजातिरीतिमहितं श्रीविश्वनाथः कविः
काव्यं शंभुविलासनाम कुरुते संख्यावतां प्रीतये ॥ १ ॥
यज्ञाभाद्धितता नृणां सुकुलता धान्यं धनं धन्यता
गोमातंगरथाश्च वेश्मवसुधावासांसि भूपास्तथा ।
जायंते विधिविष्णुशंभुभवने या रूपभेदैः स्थिता
सा काव्ये सुषमां करोतु महतीं लक्ष्मीर्मदीये स्थिरां ॥ २ ॥
तीर्थैः श्रीमणिकर्णिकाप्रभृतिभिः संसेविता मंदिरैः
कैलाद्रिसमैः सदाशिवयुतैरानंदकृत्पश्यतां ।
एतस्यां भुवि सर्वदा विजयते सा राजधानी विभोः
काशी काशितचित्सुखा गिरिपतेर्ब्रह्मादिदेवप्रभोः ॥ ३ ॥
यस्या विष्णुपुरी तथेंद्रनगरी धातुश्च पूः सुंदरी
हीना ब्रह्मसुखैकमुख्यवसतेर्गंगातटालंकृतेः ।
किंचित्क्षोणिगतापि या सुषमया सर्वोपरिष्टान्मता
मध्ये सप्तपुरां समुद्रकमणीतुल्योत्तमत्वात्स्थिता ॥ ४ ॥
मध्यस्थांश्चतुरो विधाय निगमान्प्रच्छतुस्तान्हरि-
ब्रह्माणौ वदतावयोरिह हि को ब्रह्मेत्यथो तैः शिव[2]।
उक्ते सत्यतिनिंदतः[3] श्रुतिशिवांश्छेत्तुं शिरो वेधसो
यस्यांसो ऽजनि भालतो गिरिपतेः कालादिको भैरवः ॥ ५ ॥
यो बाल्ये हरिकेशकाननमटन्निर्भीर्भियां वर्धनं
धूलिभिर्विरचय्य लिंगमवनौ वन्यैश्च पुष्पादिभिः ।
संपूज्याप शिवप्रसादनमसौ श्रीदंडपाणिः स्वयं
यस्यां तिष्ठति पापिनश्च कुरुते क्षेत्रात्पवित्राद्बहिः ॥ ६ ॥
कस्मिंश्चित्समये प्रकल्प्य हृदये वाराणसीं तामिमां
तत्रावाह्य परात्परं मणिगृहे श्रीयुक्तविश्वेश्वरं ।
ध्यात्वा मानसपूजनं च विधिवत्कृत्वा कविर्ब्राह्मणः
श्लोकान्विश्वगुरोः पुरोऽपठदिमान्श्रीविश्वनाथो निजान् ॥ ७ ॥
एकस्मै सुचिरं स्थिता ये सदने सार्धं गुरोः श्रीपतिर्[4]
लाजान्संप्रतिगृह्य राज्यमददात्तस्मै सुदाम्ने हरिः ।
मालूरार्कदलेन शंकर जनास्त्वां मोहयंति क्षणात्
त्वं तेषामखिलार्थमर्पयसि नो जानासि तुभ्यं नमः ॥ ८ ॥ °

Canto I. consists of 40, II. of 80, III. of 14 stanzas. It ends:

भुक्त्वा वैषयिकं सुखं कविरसौ स जातबोधस्ततो
दृश्यं स्थावरजंगमात्क(°त्मक)मिदं ज्ञात्वा प्रपंचं मृषा ।
सर्वानंदगृहं परात्परतरं श्रीराजराजेश्वरी-
रूपं ब्रह्म हृदि स्मरन् शिव[व]ने काश्यां स्थितिं निर्ममे ॥ १४ ॥

इति श्रीचित्तपावनजातीयरानडोपनामककविश्रीविश्वनाथ-कृते श्रीशंभुविलासशेषनामचाव्ये [°विलासाख्ये काव्ये I. II.] तृतीयसर्गः ॥

At the end of canto II. the date occurs: संवत् १७७६ माघसुदित्रयोदशी भौमवासरे लि° ॥ उद्धवजी नागेश ॥ [H. T. COLEBROOKE.]

3851.

1491 b. Foll. 19; size $15\frac{3}{4}$ in. by $5\frac{1}{4}$ in.; indifferent, modern Bengālī handwriting; eight lines in a page.

Rahasyāmṛita, a poem, by an unknown author, in 12 *sargas,* describing the life and adventures of *Pārvatī* in the mountains, and leading up to her marriage with *Śaṅkara.*

---

[1] यत्नमतिप्रतिष्ठः with (?) *K.*

[2] °वे or वः. [3] ?°भिनंदतः. [4] ? श्रीपतेर्.

I. (31 vv.):

या शर्वादिसुपर्वदुर्वचमहाध्यानाध्वदूरे स्थिता
सर्वाभीप्सितकल्पवल्लिरतुला दुर्वारदुःखापहा ।
चूडोल्लासितशर्वरीमणिकणाखर्वाप्यखर्वा महा-
गर्वा पर्वतसार्वभौमतनया भूयान्महाभूतये ॥

अभयापि भयातिशोभना त्रिपुरापि त्रिपुरान्तकप्रिया ।
अगजापि गजाननप्रभूर्जगतां कल्पलतास्तु भूतये ॥

प्रजापतिं दक्षमुपेक्ष्य रुष्टं
धात्री विधात्री भुवनत्रयस्य ।
गिरौ प्रजज्ञे स्थितये प्रजानां
शुभे क्षणे विश्वमहाक्षणेन ॥

दक्षाननोदीरितनाथनिन्दा
हुताशतन्मन्युहुताशनाभ्यां ।
संतापितात्मेव गुहे ऽवतारं
चकार नीहारमहीधरस्य ॥

मेनाङ्कमेलाङ्कपरार्धशोभा
मेनाङ्कमौलेर्महिषी विशाला ।
मेनाङ्ककोटीशतजित्वराभा
निनाय रूपेण विनायकाम्बा ॥

सुलोचयन्ती मधुरं नदन्ती
विधुं तुदन्ती(?नु॰) वदनाब्जकान्त्या ।
भृशं हसन्ती नगराजभार्याम्
आनन्दयामास जगत्प्रसूतिः ॥

धन्यौ धरित्रीधरदम्पती तौ
सुदुर्लभं यन्मुनिमानसानां ।
मूलप्रकृत्यां तनयेति मत्या(मत्वा)
चुचुम्बतुस्तच्चरणाम्बुजातं ॥

उद्वीक्षणोल्लासितनिर्निमेष-
नेत्राब्जतारा वसुधावतारा ।
स्वां मूर्तिमन्यां नभसीव तारां
दृष्ट्वा प्रमत्तेव जहास हृष्टा ॥

पादाङ्गुलिच्छिन्नगुणप्रलम्बि-
प्रालम्बमुक्ताः प्रचुराश्च मुक्ताः ।
भान्ति स्म तस्याश्चरणाविमुक्ता
मुक्ताफलानां फलमेतदेव ॥

सृक्कद्वयीनिःसृतलोलनाला
संपातसंपादितचारुशोभा ।
तदोपमां याति सुधा सुधारा-
द्वयी सुधांशोर्यदि पार्श्वयोः स्यात् ॥ ०

II. (47 vv.):

निरीक्ष्य तत्रातिमनोहराणि
पुष्पाणि पुष्पायुधनाशकस्य ।
स्मृत्वा विसन्नाति(?विषणा हि) मुहुर्मुमोह
संशान्त्यमाना नितरां सखीभ्यां ॥

कुमारमाता सुकुमारमूर्तिः कौमारमासाद्य मनोज्ञवेशा ।
समुल्लसच्चामरचारुकेशा खं द्योतयामास मुखेन्दुभासा ॥

III. (22 vv.):

अथेशसंदर्शनहर्षपूर्णौ
हिमाचलश्चिन्तयति स्म मौली ।
सुविस्मितः शान्तमनास्तदानीं
किमेतदत्यद्भुतमीक्ष्यहन्त(!) ॥

पुरार्जितान्युग्रतपांसि नूनं यैरम्बिका मद्भवने ऽवतीर्णा ।
तैरेव मे लोचनगोचरत्वं त्रिलोचनस्याङ्घ्रियुगं जगाम ॥

IV. (25 vv.):

पित्रा तयोक्ताद्भुतभक्तियुक्ता
मुक्तानताकारदृगम्बुधारा ।
अभुग्नरोमाञ्चसुतुङ्गिताङ्गी
ननाम शुभ्रांशुकलाकिरीटं ॥

V. (51 vv.):

अथ वीक्ष्य निरीक्षणी हतं
पतितं भूमितले कलेवरं ।
दयितस्य समाकुला सती
विललापातिरतिर्विचित्रथा(?) ॥

VI. (26 vv.):

मात्रा च तत्रागतया च पित्रा
सखीजनैश्चाप्यनुरुध्यमाना ।
न जातु सैच्छद्भवनानि गन्तुं
तपोविधानैकमना बभूव ॥

VII. (36 vv.):

अपि हिमागहिमागमदारुणे
ऽपि दधदम्बरमम्बरमुत्तरं ।
निभृतमेकपटाकपटातिगं
परिततापगतापधरामणि ॥

VIII. (25 vv.):

अथ मधुव्रतगीतिमधुश्रवः
सुमधुरो मधुमास उपागतः ।
अतिकृशां तपसा समुदीक्ष्य किं
सरसमर्चयितुं क्षितिभृत्सुतां ॥

IX. (24 vv.):

अथ समागतवान् भगवाञ्छिवः
स्फुरदुरुद्युतिदीप्ततराकृतिः ।
स्मितसुखो (°मुखो) ऽम्बरतो ऽवनिमण्डलं
दिवसनाथ इवाशु सनाथयन् ॥

X. (43 vv.):

पुनर्निमील्येक्षणयुग्ममाकुलो
विनिःश्वसन्नाह पुनर्महामुनिः ।
गिरीन्द्रजे दृष्टमिदं चराचरं
न ते वरं युक्तमहं विलोकये ॥

XI. (14 vv.):

इति ब्रुवाणे विबुधप्रधाने भक्त्यातिनम्रा हिमशैलपुत्री ।
प्रणम्य तं ब्राह्मणवर्यवेशं सगद्गदं प्राह सवाष्पनेत्रा ॥

XII. (31 vv.):

अथ दृष्ट्वा महाभाक्तां महीतलगतां प्रभुः ।
महीधरमहेन्द्रस्य तनयां मूर्छितामिव ॥
त्यक्त्वा धरामराकारं निजाकारं प्रकाशयन् ।
विरराज शिरोराजद्विजराजकलोज्ज्वलः ॥

It ends:

इति स्तुवत्यां पार्वत्यामतीव प्रेममन्थरे ।
महेश्वरे महान्नाद आसील्लोकत्रयान्तरे ॥
ततो दैवतगन्धर्वविद्याधरमहोरगाः ।
किन्नरा राक्षसा यक्षाः सिद्धाः साध्याश्च चारणाः ॥
उर्वश्याद्या नाकवेश्याश्चित्रवदित्रनिःस्वनैः ।
आश्चर्याणि स्म कुर्वन्ति महामाङ्गलिकानि च ॥
तूर्यशृङ्गमृदङ्गानां भेरीणां भूरिनिःस्वनैः ।
इतरेषां च वाद्यानां तुमुलैर्व्याप्तमम्बरं ॥
वृन्दारकर्षिब्रह्मर्षिब्रह्मघोषैः (?वृन्दराजर्षि°) समन्ततः ।
संततं ब्रह्मलोकान्तमशेषभुवनान्तरं ॥
प्रणतामुपगूह्य बाहुभिर्मुखचन्द्रं परिमार्जयन् प्रभुः ।
गिरिजामिदमाह शङ्करस्तव दासो ऽस्मि तपोबलोत्तर[:]॥
अथेश्वरः प्राह नगेन्द्रपुत्रीं
स्वयंवरं (°रे) मां वृणु पक्ष्मजाक्षि ।
साह प्रणम्याञ्जलिबद्धपाणिर्
दद्यात्पिता मामिति मे ऽभिलाषः ॥
इति रहस्यामृते महाकाव्ये द्वादशः सर्गः ॥

[H. T. Colebrooke.]

3852.

90. Foll. 55; size $10\frac{1}{4}$ in. by $3\frac{1}{4}$ in.; fair Devanāgarī writing of 1722 A.D. (?); ten lines in a page.

Bhikshāṭana-kāvya, a poem, by *Utprekshā-Vallabha*, of a partly devotional, partly erotic character, depicting the feelings and conduct of female worshippers on meeting *Śiva* going about as a religious mendicant, and after being separated from him. It begins:

श्रीगोपालाचार्याय नमः ॥ श्रीवाग्देव्यै नमः ॥
कल्याणमावहतु वः शिवयोस्तदेकं
गात्रं यदीयमसितच्छविकंठमूलं ।
वामेतरे ऽपि कुरुते [ऽ]सितभासिभागे
प्रारब्धशैलतनयापरिरंभशंकां ॥ १ ॥
सद्यस्तुषारगिरिजौषधसेवयैव
यः स्वोपभुक्तगरलं शमयांचकार ।
अन्यैरशक्यशमनाज्जननामयाद्वः
पायादपायनिलयादयमादिवैद्यः ॥ २ ॥
नित्यं करोतु भगवान्स करींद्रवक्त्रः
प्रारभ्यमाणशुभकर्मविघातलोपं ।
दोषानुषंगरहितः स शिवो ऽपि यस्य
भृंगेषु गंडतलचुंबिषु साभ्यसूयः ॥ ३ ॥
कार्श्यं क्षिणोतु भवतां परमेश्वरस्य
भिक्षाटनं तदनु संहितदेहिशब्दं ।
यन्मानिनामपि विधेर्विपरीतभावे
याच्ञोक्तिदैन्यसहमेव मनश्चकार ॥ ४ ॥
वाल्मीकिरस्तु विजयी प्रथमः कवीनां
तस्यानुसारसरलः स च कालिदासः ।
अन्ये भवंतु जयिनः कवयो ऽथ मा (?ऽप्यमी) वा
येषां कृतः कृतिषु नैव मयावगाहः ॥ ५ ॥
कामं खलास्तिलकयंतु चिराय भूमीं
यत्संभवो बहुमतः सुजनेषु हेतुः ।
घोरेषु घर्मादिव दिवसेष्वतिलंघितेषु
छायाद्रुमान्मृगयते न हि को ऽपि मर्त्यः ॥ ६ ॥ °१० ॥
भूत्वा चिरेण गलिताः कति नाम संतः
पृथ्वीश्वराश्च कति नाम तथेतरे ऽपि ।
अद्यापि कीर्तिवपुषा कवयः पृथिव्यां
जीवंति तेषु विहितस्तुतयो ऽथ वा तैः ॥ ११ ॥

ताः मूक्तयः कविजनस्य दुरुक्तयो ऽन्याः
 कर्णागतासु विदुषां नयनं न यासु ।
श्रोत्रं कृतार्थमभवन्न तथाहमस्मी-
 त्यानंदबाष्पमिषतो रुदति क्षणेन ॥ १२ ॥

संत्येव सूक्तिरसिका बहवो मनुष्याः
 स्वर्गौकसो न वसुधारमनिर्वृताश्च ।
तौ दुर्लभौ कविवचःस्खलितस्य सोढा
 मर्त्येषु सागरगरस्य च यः सुरेषु ॥ १३ ॥ ° १५ ॥

नापेक्षते महदपि प्रथमानदोषं
 निर्दोषमल्पमपि निंदति(?°भिनंदति) वस्तु लोकः ।
मूर्ध्ना बिभर्ति कृशमप्यनिशं सुधांशुम्
 ईशः कलंकरहितं न तु पूर्णचंद्रं ॥ १६ ॥

वृत्तं वसंततिलकं विषयः शिवस्य
 भिक्षाटनं कविरहो शिवभक्तदासः ।
शृंगार एव हि रसस्तदिह प्रबंधे
 श्रद्धा न कस्य यदि सूक्तिविनोदशीलः ॥१७॥ °२०॥

बाणैः शिवार्चनविधौ मम बाणवाचं
 कादंबरीकृतिचमत्कृतिमप्युदारां ।
उत्प्रेक्षया जगति वल्लभकीर्तिमस्मिन्
 भिक्षाटने तिलकयंतु कवींद्रचंद्राः ॥ २१ ॥

इत्युत्प्रेक्षावल्लभस्य कृतौ भिक्षाटने महाकाव्ये मुखपद्धतिः प्रथमा ॥

भिक्षाटनेन पुरुहूतपुरांगनानाम्
 आकस्मिकोत्सवविधायिनि चंद्रमौलौ ।
तासामनंगशरजर्जरमानसानां
 नानाविधानि चरितानि वयं वदामः ॥ १ ॥

रथ्यागतस्य गिरिशस्य विलोकनाय
 निर्गंतुकाममनसो वनिता गृहेभ्यः ।
नैजाभिरूप्यगुणदर्शितपौनरुक्त्यम्
 आचार इत्यभिमतं परिकर्म चक्रुः ॥ २ ॥ °

The work, composed throughout in the *vasantatilaka* metre, consists of 42 sections, viz.: 1. *mukhapaddhati* (21 verses); 2. *maṇḍanapaddhati* (26 vv.); 3. *maṇḍananishedhap.* (19 vv.); 4. *nirgamanap.* (18 vv.); 5. *sambhramap.* (15 vv.); 6. *nirgamanoktip.* (20 vv.); 7. *lajjāpanayanap.* (15 vv.); 8. *śivadarśanap.* (22 vv.); 9. *śivāṅgavarṇanap.* (18 vv.); 10. *vilāsap.* (19 vv.); 11. *vilāsoktipratyuktip.* (20 vv.); 12. *bhikshāpradānap.* (31 vv.); 13. *uktipratyuktip.* (19 vv.); 14. *pāravaśyap.* (22 vv.); 15. *pāravaśyoktip.* (20 vv.); 16. *īśvaropālambhap.* (16 vv.); 17. *praśnoktip.* (13 vv.); 18. *śivānusaraṇap.* (17 vv.); 19. *śikshāp.* (16 vv.); 20. *vanitāvīthīcaraṇap.* (17 vv.); 21. *śivacaritopālambhap.* (17 vv.); 22. *gṛihapraveśap.* (20 vv.); 23. *bandhuvacanap.* (18 vv.); 24. *anurāgap.* (16 vv.); 25. *śikshopālambhap.* (18 vv.); 26. *virahāvasthāp.* (17 vv.); 27. *matibhedap.* (10 vv.); 28. *udyānap.* (19 vv.); 29. *udyānoktip.* (14 vv.); 30. *śiśiropacārap.* (13 vv.); 31. *sakhyupālambhap.* (12 vv.); 32. *gaurīpradoshacaritap.* (24 vv.); 33. *pradoshoktip.* (22 vv.); 34. *candrodayacaritap.* (17 vv.); 35. *candrodayoktip.* (20 vv.); 36. *dūtīpreshaṇap.* (22 vv.); 37. *dūtīvacanap.* (26 vv.); 38. *rajanīyāpanap.* (22 vv.); 39. *janīyāpanoktip.* (15 vv.); 40. *nidrāp.* (15 vv.); 41. *svapnoktip.* (22 vv.); 42. *gaurīsambhogasaubhāgyavarṇanap.* (18 vv.). It onds:

सा राजते जगति शैलसुता वधूनां
 या जायते हरगलग्रहणोत्सवेषु ।
आनंदनिर्भयतया मुकुलीकृताक्षी
 मोहं गतेव गरलस्य महोष्मणेव ॥ १७ ॥

तप्तं तयैव हि तपो गिरिराजपुत्र्या
 यस्या विहारमये[न] परमेश्वरेण ।
हस्तग्रहो न मनसैव कृतः कृतो ऽभूद्
 अस्माधिपो(?) रणमुखाचरावलंबः ॥ १८ ॥

इति श्रीमहाकविशिरोरत्नोत्प्रेक्षावल्लभकृतौ भिक्षाटने महाकाव्ये गौरीसंभोगसौभाग्यवर्णनपद्धतिर्द्वाचत्वारिंशत्तमी ॥ भिक्षाटनं काव्यं समाप्तमिति ॥

वैकुंठाधिपबाहुवेदरसभूनिर्व्यू[ह]वर्षे शुभे
 मार्गे शुक्लदले महेश्वरतिथौ माहेश्वरो ऽलीलिखत् ।
गोपालिर्गुणपालिशालिभवनं भिक्षाटनं कौतु[कात्]
 काव्यं काव्यविदां सुखाय सुधियां श्रीरामकृष्णः कृतौ ॥
गोपालाचार्यचरणावरणं करवामहे ।
याभ्यां प्रसक्तियुक्ताभ्यां भुवनं भासते ऽखिलं ॥ °

For a fragment of this work, see Weber, Berl. Cat., no. 594. [H. T. Colebrooke.]

3853.

1177 g. Foll. 20 (the 1st of which is wanting); size 13½ in. by 4½ in.; fair, modern Bengālī handwriting; eight lines in a page.

Haravilāsa (-ākhyāna), a poem, in 8 *sargas*, on the marriage of *Hara-Śiva* and *Pārvatī*; by *Kaviśekhara* (? son of the physician *Yaśaścandra*).

The MS. begins in the middle of a verse:

पि चेतसा मतुरः प्रचलितुं पताकया ॥
सर्वतो निरवकाशमन्वये(?°ये) गच्छतां दिविषदां रथावली ।
नेमिपिष्टमतनिष्ट दिङ्मुखे मेघजालमतिजर्जरं रजः ॥

II. begins:

ततः प्रभाते प्रतिपन्नरागा
व्यलोकि पूर्वापि जनैरपूर्वा ।
अनुत्थिते भास्वति नाकनद्याः
सरोजिनीव प्रथमं प्रबद्धा (प्रबुद्धा) ॥

III. ज्वलनोलुपतनु(?) भानुमान्
इति पूर्वं समशायि दूरतः ।
सविधोपगतो हिमाद्रिणा
धृतवीणो निरणायि नारदः ॥

IV. सेनयान्वितमथाप स हर्म्यं
साधिदैवतमिवाधिकरम्यं ।
आततोन्नमवितानमजस्रं
स्वागतामरपुरं त्रिसहस्रं ॥

V. अथ हरं हरितांपतियोषितः
स्नपयितुं वरदं वरमाययुः ।
क्वणितकाञ्चनकाञ्चिमनोहरं
हरपुरं प्रतिशिञ्जितनूपुरं ॥

VI. अनन्तरं ताः सकलाः सुरस्त्रियस्
त्रपावतीं हैमवतीं सविस्मयं ।
विलोकयन्तीरभिवीक्ष्य सस्मितं
वचो वभाषे सरसं सरस्वती ॥

VII. ततः कान्ततमः पान्थजनाश्रितजनाश्रयः ।
सर्वतः शान्तसंतापो दिनान्तः समपद्यत ॥

VIII. अथाग्रतस्तस्य गजेषु संस्थिता
द्वयोर्द्वयोरन्तरगाः पताकयोः ।
विचित्रविस्तीर्णकुथेषु डिण्डिमान्
अवादयन्कुन्तलतुण्डताण्डवैः ॥

It ends:

जगत्त्रयीसुन्दरमेकमासनं
मिथो निबद्धाञ्चलमास्थितं तदा ।
पुरो ऽङ्गनानां मिथुनं प्रदीपकैर्
हिमाद्रिजाया निरराज यन्मुहुः ॥

वरांजनीराजनया तयोर्द्वयं
प्रदीपकैः कल्पितमाद्रिजायया ।
समुन्नमय्यानमितैर्मुहुर्मुहुः
पुरः पुरो नर्तितपाणिपल्लवं ॥

इति कृतवहुमङ्गलं विवाह्य
प्रमुखपतिं धरणीधरेन्द्रकन्यां ।
प्रतिययुरमरस्त्रियः समस्तास्
त्रिदशगणाश्च यथायथं गृहेषु ॥

येन श्रीकविशेखरेण विदिताद्विद्यासु वैद्यान्वये
संजज्ञे जगतीप्रकाशकयशश्चन्द्राद्यशश्चन्द्रतः ।
तस्यायं कृतिनः कृतौ हरिविलासाख्यानमव्ये महा-
काव्ये भर्गविवाहवर्णनविधौ सर्गो जगामाष्टमः ॥

इति हरविलासाख्यकाव्यं समाप्तं ॥

The last verse occurs, *mutatis mutandis*, at the end of each canto.

[H. T. Colebrooke.]

3854.

2531 b. Foll. 9; size 10¼ in. by 4½ in.; well written in the Jaina type of Devanāgarī; thirteen lines in a page.

Khaṇḍapraśasti, a poem in honour of *Vishṇu's* ten incarnations. [A.]

The text, as well as the order of verses, differs greatly in different versions. Editions have been published in the Paṇḍit, vols. v., vi. (129 verses; Benares, 1870-71); and at Bombay (1860; 183 verses).

It begins: 1. उत्फुल्लामल° (Paṇḍ., 52; Bo., 64). 2. ये मज्जंति (53; 67). 3. श्रीराम (54; 67). 4. राम त्वत्तरुण° (55; 68). 5. कीर्तिश्रीरघुवंशरत्ने (56; 69). 6. कीर्तिश्रीरघुवंशदीपे (57; 70). 7.

गंगो(य)त्पसिता ° (61; 74). 8. सत्पुक्री ° (64; 77). 9. चिंता गंभीर ° (75; 79). 10. संग्रामांगण ° (66; 82); etc.

This version has 135 stanzas, the last three being: 133. भ्राम्यन्मंदरकंदरोदरपरिस्थावृत्तिभिर्वारिधेः °. 134. रेतोरक्तमयान्यमूनि ° (P., 128; B., 180). 135. प्रेंखद्वाजितरंगम् ° (P., 129; B., 181).

Colophon: इति षंडप्रशस्ते महाकाव्यानि ॥ ° संवत् १६४१ संवत्सरे लेखि ॥

Cf. Aufrecht, Cat. Bodl.; the first three verses of which MS. occur as 55, 56, 44 in MS. A; as 39, 40, 27 in MS. B; as 10, 12, 13 in MS. C; as 4, 5, 6 in ed. Bomb.; and as 2*b*, 3, 4 in *P*. [GAIKAWAR.]

3855.

2531c. Foll. 6, the last but one of which is wanting; size 10 in. by 4¼ in.; well written, in the Jaina type of Devanāgarī, c. 1500 A.D.; 16 or 17 lines in a page.

Khaṇḍapraśasti. [B.]

Stanzas 1–6 as above. 7. अब्दैर्वारिजिघृक्षया ° (*P.*, 58; B., 71). 8. शत्रुघ्न ° (59; 72). 9. स्थाणुः कूर्मो ° (60; 73). 10. गंगोयत्प ° (61; 74); etc. The last three as above.

The missing leaf contained stanzas 92–115.

Colophon: इति खंडप्रशस्तिकवित्वानि ॥ [GAIKAWAR.]

3856.

1996. Foll. 30; size 8¾ in. by 4 in.; fair, modern Devanāgarī writing, on coarse paper; eight lines in a page.

Khaṇḍapraśasti, here ascribed to *Hanumat.* [C.]

It begins: 1. कृतक्रोधे (*P.*, 1; B., 1). 2. सर्वैर्मंगल्यनादैर ° (*P.* ? B. ?). 3. लक्ष्म्याधारांतचारी (*P.* ? B. ?). 4. सर्वा(सूक्ष्म marg.)सर्वांगयष्टिः (*P.* ? B. ?). 5. सुग्रीवे प्यग्रजीवे (*P.* ? B. ?). 6. तन्वन्यो ऽनल्पतन्वा (*P.* ? B. ?). 7. मध्ये कर्णं विलोने (*P.* ? B. ?). 8. हिंसं रक्षोबलं (*P.* ? B. ?). 9. पद्मो पद्माधिवासो (*P.* ? B. ?). 10. चंद्रादित्योरुनेत्रः (*P.*, 2*b*; B., 4).

It ends: 172. प्रेंखद्वाजितरंगं (*P.*, 129; B., 181). 173. आरुह्याश्वं च शुभ्रं (*P.* ? B., 182). 174. प्रस्थातो मथुरापुरि (*P.* ? B., 183).

Colophon: इति श्रीमद्धनुमद्विरचिता खंडप्रशस्तिः समाप्ता ॥ [DR. JOHN TAYLOR.]

3857.

180. Foll. 84; size 13 in. by 4¾ in.; fair Devanāgarī writing of 1807 A.D.; nine lines in a page.

Mādhavānanda, a poem on *Kṛishṇa-Vishṇu*, in 12 (?) cantos, by *Nanda Paṇḍita*, son of *Rāma Paṇḍita*.

It begins:

लक्ष्मीशृंगारपूरत्रिपुरहरपुरीवासिभक्तानुराग-
प्रोद्यद्विंदुभक्त्या हितविमलतपोराशिभिर्निर्गुणस्य ।
त्रैगुण्येनैव पद्मापरिणयनकृते चित्तचक्षुर्गिरा यत्
ग्राह्यं प्राकाशिरूपं तदिह भवतु वो भूतये माधवस्य ॥ १ ॥

स्वसारूप्यं तुष्टो वितरसि हरे त्वं स्वभजनात्
तदेतद्वित्वाहं सकलमपि याचे लघुपदं ।
स्वजिह्वासारूप्यं वितररसनायां मम यतः
प्रबंधत्वत्केलिं भवति खलु सामर्थ्यमतुलं ॥ २ ॥

शृंगारभक्तियमुनासुरसिंधुयोगे
काव्ये ऽवगाहनममी सुधियो विधाय ।
श्रीबिंदुमाधववितीर्णपुमर्थसार्थ-
सिद्धा प्रयागफलमत्र समाप्नुवंति ॥ ३ ॥

दूरीकरोति दुरितानि गिरा नराणां
नामानुकीर्तिसमुदारमुदा यदीयं ।
प्रत्यंगमस्य महिमानमुपाश्रयंतीं
किं पावयिष्यति हरिर्न गिरं मदीयां ॥ ४ ॥

अस्ति प्रशस्तैर्विभवैः समस्तैः
समस्तभूमंडलमंडनं सा ।
वाराणसी नाम पुरी पुरारेः
मुदे मुरारेरपि या दिवो ऽपि(?स्ति) ॥ ५ ॥ °

I. *bhagavatprādurbhāva,* 86 (? 90) verses, ends fol. 6*b*; II. *surasamudrasaṃvāda,* 126 vv., fol. 15*a*; III. *harigurusamāgamana,* 85 vv. (numbered 1–40, 4–48), fol. 22*a*; IV. *śrīvarṇanam,* 124 vv., fol. 30*a*; V. *śrīvirahavarṇanam,* 120 vv., fol. 40*b*; VI. *dūtābhigamavarṇanam,* 81 vv., fol. 45*a*; VII. *dvāravatīpraveśavarṇanam,* 94 vv., fol. 50*a*; VIII. *śrīvivāhavarṇanam,* 79 vv., fol. 55*b*; IX. *bhojanavarṇanam,* 102 vv., fol. 63*a*; X. *svapurapratyāgama,* 100 vv., fol. 68*b*; XI. *śrīsuratavarṇanam,* 95 vv., fol. 73*b*; XII. *mādhavāhnikavarṇanam,* 120 vv., fol. 83*b*. Cantos VII.–XII. are numbered 5–10.

It ends:

प्रातर्दंतक्षतेनाधरविकृतिधरश्चित्रगात्रो नखांकैर्
जृंभारंभाभिरामो नयनविवशतां वर्णयन् जागरेण ।
किंचिच्छेषांगरागो निधुवनविजयेनाभिनंदन् रतीशं
लक्ष्मीसंभोगतृप्तो वितरतु भगवान्माधवो मंगलानि ॥११९॥

वेलावारितमंडलाखिलमहीधर्माधिकाराग्रणीर्
विख्यातो भुवि रामपंडित इति प्रत्यक्षवाचस्पतिः ।
तत्सूनोरिह नंदपंडितकवेः काव्ये कृतौ माधवा-
नंदे श्रीपरिणीतिके ऽत्र दशमः(!) सर्गो ऽगमत्पूर्णतां ॥१२०॥

इति श्रीधर्माधिकारिकुलतिलकश्रीमन्महीपतिपंडितान्वयप्रसूतश्रीरामपंडितात्मजनंदपंडितकृतौ माधवानंदे महाकाव्ये माधवाह्निकवर्णनो नाम दशमः सर्गः ॥

[H. T. Colebrooke.]

3858.

2420a. Foll. 27 (numbered 29; nos. 4 and 5 being passed over); size 8¼ in. by 4 in.; fair Devanāgarī writing of 1701 A.D.; 9–12 lines in a page.

Harivilāsa mahākāvya, a poem, in 5 *sargas,* on the life of *Kṛishṇa* from his childhood to his slaying the demon *Kaṃsa;* composed, by *Lolimbarāja kavicakravartin,* for king *Harihara,* son of *Sūryapaṇḍita.*

It begins:

रचयति सहसा यच्चित्रमेतत्प्रपंचं
प्रशमयति च तद्वत्केनचित्कौतुकेन ।
अविदितमपरैस्तच्चंडमुंडादिनाना-
दनुजदलनदक्षं शर्वसर्वस्वमव्यात् ॥ १ ॥

Printed in the *Paṇḍit,* vol. ii., pp. 79–86.

It ends:

नानागुणैरवनिमंडलमंडनस्य
श्रीसूर्यसूनुहरिभूमिभुजो नियोगात् ।
त्रैलोक्यकौतुककरं क्रियते स्म काव्यं
लोलिंबराजकविना कविनायकेन ॥ ५५ ॥
काव्यं हरिविलासाख्यं ये पठिष्यंति केचन ।
तेभ्यः श्रीहरिरत्रैव द्रव्यं दास्यति दैन्यहन् ॥ ५६ ॥

In the edition neither this verse is given, nor another added in the margin, and likewise counted 56:

श्रीमान्कामरसो [ऽ]भव[द्] द्विजकुलालंकारचूडामणिर्
गंगानिर्मलमौनभार्गवकुले तस्माद्रसो(? °दसौ) पंडितः ।
अस्य(? आसीत्तस्य) सुतः सुरत्नसुकृतं चिह्नांबिकायां ततो
लेभे श्रीहरिनामरत्नमवनीमध्ये तदास्तां चिरं ॥ ५६ ॥

इति श्रीमत्सूर्यपंडितकुलालंकारहरिहरमहाराजाधिराजोद्योजितलोलिंबराजविरचिते हरिविलासे महाकाव्ये कंसवधो नाम पंचमः सर्गः समाप्तः ॥ संवत् १७५८ वर्षे फाल्गुनवदि १४ सोमे स्तंभतीर्थवासिना देवकृष्णसुतनंदरामेण लिखितं परोपकाराय शिवरामस्यार्थे च भूयात्° लि° राजनगरस्थितेन ॥

[Gaikawar.]

3859.

702a. Foll. 30; size 9½ in. by 4 in.; clear Devanāgarī writing of 1635 A.D.; ten lines in a page.

Pārijātaharaṇa-vivaraṇa, an anonymous commentary on the *Pārijātaharaṇa,* a poem in 3 *āśvāsa,* by *Nārāyaṇa Paṇḍita,* son of *Trivikramācārya.*

The subject of the poem is the well-known incident of *Kṛishṇa's* seizing the *Pārijāta* tree in *Indra's* paradise and carrying it off to Vaikuṇṭha.

It begins:

श्रीमन्नारायणप्रज्ञं नत्वा व्याख्यां करोम्यहम् ।
श्रीपारिजातहरणकाव्यराजस्य लेशतः ॥

वंद इति ॥ अहं तं पुरुषोत्तमं वंद इत्यन्वयः । अनंतं निरवधिकं धाम तेजो दधतं । त्रीणि धामानि मंदिराणि अनंतासनश्वेतद्वीपवैकुंठाख्यानि यस्येति त्रिधामानं । युतवसुधामानं तं युताः धरणीरमा नागेंद्रा येनेति । यो ऽमान्मानरहितः माङ् माने । दैत्यानामसुराणां युधा युद्धेनांतं नाशं व्यधाच्चकार ॥ १ ॥ गौरिति ॥ ०

The second leaf of a MS. of the original text (marked पारि॰ हर॰), containing I. 7–18, has been inserted between foll. 1 and 2 of this MS.

Verses 7 and 8 of the text and commentary run thus:

अथ नानाभोगानां
पदे यदुपुरे ऽवसद्घनाभोगानां ।
लसति घनानाभो गानां (r. घनाभो गानान्)
नाके द्वेष्टेव पद्मनाभो ऽगानां ॥ ७ ॥

पद्मनाभः श्रीकृष्णो घनाभो मेघवर्णः यदुपुरे यादवनगरे द्वारकाख्ये नानाभोगानां चंदनकस्तूरिकाकुंकुमादीनां घनाभोगानां(ध॰) घनानां(ध॰) द्रव्याणामाभोगः परिपूर्णता येषु तेषां पदे स्थाने गानाद्गीताल्लसति विराजति अवसदुवास । इत्थंभूतलक्षणे नाके स्वर्गे । अगानां पर्वतानां द्वेष्टा शत्रुरिंद्र इव ॥ ७ ॥

देवनिकायानामभ्यर्थनया
यो ऽजनि स्वकाया (॰यो) नाम ।
गौः स्थिरकायानामघाख्यै
यस्यारुजो ऽधिकाया नाम ॥ ८ ॥

यो देवनिकायानां सुरनिकाराणां स्वकायः गौः अरिभ्यो ऽभय वै (!) इति वचनात् स्थिरकायानां दृढशरीराणामभ्यर्थनया प्रार्थनेनाजनि अवततार । नाम यस्य नामापि अधिकायाः महत्या अरुजो योगादितरस्याः सुखावस्थितेराख्यै प्रासत्त्यै (? आ॰) स्यात् ॥ ८ ॥

It ends:

निजे इति । सुनंदनंदनंदकः सुनंदो नंदश्चैतौ द्वौ गोपौ तौ नंदयति सुखयतीति ॰ ॥ ७१ ॥

पारिजातहरणाख्यकाव्यराट्
पारिजातमवलंब्य नूतना ।
राजते विवरणाख्यसल्लता-
लालितासु पदपल्लवे श्रिया ॥ १ ॥

इति श्रीमत्कविकुलतिलकश्रीमत्त्रिविक्रमाचार्यसुतनारायणपंडितविरचितस्य पारिजातहरणाख्यकाव्यस्य विवरणे तृतीय आश्वासः ॥

शाके नगेषुशरचन्द्रमिते नभस्ये
मासे सिते दल उमेशतिथौ कुजाहे ।
चिंतामणिर्बुधवरो व्यलिखद्विधिज्ञः
श्रीपारिजातहरणाभिधकाव्यटीकाम् ॥

श्रीमद्गोविन्दज्योतिर्विद्तनुजस्य चिन्तामणेः पुस्तकमेतत् ॥ ग्रंथसंख्या ७०० ॥

[H. T. COLEBROOKE.]

3860.

2229. Foll. 32 (of which fol. 31 is lost); size 9¼ in. by 5¼ in.; good Devanāgarī writing of about 1750 A.D.; nine lines in a page.

Gītagovinda, a lyric-dramatic poem, in 12 *sargas,* by *Jayadeva,* son of *Bhojadeva* and *Vāmadevī.*[1]

Published by Ch. Lassen (with Latin transl., Bonn, 1837), and frequently in India.

Translated into English (in part or whole) by Sir W. Jones, As. Res., iii., p. 8 seqq.; Sir E. Arnold, Col. Ouvry, etc.

Occasional glosses, mainly taken from *Nārāyaṇa Paṇḍita's* commentary, have been added in the margin.

[R. JOHNSON.]

3861.

2238d. Foll. 43 (of which fol. 40 is lost); size 5¼ in. by 4 in.; good, clear Devanāgarī writing (of the Jaina type) of about 1600 A.D.; nine lines in a page.

Gītagovinda. Cod. B in Lassen's Proleg. Gitagov., p. xii.

[GAIKAWAR.]

---

[1] Thus also Calc. ed., whilst Haeberlin and Jībānanda make the name *Rāmādevī.*

3862.

2789. Foll. 51; size 9 in. by 11 in.; excellent, large Devanāgarī writing; nine lines in a page.

Gītagovinda.

The MS. was copied by *Lālā Mahtāb Rāy.*

[Coll. of Fort William.]

3863.

2806. Foll. 27; 4to, size 9 in. by 7 in.; the same writing as last MS.; fifteen lines in a page.

The same work. [Sir Charles Wilkins.]

3864.

2933. Foll. 89; size $11\frac{3}{4}$ in. by 6 in.; large, modern Devanāgarī writing; five lines in a page.

The same work. The MS. was perhaps written in Kaśmīr. [?]

3865.

2314 c. Foll. 4; size $11\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; modern Bengālī handwriting; eleven lines in a page.

Fragment of the *Gītagovinda*, terminating at *sarga* II., verse 11. [R. Johnson.]

3866.

994 a. Foll. 42; size $13\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; good Bengālī writing of 1720 A.D.; 7–13 lines in a page.

Gītagovinda, with a commentary called *Bālabodhinī*—ascribed (though not in this MS.) to *Caitanyadāsa*, or (? as he is also called) *Pūjāri Gosvāmin*—written round the text. [A.]

The commentary is described (from Sir W. Jones's MS.) by Lassen, Proleg. Gītag., p. xii. It has since been repeatedly printed in India.

It begins in this MS.:

श्रीलकृष्णकृपासीधुकणोन्मत्तेन[1] केनचित् ।
टीका संगृह्यते गीतगोविन्दस्य समासतः ॥
स्वयं बोद्धुमभिप्रायं जयदेवमहामतेः ।
क्रमेणोपक्रमादेषा ग्रथ्यते बालबोधिनी ॥

अत्र व्याकरणादीनां ग्रन्थबाहुल्यभीतितः ।
विवृतिर्न कृता सा तु ज्ञेया ग्रन्थान्तरे बुधैः ॥
वक्तव्यो[2] बालबोधिन्यां शब्दार्थः शब्दवेदिभिः ।
भावार्थदीपिकायां च भावो भावार्थलोलुपैः ॥

The author does not again mention the *Bhāvārthadīpikā*, composed by himself(?); nor does he seem to refer to any other authorities except *Viśva* (VII. 21; XI. 3, 25) and *Hārāvalī* (XI. 20).

It ends:

यद्वत्स्वबालमुग्धोक्तौ पित्रा प्रीतिरवाप्यते ।
तद्वत् श्रीकृष्णचैतन्यः प्रीयतामत्र जल्पितैः[3] ॥

To which ed. Calc., 1873 (not 1881), adds the verse[4]:

गोविन्दपादसेवायाः प्रभावादुदिता स्वयं ।
चैतन्यदासतो बालबोधिनी स्यात्सतां मुदे ॥

In some editions, on the other hand, the work is ascribed to *Pūjāri Gosvāmin*; in the one consulted (Calc. 1881) this being, however, done only on the title-page, not in the colophons.

The copyist's name is *Siddheśvara Śarman.*

[H. T. Colebrooke.]

---

[1] श्रीचैतन्य° B; eds. [2] बोद्धव्यो v. l. eds.
[3] °ते v. l. eds.
[4] The lithographed Agra edition of 1870 reads:
श्रीगोविंदपादसेवाप्रभावादुदितां स्वयं ।
चैतन्यदासेन बालबोधनी स्यात्सतां मुदे ॥

3867.

1184 h. Foll. 35; size 13¼ in. by 4¾ in.; modern Bengālī handwriting; six lines in a page.

Bālabodhinī. A fragment reaching as far as *sarga* VII., verse 25.

Notes, in Bengālī and Devanāgarī writing on the fly-leaf, make it the work of *Pūjāri.*

[H. T. COLEBROOKE.]

3868.

2672. Foll. 100; size 11 in. by 5 in.; fairly good Devanāgarī writing of 1771 A.D.; 8–13 lines in a page.

Gītagovinda, with a commentary, entitled *Rasamañjarī,* by *Śaṅkara Miśra,* son of *Dineśvara Miśra.*

The commentary was composed by order of *Śālinātha,* who stood in some relation or other (? as *Divan*) to *Hariśaṅkara* of Kāśivāra, a descendant of *Krishṇa Miśra,* author of the *Prabodhacandrodaya.*

The commentary begins:

पूर्वं प्रस्थितमुत्सुकेन मनसा तस्याः पदाम्भोरुहं
पश्चादेकमगान्निकुंजपदवीं शंकाशतैर्मत्परं ।
प्राप्ते चाथ तदीयकर्णविवरं कंसारिवंशो(°शे) रवे[:]
प्रस्थातुं पथि राधिकाचरणयोर्जीयादहंपूर्विका ॥ १ ॥

जागर्ति स्मरवैरिपत्तनमधि क्षोणीशिरोभूषणं
देशः श्रीकशिवार इत्यभिहितः स्फीतो गुणैरुज्ज्वलैः ।
वंशस्तत्र चकास्ति गोतममुनेर्विख्यातकीर्तिप्रजो
यत्र ब्रह्मविदाविरास सुकृती श्रीकृष्णमिश्रः कृती ॥२॥

श्रीकृष्णमिश्रः कतमेन वर्ण्यतां
तपोभिराविष्कृतवान्य ईश्वरं ।
व्यनक्ति यच्छास्त्रकवित्वकौशलं
प्रबोधचंद्रोदयनाम नाटकं ॥ ३ ॥

तस्यैवास कुले सतेजसुकृती संतोष्य ढिल्लीपतिं
यो दुष्टानयमार्ज्यराज्यमकृत श्रीकाशिवारे चिरं ।
येनोन्मार्गगतान्विनेतुममलब्रह्मण्यभाजो ऽप्यलं
धात्री वृत्तिरसिञ्चि(?)भार्गवकृपद्रोणादिपृथ्वी ततः॥४॥

अक्रूरोद्धवदयितो दानवदमनप्रियो नित्यं ।
तस्मादपरः कमलापतिरिव कमलापतिर्जातः ॥ ५ ॥

जातः श्रीहरसिंहदेवसुकृती तस्यात्मजो यो यशः
कुन्देन्दुप्रतिमं ततान नपनः(?) शश्वत्प्रजापालनैः ।
समामन्तगुणोपवर्णनविधौ (? मत्सा°) यत्पौरुषं मन्त्रतं
ढिल्लीशः स्वयमेव संसदि निजे सश्लाघ्यमाख्यातवान्
[(? सश्लाघ°) ॥ ६ ॥

तनूजस्तस्यासीज्जगति विदितश्छीतम इति
स्थिता ब्रह्मण्यानां सदसि पुरतो यस्य गणना ।
सदा सर्पिःपूरप्लपितमृदुमिष्टान्ननिचय-
प्रदानैर्विप्रेभ्यः सुकृतविनयं यः समचिनोत् ॥ ७ ॥

अमुष्य हरिशंकरो गुणकदंबरत्नाकरो
बभूव तनयः स्फुरद्विततपुण्यकीर्तिव्रजः ।
किमस्य बहु वर्ण्यतां यदवनीमुराराधनाद्
उरुक्रमकृपाफलं जयति शालिनाथः सुतः ॥ ८ ॥

सो ऽयं सर्वमहीसुपर्वमुकुट[:] श्रीशालिनाथः सदा
जीयात्संस्पृहयन्ति यस्य चरितायोल्लासपूर्वं नृपाः ।
यस्मिन्दातरि कर्णशोकमजहाद्वर्वी(°दुर्वी)रणस्ताश्चति(?)
प्रामुञ्चत्पृथुपार्थसार्थविहरत्क्लेशानशेषानपि(?) ॥ ९ ॥

औदार्यं यदि नैव सौर्यमुभयं(शौ°) तत्रैव गंभीरता
न(? नो) सत्त्वेन गुणज्ञता तदखिलेन प्रश्रयाद्या गुणाः ।
इत्येकत्र गुणानिमानकलयद्यस्योपमानाकुलं
चेतो ऽभूत्कविताभृता सृपपति(!) श्रीशालिनाथः
[कृती ॥ १० ॥

तस्याज्ञया गुणज्ञस्य शंकरेण सुबोधिनी ।
गीतगोविन्दटीकेयं रच्यते रसमञ्जरी ॥ ११ ॥

शृंगारः श्रुतिनिस्पृहः किमधिकं तर्को ऽप्ययं कर्कशो
वेदान्तोशमशालिना समुचिता मीमांसया चात्र किं ।
आस्ते भावरसाश्रितः प्रतिपदं व्याख्याविशेषो ऽत्र चेत्
तेनैवानुमिनोतु सज्जनगणो विद्यासु मे कौशलं ॥१२॥

इह खलु निर्विघ्नप्रारिप्सितसमाप्त्यर्थमेतत्काव्यप्रतिपाद्यराधामाधवकेलिस्मरणरूपं मंगलमादावाचरति । मेघैरित्यादि । °

It ends:

एतत्काव्यविवेचनप्रणयिना यत्संशयोन्मूलनात्
पुण्यं यच्च हरिस्मृतेः प्रतिपदव्याख्यासु मे संचितम् ।
तेन प्रीतमनास्तनोतु सततं श्रेयो मम श्रीपतिः
शश्वद्विद्वदशोच्युतप्रतिभुवः श्रीशालिनाथस्य च ॥

इति श्रीमहामहोपाध्यायदिनेश्वरमिश्रात्मजमहामहोपाध्यायशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां गीतगोविंदटीकायां रसमंजरीनामधेयायां द्वादशसर्गव्याख्यानं समाप्तं ॥ ० संवत् १८२८ ॥

The commentary is given in the *Nirṇayasāgara* edition of the poem (Bombay 1899), with two different introductory verses. For another MS., without any such verses, see Bhandarkar, Lists of Sansk. MSS., 1893, pt. i., p. 134. [Sir Charles Wilkins.]

3869.

3158 a. Foll. 23; folio, size 17 in. by 10½ in.; clear, modern Devanāgarī writing; European paper; 21–23 lines in a page.

Gītagovinda, with *Śaṅkara Miśra's Rasamañjarī*; from the beginning to iv. 16 (foll. 1–45*a* of the preceding MS.).

This MS. omits the introductory verses. Two additional leaves at the end contain an index of the metres used in the poem.

[H. T. Colebrooke.]

3870.

2811. Foll. 65; size 11 in. by 6¼ in.; good, clear Devanāgarī writing of the latter part of the last, or the beginning of the present, century; 11–15 lines in a page.

Gītagovinda, with a commentary, entitled *Padabhāvārthacandrikā*, by *Miśra Śrīkānta bhaṭṭācārya*.

It begins:

समस्तगोपसुंदरीविलासरासमंडितः ।
वरोतु(करोतु) भावुकं मधौ मनोजमानहा हरिः ॥ १ ॥
गीतगोविंदटीकेयं पदभावार्थचंद्रिका ।
महदाज्ञाकृतारंभसाहसेति वितन्यते ॥ २ ॥
नोदाहरंति विशदाः सुरतानीकसागरम् ।
इति श्रीपरमानंदरतिवर्णनमीर्यते ॥ ३ ॥

अथैतत्काव्यस्य द्वादशसर्गीयस्य निर्विघ्नसमाप्त्यर्थं परमाभीष्टदेवताराधामाधवस्मरणलक्षणं मंगलमादावाचरति । मेघैरित्यादिना । ०

As regards the commentary itself, it is practically identical with *Śaṅkara Miśra's Rasamañjarī*, the difference between them being such as commonly occurs between two MSS. of the same work rather than between two different works. Unless the authors' names are merely intended as variations of the same name, one of the two commentators has palmed off the other's work as his own.

It ends with the same verse as MS. 2672 (no. 3868), the last *pāda*, however, here running thus: शश्वन्मंगलमातनोत्वपि सतां संगायतां शृखतां ॥ followed by the colophon: इति श्रीमिश्रश्रीकान्तभट्टाचार्यविरचितायां श्रीगीतगोविन्दटीकायां पदभावार्थचन्द्रिकानामधेयायां पीतपीतावरी(प्रीतपीताम्बरो) नाम द्वादशः सर्गः ॥

The MS. was copied for one वावूशीव सवरशीहजी(!) ॥

For another MS. of the commentary in this version, see Rāj. Mitra, Notices, viii., p. 286.

[Sir Charles Wilkins.]

3871.

3054. Foll. 170; size 11¼ in. by 5 in.; good Devanāgarī writing of the latter part of last century; 8–15 lines in a page.

Gītagovinda, with a copious commentary, called *Rasakadambakallolinī*, by *Bhagavaddāsa*.

It begins:

संभ्रांतो राधिकाया नयनविलसितैर्विभ्रमभ्रूविलासैः
किंजल्कव्रातकांतिः कनकनिकषवत्पेटूमंजुच्छटाभः ।
विभ्राणो मंजुकेलिर्मधुरमधुरया राधया कृष्णचंद्रः
कंदर्पाह्लादवद्वीजयति घनवने वृंदया लक्षितेः सः ॥ १ ॥

इह खलु सकलनववल्लवीवृंदवदनेंदीवरशशधरमधुरमधुरमूर्तिश्रीमद्वृंदावनेश्वरीस्तनकुड्मलमकरीविरचनरचनाकलितकरकमलदलानंदकंदलितमकरध्वजादेशचलितयोः श्रीमत्कालिंदीतट-

संबंधीमाधवीव्रतविस्फुटत्कुसुमकदंबसौगंध्यलुब्धसच्चंचरीकपटलीध्वनिकलमाधुरीमुग्धसप्तस्वरगुणगणे विविधनिकुंजमंजुध्वद्रुमघनवने ऽवलंबिनीं कंदर्पकोटिलीलारसजलधिनिमग्नहृदयश्रीवृंदावनकिशोरीकिशोरचक्रचूडामण्योः श्रीराधामोहनयोः समस्तजनहृत्पंकेरुहानंदसंवर्धिनीं निहविहारमाधुरीं(!) तत्कृपयैव वर्णयितुं श्रीमज्जयदेवनामा कविरिष्टदेवतास्मरणलक्षणं मंगलमाचरति । तच्चायोग्यो ऽप्ययं जनस्तदनुगतत्वेनैव व्याचष्टे । मेघैरित्यादि । ०

Besides its verbal explanations, principally founded on the *Amarakosha* and the *Viśvaprakāśa*, the commentary lays particular stress on the art of composition as developed in the poem, illustrating it by the rules laid down in rhetorical works and by specimens of poetical composition chosen from the *Bhāgavata* and other *Purāṇas*, as well as from the *Śriṅgāratilaka*, the *Kṛishṇakarṇāmṛita*, and similar works.

As a specimen of this commentary may be extracted its remarks on I. 4,—Prof. Lassen, in his notes, having quoted the other comments on this verse:

इदानीं ग्रंथनिर्दोषत्वाय प्रामाण्यापादनाय च केनचिन्महाभागवतेन महाकविसभायां वर्णितं पद्यं संगृह्यते वाच इत्यादि उमापतिधरनामा कविः लक्ष्मणसेनामात्यो वाचः पल्लवयति विस्तारयति व्यंग्यार्थशून्यं शब्दार्थगुणशून्यं चास्य कवित्वमिति ध्वनितं शरणः शरणनामा कविः दुरूहस्य विषमार्थकाव्यस्य शीघ्ररचने श्लाघ्यः स्तुत्यः गूढार्थत्वादिदोषयुक्तं प्रसादादिगुणरहितं एतस्यापि काव्यं चेति ॥ तथा च ॥ शृंगाररस एवोत्तरः श्रेष्ठो यत्र शृंगारेण उत्तरं प्रधानं वा यत्सत्प्रमेयं तस्य रचनैः कवितायां ग्रथनैराचार्यगोवर्धनस्पर्धी गोवर्धनाचार्येण सह स्पर्धावान् कोपि न विश्रुतो न ख्यातः ॥ रसांतरप्रवेशेन माधुर्यादिगुणसंपन्नपदरचनायां सोप्यशक्त एवेति भावः । इति विधाध्यापनादिना (?इतरविद्याध्या०) न तु सत्कवितायामाचार्यत्वमिति सोपहासमुक्तमाचार्येति ॥ धोयी कविक्ष्मापतिः धोयीनामा कविराजः श्रुतिधरः श्रुतिः श्रवणं तन्मात्रादेव ग्रंथादिग्राही ननु तस्य कवितायां कौशलमिति भावः क्ष्मापतिपदेनाहंकारित्वं जाड्यं चेति ध्वनितं ॥ गिरां वचसां संदर्भशुद्धिगुणालंकारसंपन्नग्रथनाविशेषं जयदेव एव जानीते नान्यः ॥

It ends: श्रीमद्वृंदावनेश्वरीप्रियकृष्णचरणपंकेरुहमकरंदास्वादनपटुचंचरीकसंभाषणमध्यानंदादोलचपलहृदयेन श्रीमद्भगवद्दासेन भगवज्जनपरितोषाय विरचितेयं रसकदंबकल्लोलिनी श्रीमद्रसवेदिभिर्भगवदीयैरानंदसंदोहसंदीपितपरमोज्ज्वलरसावगाहिमनसाहर्निशं विचारणीया । इति श्रीगीतगोविंदस्य रसकदंबकल्लोलिनी टीकेयं समाप्तिमगमत् ॥

[J. R. Ballantyne.]

3872.

2507. Foll. 45; size 11¼ in. by 4⅞ in.; fair Devanāgarī writing of 1642 A.D.; thirteen lines in a page.

Gītagovinda, with a commentary (*ṭīkā*), by king *Mānāṅka*.

It begins:

चराणां स्थावराणां च येन सृष्टिः कृता पुरा ।
सर्वज्ञाय नमस्तस्मै ज्ञानदात्रे ऽच्युतात्मने ॥ १ ॥
कवीनां मतिमालोक्य सतां च सुखबुद्धये(वृद्धये R. M.)।
कृता टिप्पणिका मुख्या मानांकेन महीभुजा ॥ २ ॥
प्रीतये वासुदेवस्य सद्यः पापविमुक्तये ।
गीतगोविंदकं काव्यं जयदेवश्चकार ह ॥ ३ ॥

यस्यायमाद्यः श्लोकः । ०

It ends:

यद्गांधर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं
यच्छृंगारविवेकतत्त्वमखिलं काव्येषु लीलायितं ।
तत्सर्वं जयदेवपंडितकवेः कृष्णैकतत्त्वात्मनः
सानंदं परिशोधयंतु सुधियः श्रीगीतगोविंदतः ॥

इति श्रीगीतगोविंदटीकायां स्वाधीनभर्तृकावर्णने सुप्रीतपीतांबरो नाम द्वादशः सर्गः ॥ ० संवत् १६ आषाढादि ९९ वर्षे फाल्गुनशुदि ५ तिथौ सोमवारे लिखितं ॥

See Lassen, Prolegomena ad Gītag., p. xii.; Rāj. Mitra, Notices, iv., p. 22.

[Gaikawar.]

3873.

1212. Foll. 60; size 11¾ in. by 5 in.; careless Devanāgarī writing of 1800 A.D.; 8–14 lines in a page.

Gītagovinda, with a commentary, entitled *Padadyotanikā,* by *Nārāyaṇa Paṇḍita.*

This commentary has been repeatedly printed in India. Cf. Aufrecht, Cat. Bodl., nos. 221, 222.

The commentator's patron was *Bhīshadāsa* (here called *Bhisvidāsa,* ? i.e. *Bhīkhidāsa*), son of *Lakshmīdāsa.*

The copyist says at the end:

कपिलगोत्रसमुत्पन्नो गणेशकृष्णनंदनः ।
अलिखद्भूरियत्नेन गीतगोविंदटिप्पणं ॥
अनया प्रीयतां देवः पीतः पीतांवरो हरिः ।
समे करोतु कल्याणमिह लोके परत्र च ॥

[H. T. Colebrooke.]

3874.

118. Foll. 76; size 10 in. by 3¾ in.; fair Devanāgarī writing of 1642 A.D.; 9–11 lines in a page.

Padadyotanikā, without the text.

The author's patron is twice called in this MS. *Bhīshidāsa,* once *Bhīkhadeva.*

Copyist's signature: संवत् १६९९ समये आश्विन-शुक्लपौर्णिमायां भौमवासरे श्रीमिश्रवालकृष्णात्मजश्रीमिश्रशिरोमणिनेदं पुस्तकमलेखि ॥ [H. T. Colebrooke.]

3875.

197. Foll. 144; size 10¾ in. by 4 in.; indifferent Bengālī handwriting of 1807 A.D.; 10–12 lines in a page.

Gītagovindavyākhyā, with the special title of *Gaṅgā,* by *Kṛishṇadatta* of Mithilā, son of *Bhaveśa* and *Bhagavatī,* and younger brother of *Purandara, Kulapati,* and *Śrīmālika.*

It was composed with the view of showing that *Jayadeva's* poem can be made to suit *Śaiva* doctrines as well as those of the *Vaishṇavas,* and consequently each verse is first applied to *Kṛishṇa* and *Rādhā,* and then to *Śiva* and *Pārvatī.*

It begins:

प्रीतिं वः परमेश्वरः परहितः प्रीतिप्रसन्नः पराम्
आधत्तां घनसारसुन्दरतरश्रीकस्य सा राधिका ।
गौरी भूषणभूषणीयपदतामन्योन्यशोभार्पणाद्
धैमीरप्रतिमासिताश्मजटिता प्राप्नोति यस्याङ्कगा ॥
तामम्बापतिदेवतां भगवतीदेवीं भवेशं गुरुं
भक्त्यानम्य पुरंदरं कुलपतिं श्रीमालिकं चाग्रजान् ।
गङ्गाख्यां जयदेवदिव्यकविताव्याख्यामिमां मैथिलो
बह्वर्थप्रतिपादनाय तनुते श्रीकृष्णदत्तः कविः ॥

घनसमयनिबन्धादाविलत्वे ऽपि पुण्यं
प्रथयति रसमच्छं भङ्गिभिर्विस्फुरन्ती ।
गमयति पदमेषा वैष्णवं शाम्भवं वा
जयति जगति गङ्गा गीतगोविन्दटीका ॥

शैवं नाद्रियते सुधीरपि मतं प्रायो ऽधुना वैष्णवः
शैवो नैव च वैष्णवं निजनिजासद्वासनावासितः ।
मत्वेत्थं मधुसूदनो ऽपि मुरजित्पक्षे महिम्नः स्तुतिं
व्याचख्यौ जयदेवसूक्तिमपि तां शैवे पथे योजये ॥

It ends:

माता पुण्ययशस्वती भगवतीदेवी भवेशः पिता
सन्तो यस्य पुरन्दरः कुलपतिः श्रीमालिकश्चाग्रजाः ।
तेने मैथिलकृष्णदत्तकविना तेनेह गङ्गाभिधा
टीकाया लहरी समाप्तिमगमत्तस्यामियं द्वादशी ॥

इति भगवतीभवेशसंभवश्रीकृष्णदत्तकृतायां श्रीगीतगोविन्द-व्याख्यायां श्रीगङ्गाख्यायां द्वादशी लहरी० ॥

[H. T. Colebrooke.]

3876.

1180. Foll. 85; size 13 in. by 4½ in.; indifferent, modern Bengālī handwriting; eight lines in a page.

Kṛishṇabhāvanāmṛita, or simply *Bhāvanāmṛita,* a poem, in 20 *sargas,* on the incidents during *Kṛishṇa's* residence in Gokula and Vṛindāvana; composed in 1786 A.D.

The first leaf has been supplied by a different (good) hand, beginning:

श्रीकृष्णचैतन्यघनं प्रपद्ये सपद्यपध्वस्ततमःप्रपञ्चं ।
पञ्चेषुकोट्यर्बुदकान्तिधारापरंपराप्यायितसर्वविश्वं ॥
सनातनं रूपमुदीयुषोः क्षितौ
हृदा दधानो व्रजकाननेशयोः ।
तत्केलिकल्पागमसंगतिर्लिताः(?°तेर्लताः)
सदालिवीथीरनुरागिणीर्भजे ॥ °

As fol. 1 contains only 12 stanzas, and a few words, whilst the second leaf contains the last 6 stanzas (37–42) of the first canto, a considerable portion of the latter must be wanting.

For an analysis of the work see Rāj. Mitra, Notices, vii., p. 269.

It ends: इति श्रीकृष्णभावनामृते महाकाव्ये नक्तन्तनलीलास्वादनो नाम विंशतितमः सर्गः समाप्तः ॥

Then follow three more stanzas, beginning: वस्वाकाशविकारसंमितशके वारे गुरोः फाल्गुने ° – – तदेतद्दगात् काव्यं भजत्पूर्णतां ॥ [H. T. Colebrooke.]

3877.

584 c. Foll. 27, the last but one of which is wanting; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; clear Devanāgarī writing of 1761 A.D.; eight lines in a page.

Vāsudevacarita-mahākāvya, or *Vāsudevakathākāvya*, by *Veṇīdatta*, son of *Jagajjīvana*; describing, in 7 *sargas*, the youthful sports of *Krishṇa-Vāsudeva* and his fights, in conjunction with *Rāma*, against *Kaṃsa* and other *Asuras*. The poem was composed at the instance of *Trilocana*, son of *Keśava tripāṭhin*, a Brāhman descended from a Gujarat family.

It begins:

विबुधगणसपर्यासुप्रसन्नो नितांतं
पदनतजनवृंदानंदसंदोहसन्नः ।
गिरिचरणनिवासो ऽप्यात्मसंस्थानसंस्थः
फलयतु कुशलं नः काशिकायां त्रिनेत्रः ॥ १ ॥

श्रीमद्गुर्जरमंडले समभवत्काशीत्रिपाठी द्विजो-
दीच्यज्ञातिसहस्रमंडनमणिर्वेदार्थशास्त्रार्थवित् ।
तत्सूनुः किल केशवः क्षितिसुरानंदैककंदः सदा
वांछापूरणतत्परः प्रकतितो[1] लक्ष्म्या सुपत्न्या स्वयं ॥ २ ॥

वेदशास्त्रार्थसंपन्नस्त्रिपाठी केशवाभिधः ।
दाल्भ्यगोत्रः सन्मित्रः स समभूत्केशवो ऽपरः ॥ ३ ॥

केशवस्य सहधर्मचारिणी
गोमतीव शुभकर्मगोमती ।
ब्राह्मणस्य किल देहधारिणं
तं त्रिलोचनमजीजनत्सुतं ॥ ४ ॥

गूर्जरोदीच्यसाहस्रत्रिलोचनतपस्विना ।
आज्ञप्तः कुरुते काव्यं वासुदेवकथारसं ॥ ५ ॥

कवितावनकांतारे कूटपर्वतदुर्गमे ।
पदे पदे प्रस्खलतः संतः संत्ववलंबनं ॥ ६ ॥

यन्नामस्मरणं लोके पवित्रीकुरुते जगत् ।
पवित्रयिष्यति न किं मद्वाणीं सेविका च तत् ॥ ७ ॥

मुधा बुधा जन्म न यापयंतु
कदर्यकंदर्पसुखादिभावैः ।
भूभारनाशाय कृतावतारं
श्रीवासुदेवं सततं श्रयंतु ॥ ८ ॥

गीतं पुराणैः श्रुतिभिः प्रणीतं
नीतं हृदंतः कमलासनाद्यैः ।
वीतं श्रिया चित्कलया नितांतं
स्वांतेषु संतस्तमिहाश्रयंतु ॥ ९ ॥

गर्भेषु सप्तसु विनाशमुपागतेषु
श्रीदेवकीवरकृतस्तव तुष्टचेताः ।
आविर्बभूव भुवि बालकरूपधारी
श्रीदेवकीशमनसंनिधिमादिदेवः ॥ १० ॥

चित्रं विचित्रचरितं तमिहाकलय्य
बालं प्रबाललसितामलपाणिपादं ।
कंदर्पकोटिकमनीयरुचा स्फुरंतं
दृष्ट्वा पतिं परमकारुणिकान्ववादीत् ॥ ११ ॥

एनं(!) नय व्रजभुवं भुवनस्य बीजं
नंदस्य यावदिह जाग्रति नो सुरेशः ।
तावत्समानय सुतां सुयशोदयाप्तां
कोलाहलो ऽत्र भविताद्भुतमेव भूरि ॥ १२ ॥

[1] ? प्रकटितो.

इत्थं तयानुगदितो वसुदेवदेवो
बालावलोकनगताखिलबंधनो ऽभूत् ।
चित्रं न तद्यदिह नाम जगत्सु गीतं
संसारबंधनमतिप्रसभं छिनत्ति ॥ १३ ॥
निधाय बालं हृदयारविंदे
निधानवद्विस्मितचित्तवृत्तिः ।
पाणिद्वयाभ्यामनुगृह्य तूर्णं
व्रजैव पूर्णं तदसौ चचाल ॥ १४ ॥ °

I., 31 verses; II., 33 vv.; III., 35 vv.; IV., 32 vv.; V., 39 vv.; VI., 35 vv.; VII., 39 verses.

The missing leaf contained from the 30th to the 38th (or last but one) verse of the 7th *sarga*.

It ends:

इति कृतसुरकृत्यः संगतानेकभृत्यः
श्रुतिवचनविचिंत्यः स्फूर्जिताशेषसत्यः ।
मधुपुरि जयलक्ष्मीसेवितः केशवो ऽयं
जयति जयति नित्यं तत्परं ब्रह्म सत्यं ॥ ३९ ॥
वेणीदत्तेन रचिते जगज्जीवनसूनुना ।
वासुदेवकथाकाव्ये सर्गो ऽयं सप्तमो ऽभवत् ॥

इति श्रीवासुदेवचरिते महाकाव्ये कंसवधो नाम सप्तमः सर्गः॥° संवत् १८१८ समये आषाढशुक्लदशम्यां श्रीवाराणस्यामयं ग्रंथः समाप्तिमगमत् ॥

The same author's *Pañcatattvaprakāśa* was composed in 1644 A.D.

[H. T. COLEBROOKE.]

3878.

1171. Foll. 180; size 13 in. by 4¾ in.; modern Bengālī handwriting; six lines in a page.

Govindalīlāmṛita, a poem, in 23 *sargas*, on the sports and pastimes of *Kṛishṇacaitanya* at Vṛindāvana, by *Raghunātha Dāsa*.

It begins:

श्रीगोविन्दं व्रजानन्दसन्दोहानन्दमन्दिरं ।
वन्दे वृन्दावनाधीशं श्रीराधासङ्गनन्दितं ॥ १ ॥

यो ऽज्ञानमत्तं भुवनं कृपालुरुल्लाघयन्नप्यकरोत्प्रमत्तं ।
स्वप्रेमसंपत्सुधयाद्भुते ऽहं श्रीकृष्णचैतन्यममुं प्रपद्ये ॥ २ ॥

श्रीराधाप्राणबन्धोश्चरणकमलयोः केशशेषाद्यगम्या
या साध्या प्रेमसेवा व्रजचरितपरैर्गाढलौल्यैकलभ्या ।
सा स्यात्प्राप्या यया तां प्रथयितुमधुना मानसीमस्य सेवां
भाव्यां रागाध्वपान्थैर्व्रजमनु चरितं नैत्यिकं तस्य नौमि ॥ ३ ॥

कुञ्जाद्गोष्ठं निशान्ते प्रविशति कुरुते दोहनान्नाशनाद्यां
प्रातः सायं च लीलां विहरति सखिभिः संगवे चारयन् गाः ।
मध्याह्ने नक्तमप्युद्विलसति विपिने राधयोक्त्रा[1] पराह्णे
गोष्ठं याति प्रदोषे रमयति सुहृदो यः स कृष्णो ऽवतात्त्वः ॥ ४ ॥

यत्पीतं श्रुतिवाङ्मनोभिरनिशं तृष्णाप्रदं त्वद्भुतं
संसारामयहार्यपि प्रणयजोन्मादान्ध्यमोहादिकृत् ।
शश्वच्चर्वितमेव भूरिरसदं देहादिकृत् पुष्टिदं
तज्जीयादमृतस्पृहाहरमिदं गोविन्दलीलामृतं ॥ ५ ॥

The work consists of 2472 verses, treating of *Kṛishṇa's* sports according to the different parts of the day, viz.: 1. (116 verses) *kuñja-niśāntakeliracanam*; 2. (101 vv.) *kalyavilāsa-varṇanam*; 3. (110 vv.) do.; 4. (78 vv.) *prātarbhojanakelivarṇanam*; 5. (81 vv.) *pūrvāhna-līlā*; 6. (81 vv.) do.; 7. (132 vv.) do.; 8. (114 vv.) *madhyāhnalīlā*; 9. (106 vv.) do.; 10. (149 vv.) do.; 11. (145 vv.) *śrīrādhātanu-varṇanam*; 12. (105 vv.) *madhyāhnalīlā*; 13. (114 vv.) do.; 14. (111 vv.) do.; 15. (148 vv.) do.; 16. (107 vv.) do.; 17. (68 vv.) do.; 18. (99 vv.) do.; 19. (107 vv.) *aparāhnakeliḥ*; 20. (76 vv.) *sāyaṃkeliḥ*; 21. (127 vv.) *pūrvaniśā-vilāsaḥ*; 22. (101 vv.) *rāsavilāsavarṇanam*; 23. (96 vv.) *rajanīvilāsaḥ*.

It ends:

यैरेतत्परिपीयते कृदिलम(!) तृष्णातिरेकान्मुहुर्
ब्रह्माद्यैरपि दुर्गमं व्रजविधोर्लीलामृतं राधया ।
वृन्दारण्यविलासिनी कुमुदिनी वृन्दस्य बन्धुव्रजे
कारुण्यादचिरेण वाञ्छितत्तमं[2] तेषां तनोतु स्वयं॥९६॥

---

[1] ? राधया वा. [2] ? वांछिततमं.

Followed by the colophon-verse repeated, *mutatis mutandis*, after each canto:

> श्रीचैतन्यपदारविन्दमधुपश्रीरूपसेवाफले
> दिष्टे श्रीरघुनाथदासकृतिना श्रीजीवसङ्गोद्गते ।
> काव्ये श्रीरघुनाथभट्टवरजे गोविन्दलीलामृते
> सर्गो ऽयं रजनीविलासवलितः पूर्णस्त्रयोविंशकः॥२३॥

[H. T. Colebrooke.]

3879.

2314 d. Fol. 1; size 11½ in. by 5¼ in.; modern Bengālī handwriting; twelve lines in a page.

A fragment of the *Govindalīlāmṛita*, consisting of verses 1–10 of the 11th *sarga*.

[R. Johnson.]

3880.

2538 e. Foll. 9; size 9¾ in. by 4¼ in.; excellent Devanāgarī writing of 1642 A.D.; eight lines in a page.

Kṛishṇalīlā-kāvya, a poem, in 84 verses, on *Kṛishṇa's* separation from the Gopīs; composed, in Saṃvat 1680 (1623 A.D.), by *Madana*, son of a *Kṛishṇa* (versed in medical science).

The author is probably identical with that of the *Kalyāṇarājacaritra* (Cat. Bodl., no. 228).

Each verse consists of two pairs of rhymed lines, one of these *pādas* being always taken from the *Ghaṭakarpara* and appearing in the corresponding place of the verse in regular order, so that four consecutive verses of the *Kṛishṇalīlā* contain the text of an entire verse of that poem.

It begins:

> निचितं खमुपेत्य नीरदैर् (*Gh.* 1*a*)
> वसुदेवे हरिवाहिनीरदैः ।
> रचितं फणिभूभुजाननैर्
> उपरिच्छत्रमभासि काननैः ॥ १ ॥
>
> शशिनः किरणैः सनीरदैः
> प्रियहीनाहृदयावनीरदैः (*Gh.* 1*b*) ।
> उदितं विभिदे सरिज्जलैः
> शयितं रक्षिजनैस्तदालयैः ॥ २ ॥
>
> निजपुत्रममुत्र मुक्तवान्
> स यदा [तं] जगृहे ऽप्यनुक्तवान् ।
> सलिलैर्निहितं रजः क्षितौ (*Gh.* 1*c*)
> जनताभिर्न च तौ समीक्षितौ ॥ ३ ॥
>
> निजकार्यचिकीर्षयोद्यतं
> सुरसंघाः कुसुमैः प्रमुद्य तं ।
> ववृषुः स्वभुवं तथा क्षितौ
> रविचंद्रावपि नोपलक्षितौ (*Gh.* 1*d*) ॥ ४ ॥
>
> हंसा नदन्मेघभया[द्] द्रवंति (*Gh.* 2*a*)
> नेदुस्तथा तत्र च मंद्रवंति ।
> वाद्यानि नंदो ऽपि ददौ बुधेभ्यः
> प्रीतो धनं मार्गणमागधेभ्यः ॥ ५ ॥
>
> दधानि गोप्यो बहुसारवंति
> निशामुखान्यद्य न चंद्रवंति (*Gh.* 2*b*) ।
> क्षिपं तु काश्चिच्च तदाचचक्षुः
> सिक्ताः पुनश्चापिदधुः स्वचक्षुः ॥ ६ ॥
>
> व्रजे ऽवतीर्णे विवभावधीरं
> धरा च पूतं(?) पवनो ऽतिधीरं ।
> नवांबुमत्ताः शिखिनो नदंति (*Gh.* 2*c*)
> प्रभं नभोरपि(? प्रभा नभो ऽपि) स्म घनानदंति ॥ ७ ॥
>
> इतींदिरामंदिरमागतोपा
> न पूतनामाह विभौ सतोपाः (°पा) ।
> न कोपिकोणे नु किमायदंति (? °नदंति)
> मेघागमे कुंदसमानदंति (*Gh.* 2*d*) ॥ ८ ॥

Of the 22 verses of which the printed text of the *Ghaṭakarpara* (Hæberlin, *Kāvyasangraha*, etc.) consists, the 21st (एतन्निशम्य°) is here omitted, whilst vv. 15 and 16 are interchanged.

It ends with the following additional verses:

> आसीत् – – ⌣ासधुक्षितिविदितयशा[1] वित्तपाशाप्रभूतः
> श्रीकृष्णः कृष्णपादांबुजरचितमना वैद्यविद्यानिधानं ।
> काव्यं तस्यात्मजेनेदमघटि मदनेनात्मनः पापनुत्त्यै
> सर्वेषां चोपकृत्यै हरिगुणगणनं कालिदासात्तपद्यं ॥ ८५ ॥

[1] Torn, ? °सिंधु°.

दिववसुरसभूमीवत्सरे माधवस्य
द्विपमुखदिनसोमे कृष्णलीलाभिधानं ।
मदनविविधमिथ्यापथ्यवाक्यप्रयोगो-
दितदुरितनिहत्यै काव्यमेतत्समाप्तं ॥ ८६ ॥

इति श्रीमदनकृतं कृष्णलीलानाम काव्यं समाप्तं॥ संवत् १६९९ वर्षे असाढशुद ६ गुरौ कृष्णलीलानाम काव्यं संपूर्णं ०॥ मेद-पाठज्ञातीयदीक्षितलक्ष्मीधरात्मजदीक्षितविश्वंभरकेन पुस्तकं परोपकाराय ॥ [GAIKAWAR.]

3881.

56b. Foll. 46; size 10 in. by 5 in.; good Devanāgarī writing of about 1700 A.D.; eleven lines in a page.

Kṛishṇalīlātaraṅgiṇī, a lyric-dramatic poem, describing *Kṛishṇa's* sports at Vṛindāvana, by *Nārāyaṇa Tīrtha.*

It begins (slightly corrected):

हिमगिरितनयापत्यं हेमाचलचापसमुदितं तेजः ।
किमपि महत्तममद्य स्मर्तव्यं विघ्नतिमिरहरणाय ॥ १ ॥
गिरिराजसुतासूनुर्गजराजवराननः ।
परिपंथिगणध्वंसी सुरसेव्यो विराजते ॥ २ ॥

गीतमालवरागो ऽटं तालः ॥

मूषकवाहन मुनिगणवंद्य ।
दोषरहित दुरितासुरवृंद ।
शेषभूषण शैववारिधिचंद्र ।
योषित्परिजन पुण्यैककंद ।
जय जय स्वामिन् जय जय ॥ १ ॥
जय जय जितवैरिवर्गे प्रचंड ।
जय जय जय गजमुख वक्रतुंड ।
जय जय स्वामिन् जय जय ॥ भु० य० ॥
अद्रिसुतासुत अनवद्यचरित ।
भद्र भक्तभवभयहर मुदित ।
रुद्रोदित रुजुमस्तकसहित (?गज०) ।
सद्रूप सरसिजसमुदित विनुत ॥ ज० ॥ ८(!) ॥
लंबोदर धीर लावण्यसार ।
कंबुसुधानिधि कर्पूरगौर ।
सांब सदाशिव सत्कृतिचतुर ।
सामवेदगीत संकलाधार ॥ ३ ॥ ०

After this song to *Gaṇeśa* and one to *Kṛishṇa-Vishṇu,* the author proceeds to give some indication regarding the plan of his composition, after which the different episodes of *Kṛishṇa's* career are treated in song:

आदौ कृष्णावतारस्तदनु नरहरेर्बाललीलाविलासो
वत्सानां पालनं तच्चरितमथ गवां पालनं प्रौढभावः ।
गोपीवस्त्रापहारस्तदनु गिरिवरोद्धारणे रासलीला
कंसादीनां निरासस्तदनु जलनिधौ द्वारकायां प्रवेशः ॥ १ ॥
रौहिणेयस्य कृष्णस्य विवाहस्तदनंतरं ।
रुक्मिण्याद्यष्टमहिषीसहितो गीयते ऽमरैः ॥ २ ॥
इत्येवं संग्रहेणोक्ता कृष्णलीलातरंगिणी ।
आद्यः कृष्णावतारो ऽयं संग्रहेणाभिधीयते ॥ ३ ॥
उग्रसेनस्ततः कंसो देवकी वसुदेवराट् ।
तयोः कारागृहे (०गृहे) वासः कंसेन विहितः किल ॥ ४ ॥ ०६ ॥
गोकुले कृष्णगमनं दुर्गाया मथुरागमः ।
कथायाः संग्रहस्त्वेवं चरित्रे ऽस्मिन्निबध्यते ॥ ७ ॥
तत्रादावुग्रसेनागमनं । तालभेदः ॥ ०

The programme thus sketched out is not, however, exhausted in the form in which it is here presented; seeing that the eight *taraṅgas* into which it is divided only bring it down to the *Rāsalīlā.*

The MS., although written in one hand, begins a new pagination after every second *taraṅga,* counting 16 foll. for the first two, and 11, 7 and 12 foll. resp. for the three remaining pairs of *taraṅgas.* The musical modes and changes of rhythmic time are specified throughout; and explanatory *ślokas* are constantly inserted between the songs.

It ends: श्लोक ॥

उरसा मनसा दृष्ट्वा परिष्वज्य मुहुर्मुहुः ।
कृतकृत्यास्तदात्मानं कृष्णं मत्वा समागताः ॥ १ ॥
आत्मारामो ऽपि भगवानात्मानं दर्शयन् परं ।
ततः प्रभाते गोपीभिः सह गोकुलमागतः ॥ २ ॥

इति श्रीनारायणतीर्थविरचितायां श्रीकृष्णलीलातरंगिण्यां श्रीकृष्णरासक्रीडा महोत्सववर्णनं नाम अष्टमस्तरंगः ॥

[H. T. COLEBROOKE.]

3882.

1177 e. Foll. 15; size 12¾ in. by 4¾ in.; fair, modern Bengālī handwriting; eight lines in a page.

Camatkāracandrikā, a poem describing *Krishṇa's* love-intrigues with *Rādhā* and her companions; divided into four *kutūhalas* (of 37, 33, 101, 55 verses respectively).

The name of the author is not mentioned; but in a MS. described by Rāj. Mitra, Notices, vi., p. 212, the poem is assigned to *Kavikarṇapūra Gosvāmin*.

I. यत्कारुण्यं शुचिरसचमत्कारवारां निधींस्तान्[1]
नृभ्यो राधागिरिवरधृतोः[2] स्पर्शयेन्नर्पयेन्नः[3] ।
तस्यैवैकं पृषतमचिराल्लब्धमाशाकृपार्णैः[4]
सो ऽव्यान्मन्तोर्दृशनवितते: कृष्णचैतन्यरूपः ॥ १ ॥

मातः प्रातः किमिह कुरुषे नह्यते (द° R. M.) पेटिकेयं
यत्नादस्यां किमु विनिहितं किं तवानेन सूनो ।
ज्ञातव्येन प्रणयिशिशुभिः[5] खेलगेहाद्बहिस्त्वं
जिज्ञासा मे भवति महती ब्रूहि नो चेन्न यामि ॥ २ ॥

अस्यां (क° R. M.) चन्दनचन्द्रपङ्कजरजःकस्तूरिकाकुङ्कुमा-
द्यङ्गानामनुलेपनार्थमथ तन्नेपथ्यहेतोस्तथा[6] ।
काञ्चीकुण्डलकङ्कणाद्यनुपमं वैदूर्यमुक्ताहरिद्-
रत्नाद्यं वरजातमप्यतिमहानर्घ्यं क्रमाद्वर्तते ॥ ३ ॥

अत्रेदं निदधासि किं मम कृते रामस्य वा नन्दन
ब्रूमस्त्वामवधेहि या तु भवतो हेतोः कृता पेटिका ।
सान्यातो ऽपि बृहत्यनर्घ्यमणिभागेवं बलस्यापरा
तत्कस्मिंश्चन ते जनन्युरुरियान् स्नेहो यतो यास्यसि ॥ ४ ॥

अस्मत्पुण्यतपःफलेन विधिना दत्तो ऽसि मह्यं यथा
मत्प्राणावनहेतवे व्रजपुरालंकारसूनुस्तथा ।
कन्या काचिदिहास्ति मन्नयनयोः कर्पूरवर्तिः पुरा
तस्या अम्बरमण्डनादिधृतये सेयं कृता पेटिका ॥ ५ ॥

कासौ कस्य कुतस्तरां जननि वा यस्यामतिस्निह्यति (°सि)
क्वास्ते तद्वद सर्वमेव शृणु भो या मे सखी कीर्तिदा ।
तस्याः कुक्षिमणेरनर्घ्यमतुलं माणिक्यमेतत्प्रभा-
घोषीभिर्वृषभानुरुज्जनयते मूर्तं (मूर्तिं) तदीयं तपः ॥ ६ ॥
सौन्दर्याणि सुशीलता गुरुकुले भक्तिस्त्रपाशालिता
मार्दवं विनयित्वमित्यधिपरं ये तीव्रमृष्टा गुणाः ।
ते यत्रैव महत्त्वमापुरथ मे स्नेहस्तु नैसर्गिकः
सा राधेत्यथ गात्रमुत्पुलकितं कृष्णोऽङ्गुकेनाप्यधात् ॥ ७ ॥[6]

II. प्रातः पतङ्गतनयामनया पदव्या
स्नानाय याति किमियं वृषभानुपुत्री ।
इत्याकुलेव कुटिला व्रजराजवेश्म
कृष्णं विलोकितुमगान्मियतो ऽतिमन्दा ॥

III. अथैकदा सा जटिला विविक्ते
चिन्तातुरा किंचिदुवाच पुत्रीं ।
न रक्षितुं हा प्रभवामि कृष्णो
वधूं ततः किं करवाण्युपायं ॥

IV. राधा कदाचिदतिमानवती बभूव
तां न प्रसादयितुमैष्ट हरिः प्रयास्यन् ।
सामादिभिर्बहुविधैर्विततैरुपायैः
कौन्द्या सहाय कमपि प्रततान मन्त्रं ॥

Other Gopīs mentioned in the course of the poem are *Goshṭharājñī*, *Vrajeśvarī* (? *Rādhā*), *Yaśodā*, *Gārgī*, *Tulasī*, *Paurṇamāsī*, *Kalāvali*, *Vidyāvali*, *Viśākhā*.

It ends:

इत्युक्तवत्यतिरुषेव निवेद्य कुन्द-
वल्ली बहिर्भवनमेव यदाध्यतिष्ठत् ।
तस्याः प्रसादनकृते निरगुश्च सख्यस्
तत्रैक एव कुसुमे सुरपाद्युवानौ ॥ ५४ ॥

सभ्रूविभङ्गकुटिलास्यसरोजसौधु-
माद्यन्मधुव्रतविलाससुसौरभाणि ।
संप्राप्य जालविवरेषु जुघूर्णुरेव
प्रेक्षालयः प्रतिपदं प्रमदोर्मिपुञ्जैः ॥ ५५ ॥

इति श्रीचमत्कारचन्द्रिकायां चतुर्थकुतूहलं समाप्तं ॥

दयितोरसि सुखशयितां दयितामपि तापयाञ्चक्रे ।
दरफुल्लकमलसौरभभारमन्थरः पवनः (!) ॥
लिखन्नास्ते भूमिं° (*Amaruś.*, ed. Simon, 8) ॥
श्रीभैरवचन्द्रदेवशर्मणो लिपिरियं ॥

[H. T. COLEBROOKE.]

[1] निधिं स्तान् MS.
[2] बाधा गिरिवरभृतः R. M.
[3] स्पर्शयन्नर्शयेन्नः MS.
[4] ? तत्सैवैकं °माशाक्षिदानैः R. M.
[5] ? प्रणयसखिभिः R. M.
[6] ते ने° R. M.

3883.

2539 a. Foll. 19, one of which (fol. 18) is wanting; size 8 in. by 6 in.; indifferent Devanāgarī writing of 1603 A.D.; twelve lines in a page.

Rādhāprasāda-yamaka, a poem, by *Ekanātha,* describing, in 46 alliterative and rhymed verses, *Kṛishṇa's* appearance at Vṛindāvana, and his reception by *Rādhā;* with a commentary by *Lakshmīdhara Sūri.*

The poem begins:

गोपालवेषो घनधामकांतः संरक्ष्य साक्षाद्वसुधामकांतः ।
लक्ष्मीपतिर्दुर्दमदानवापदापातखिन्नां प्रमदानवाप ॥ १ ॥
सौंदर्यसारोच्चयरोचितासु गोपीषु तत्प्रेमभरोच्चितासु ।
उद्वेलकेलिप्रसराधिकायां कृष्णः सरागोऽजनि राधिकायां॥२॥
अथाविरासीद्भुवने वसंतः प्रापुर्मुदं केलिवने वसंतः ।
मधुव्रताः पुष्पलतारसेन विलासिनश्चोज्ज्वलता रसेन ॥ ३ ॥

The commentary begins:

उपनिषदविदितपारं भक्तकृपारंभसिद्धकूपारं ।
विगलितविषयालंबे मनसि स्तंबेरमास्यमवलंबे ॥ १ ॥
संतं तं सिद्धानामुच्चाटनमुच्चकैश्च विघ्नानां ।
हर्षाणामाकर्षणमभिानतं दिशतु वस्तु वस्तुष्टिः ॥ २ ॥
दिशतु कुशलं महसे ० ॥ ३ ॥
कपटशबरीविलासा ० ॥ ४ ॥
कृत एकनाथकविना काव्ये राधाप्रसादने यमकैः ।
व्याख्या विषमपदानां लक्ष्मीधरसूरिणा क्रियते ॥ ५ ॥

इह तावत्कवेः श्रोतुश्च काव्यकरणे श्रवणे च फलमभिधानीयं। तत्र देवतास्तोत्रेणानर्थनिवारणं।०॥ गोपाल०॥ अवाप प्राप्तवान्० साक्षाल्लक्ष्मीपतिः कृष्णः० प्रमदान् आनंदान्० संरक्ष्य वसुधां० दुर्दमदानवापदापातखिन्नां दुर्दमाश्च दानवाश्च तेभ्य आपद् दुःखं तस्य आपातः आगमनं तेन खिन्नां। घनधामकांतः निविडं तेजस्तेन कांतः। यद्वा मेघानां कांतिस्तद्वत्कांतः। ० अकांतः अकं दुःखं तस्यांतो यस्मात्। ०

The gap caused by the loss of the last leaf but one extends from the middle of the comment on v. 43 to near the end of the comment on v. 45. The last verse of the poem, with the comment and colophon, runs as follows:

भव्यभावरसविभ्रमकारि
प्रौढिभृद्यमककाव्यमकारि ।
एकनाथकविना कविराजन् (!)-
व्राततोषविधिना भुवि राजन् ॥ ४६ ॥

एकनाथकविना यमकैरुपलक्षितं काव्यं अकारि कृतं। किंविधं। भव्यभावरसविभ्रमकारि भव्यभावरसैः विभ्रमं विलासं करोतीति भव्यभावरसविभ्रमकारि। पुनः किंविशिष्टं। प्रौढिभृत् प्रौढिं बिभर्ति प्रौढिभृत्। किं कुर्वन् राजन्। केन कविराजव्राततोषविधिना कविराजानां व्रातः समूहः तस्य संतोषविधिं संतोषविधानं तेन भुवि पृथिव्यां राजत् शोभमानं॥

श्रीएकनाथविरचितं राधाप्रसादयमकं काव्यं समाप्तं॥ लक्ष्मीधरसूरिविरचि[ता] टीका समाप्ता॥ संवत् १६६० वर्षे आषाढवदिप्रतिपत्तिथौ उदयाकरेण काव्यमलेखि ॥

The two outer pages are inscribed (not always very legibly), by the eldest son of one *Devakṛishṇa,* with apophthegms of proverbial wisdom, in 33 verses (only the first 26 of which are numbered), apparently part of a century of *ślokas,* called *Mūrkhaśataka,* exposing the frailties of human nature with some degree of wit. The first three couplets run as follows:

शृणु मूर्खशतं राजन् तं तं भावं विवर्जय ।
येन त्वं राजसे लोके दोषहीनो मणिर्यथा ॥ १ ॥
सामर्थ्ये विगते ऽधीशः स्वश्लाघी प्राज्ञपर्षदि ।
वेश्यावचनविश्वासी प्रत्ययी दंभडंबरे ॥ २ ॥
द्यूतादिबद्धविन्नाशः कृष्याद्यायेषु संशयी ।
निर्बुद्धिः प्रौढकार्यार्थी विविक्तरसिको वणिक् ॥ ३ ॥

Colophon: इति मूर्खशतकं समाप्तम् ॥ सर्वेषां शिक्षायै लिखितं दैवकृष्णिना ज्येष्ठेन ॥

[GAIKAWAR.]

3884.

146. Foll. 47; size 14 in. by 6¼ in.; fair Devanāgarī writing of 1777 A.D.; 13–22 lines in a page.

Rādhāsudhānidhi, a poem, of 170 verses, in honour of *Rādhā,* by *Hita-Harivaṃśa,* son of

Vyāsa; with a commentary called *Cashaka,* composed, in Saṃvat 1830 (A.D. 1773), by *Gosvāmin Kṛipāla Narottama.*

The text begins:

यस्याः कदापि वसनांचलखेलनोत्थ-
धन्यातिधन्यपवनेन कृतार्थमानी ।
योगींद्रदुर्गमगतिर्मधुसूदनो ऽपि
तस्या नमो ऽस्तु वृषभानुभुवो दिशे ऽपि ॥ १ ॥

See Aufrecht, Cat. Bodl., no. 239.

Colophon: इति श्रीवृंदावनेश्वरीचरणकृपावलविजृंभित-श्रीहितहरिवंशविरचितं राधासुधानिधिस्तोत्रं समाप्तिमगमत् ॥

The commentary begins: श्रीप्रियादौ जयतात् ॥

चंद्रकोटिनिभं नित्यमुदितं यदहर्निशं ।
कृष्णपद्मोन्मुखं शश्वज्जयति श्रीप्रियामुखं ॥ १ ॥
यन्न प्रदर्शितं नाम श्रीमद्भागवते क्वचित् ।
श्रीवैय्यासकिरूपेण दर्शितं तत्सुधानिधौ ॥ २ ॥
तत्कृपापांगलेशेन प्रेरितो ऽहु (ऽहं) नरोत्तमः ।
टिप्पणं चषकं कुर्वे श्रीमद्राधासुधानिधेः ॥ ३ ॥
चंद्रो नश्यतु सूर्यो वा नश्येत् त्रिगुणवैभवं ।
दृढः श्रीहरिवंशस्य विहारो नान्यथा भवेत् ॥ ४ ॥

इह खलु सकलरसिकवंदितचरणः श्रीव्यासात्मजः सर्वेषां हितरूपेणावतीर्णः सखीरूपेण स्वात्मानं मन्यमानः स्वमनसि विविधभावान्भावयमानः श्रीमद्राधासुधानिधिनामग्रंथं रचितुकाम आदौ स्वेष्टप्रभावमनुवर्णयन् त्रिविधात्मकं मंगलमाचरति। यस्याः कदेति ॥

It ends:

बिंदुमात्राखलद्रीत्या स्वीकार्यं भावुकैर्मुदा ।
श्रीमद्राधासुधापानं कथं स्याच्चषकं विना ॥ १ ॥
शुद्धाशुद्धविचारो हि चषकस्य कदापि न ।
स्यात्पानं रसिकानां हि तद्भालायां सुनिश्चितं ॥२॥ ०३॥
श्रीवैय्यासकिहार्दं यत्तत्राप्तुं कः क्षमो भवेत् ।
दत्तं यत्कृपया तेन बहुत्वात्संचितं मया ॥ ४ ॥
वियद्रामपुराणे ऽब्दे भाद्रे शुक्ले हरेस्तिथौ ।
शनौ नरोत्तमेनेदं चषकं पूरितं त्वभूत् ॥ ५ ॥

इति श्रीमद्गोस्वामिकृपालविरचितं (!) श्रीमद्राधासुधानिधि-टिप्पनं चषकाख्यं समाप्तिमगमत् ॥

[H. T. COLEBROOKE.]

3885.

1398a. Foll. 9; size 11¾ in. by 4½ in.; clear Devanāgarī writing of 1742 A.D.; ten lines in a page.

Rādhāvinoda-vyākhyā, a commentary on the *Rādhāvinoda*—an alliterative rhymed poem, in 19 verses, on *Krishṇa's* amorous sports, by *Rāmacandra,* son of *Janārdana,* and grandson of *Purushottama*—composed, by *Bhaṭṭa Nārāyaṇa,* son of *Raṅganātha,* for the son of *Śukadeva Paṇḍita-śiromaṇi.*

It begins (cf. Rāj. Mitra, Notices, iv., p. 299):

पितृवचनमवश्यमेव पाल्यं जगति जनानिति शासितुं वनांतं ।
गतमतिकरुणारसार्द्रचित्तं रघुपतिमेकमुपास्महे सदारं ॥ १ ॥
रंगनाथांगजनुषा नारायणमनीषिणा ।
राधाविनोदकाव्यस्य व्याख्या विख्यापयिष्यते ॥ २ ॥

राधाविनोदाख्यं काव्यं चिकीर्षुर्निर्विघ्नं प्रारिप्सितसमाप्तिकामो रामचंद्रकविः परमेश्वरकर्तृकस्वसंरक्षणाशंसनरूपं मंगलमाचरति । मालीन इति ।

It ends:

शुकदेवसमाख्यस्य पंडितश्रीशिरोमणेः ।
तनयस्य निदेशेन भट्टनारायणो बुधः ॥
राधाविनोदकाव्यस्य व्याख्यानं स्वयमव्यधात्[1] ।
परोपकाररसिकाः शोधयंतु तदादरात् ॥

The commentary published (with the text) in the *Grantharatnamālā,* vol. iv. (Bombay 1890), professes to be *Rāmacandra's Prakāśa* in the introduction (कुशेशयदलाकार० ॥ १ ॥ राधाविनोदकाव्यस्य प्रकाशः परितन्यते । सुधिया रामचन्द्रेण भास्वतेव सरोरुहाम् ॥ २ ॥), but from verse 2 to the end (incl. the final verses) it is identical with the present work. The commentary in *Haridās Harichand's* edition in the *Kāvyakalāpa* (Bomb. 1865), though beginning with the first introductory verse of this commentary, and probably throughout based on it, is not the same. Cp. also Weber, Berl. Cat., nos. 577, 578. [H. T. COLEBROOKE.]

[1] Thus also *Grantharatnam.,* ? r. स्वयमभ्यधात्.

3886, 3887.

1177 b & c. Foll. 8 & 16; size 13¼ in. by 4½ in.; fair, modern Bengālī handwriting; seven lines in a page.

Vilāpakusumāñjali, a poem (by *Rūpa Gosvāmin*), in 3+101 stanzas, addressed partly to *Rūpamañjarī*, separated from her husband, partly to *Rādhā*, pining for the absent *Kṛishṇa*, and partly to *Kṛishṇa* himself; followed by a brief commentary thereon, or rather a paraphrase of it, by *Raghunāthadāsa Gosvāmin*.

The poem begins:

त्वं रूपमञ्जरि सखि प्रथिता पुरे ऽस्मिन्
पुंसः परस्य वदनं न हि पश्यसीति ।
बिम्बाधरे क्षतमनागतभर्तृकाया
यत्ते व्यधायि किमु तच्छुकपुङ्गवेन ॥ १ ॥
स्थलकमलिनियुक्तं(? ०क्ता) गर्विता कानने ऽस्मिन्
प्रणयसि वरहास्यं पुष्पगुच्छच्छलेन ।
अपि निखिललतास्ताः सौरभाक्ताः स मुञ्चन्
मृगयति तव मार्गं कृष्णभृङ्गो यदद्य ॥ २ ॥
व्रजेन्द्रवसतिस्थले विविधवल्लवीसंकुले
त्वमेव रतिमञ्जरि प्रचुरपुण्यपुञ्जोदया ।
विलासभरविस्मृतप्रणयिमेखलामार्गणे
यदद्य निजनाथया व्रजसि नाथिता कन्दरं ॥ ३ ॥
श्रीराधामोहनचन्द्राय नमो ऽस्तु ॥
प्रभुरपि यदुनन्दनो य एषः
प्रिययदुनन्दन उन्नतप्रभावः ।
स्वयमतुलकृपामृताभिषेकं
मम कृतवांस्तमहं गुरुं प्रपद्ये ॥ १ ॥
यो मां दुस्तरगेहनिर्जलमहाकूपादपारक्लमात्
सद्यः सान्द्रदयाम्बुधिः प्रकृतितः स्वैरी कृपारज्जुभिः ।
उद्धृत्यात्मसरोजनिन्दिचरणप्रान्तं प्रपाद्य स्वयं
श्रीदामोदरसाच्चकार तमहं चैतन्यचन्द्रं भजे ॥ २ ॥
वैराग्ययुग्भक्तिरसं प्रयत्नैरपाययन्मामनभीप्सुमन्धं ।
कृपाम्बुधिर्यः परदुःखदुःखी सनातनं तं प्रभुमाश्रयामि ॥ ३ ॥
अत्युत्कटेन नितरां विरहानलेन
दन्दह्यमानहृदया किल कापि दासी ।
हा स्वामिनि क्षणमिह प्रणयेन गाढम्
आक्रन्दनेन विधुरा विलपामि पद्यैः ॥ ४ ॥
देवि दुःखकुलसागरोदरे दूयमानमतिदुर्गतं जनं ।
त्वं कृपाप्रबलनौकयाद्भुतं प्रापय स्वपदपङ्कजालयं ॥ ५ ॥
त्वदलोकनकालाहिदंशैरेव मृतं जनं ।
त्वत्पादाब्जमिलल्लाक्षाभेषजैर्देवि जीवय ॥ ६ ॥
देवि ते चरणपद्मदासिकां विप्रयोगभरदावपावकैः ।
दह्यमानतरकायवल्लरीं जीवय क्षणनिरीक्षणामृतैः ॥ ७ ॥

Between foll. 7 and 8 of the text there is a lacuna extending from within v. 73 to within v. 94 (? r. 93). This gap was apparently caused by the leaves of the text and commentary of the original MS. from which this was copied having become mixed up; the missing verses of the text now appearing in the commentary, immediately after the comment on v. 83, in the order vv. 84–92, 73–82.

The poem ends:

त्वं चेत्कृपां मयि कृपामयि दुःखितायां
नैव तनोषि नितरां किमिह प्रलापैः ।
त्वत्कुण्डमध्यमपि तद्बहुकालमेव
संसेव्यमानमपि किं न करिष्यतीह ॥ १०० ॥
अयि प्रणयशालिनि प्रणयपुष्टदास्याप्तये
प्रकाममतिरोदनैः प्रचुरदुःखदग्धात्मना ।
विलापकुसुमाञ्जलिर्हृदि निधाय पादाम्बुजे
मया तव समर्पितस्तव तनोतु तुष्टिं मनाक् ॥ १०१ ॥
इति श्रीविलापकुसुमाञ्जलिस्तवः समाप्तः ॥

For another MS. of the text of this poem, ascribed, in the colophon, to *Rūpa Gosvāmin*, see Rāj. Mitra, Notices, ix., p. 62.

The Commentary begins: हे रूपमञ्जरि सखि अस्मिन् पुरे त्वं प्रथिता ख्याता स्यात् किंख्याता परस्य पुंसो वदनं न हि पश्यसि इति ख्याता उत भो अनागतभर्तृकायाः ते तव बिम्बाधरे यत्क्षतं तत्किं शुकपुङ्गवेन व्यधायि किमकारि ॥ १ ॥ हे रूपमञ्जरि सखि अस्मिन्कानने स्थलकमलिनियुक्त(० क्ता) त्वं गर्विता गर्वयुक्ता सती पुष्पगुच्छच्छलेन वरहास्यं प्रणयसि विस्तारयसि यत्कारणात्स कृष्णभृङ्गः ताः सौरभाक्ताः निखिला लताः मुञ्चन् सन् अद्य तव मार्गं मृगयति ॥ २ ॥ हे रतिमञ्जरि व्रजेन्द्रवसतिस्थले विविधवल्लवीसंकुले समूहे मध्ये त्वमेव प्रचुर-पुण्यपुञ्जोदया भवसि यत्कारणात् विलासभरे विलासातिशये

विस्मृत:(!) सन् स्मृतिविभ्रम: सन् प्रणयिमेखलामार्गेण प्रयुक्ता क्षुद्रघण्टिका अन्येसने(?°कान्वेषणे) नार्थिता याचिता सती निजनाथया राधिकया सह अद्य कन्दरं व्रजसि ॥ ३ ॥ य: यदुनन्दन: प्रभुरतुलकृपयामृतेन मां अभिषेकं कृतवान् तं गुरुमहं प्रपद्ये प्रपन्नो ऽस्मि । स यदुनन्दन: प्रभु: किंविशिष्ट: एष यदुनन्दन: श्रीकृष्णस्य प्रिय:। पुन: किंविशिष्ट: उन्नतप्रभाव: ॥ १ ॥ यश्चैतन्यचन्द्र:° श्रीदामोदरसाच्चकार तं चैतन्यचन्द्रमहं प्रभजे ॥ २ ॥ य: गोस्वामिप्रयत्नै: करणै: वैराग्ययुग्भक्तिरसं अनभीप्सुमन्दं मां अपाययत् तं सनातनं प्रभुं आश्रयामि° ॥ ३ ॥ हे स्वामिनि हे राधिके किल निश्चितं । हा खेदे । इह वृन्दावने° ॥ ४ ॥

It ends: हे कृपामयि हे राधिके मयि दु:खितायां विषये चेत् यदि त्वं कृपां नैव तनोषि तदा इह तवाग्रे मे मम नितरां तत्प्रलापै: किं त्वत्कुण्डमध्यमपि बहुकालवासं किं [सं]सेव्यमानमपि [॥ १०० ॥] रोदनै: प्रकर्षेण वाञ्छानुरूप अतिरोदनै: करणै: प्रचुरदु:खदग्धात्मना मया विलापकुसुमाञ्जलिर्हृदि निधाय निमित्ताय तव पादाम्बुजे समर्पित: सन्त: (सन्) मनागल्पं तुष्टिं तव तनोतु विस्तारयतु ॥ १०० (१०१) ॥ इति श्रीरघुनाथदासगोस्वामिना विरचिता श्रीविलापकुसुमाञ्जलेष्टीका समाप्ता ॥

[H. T. Colebrooke.]

3888.

1177 h. Foll. 6; size 13 in. by 4½ in.; fair, modern Bengālī handwriting; 6 or 8 lines in a page.

Padāṅkadūta, or *Kṛishṇapadāṅkadūta,* a poem, by *Kṛishṇaśarman Sārvabhauma-bhaṭṭācārya,* in 45 verses, describing the grief of a *gopī* when reminded of the absent *Kṛishṇa* by his footmark traced in the *krīḍākānana.*

It begins:

गोपी भर्तुर्विरहविधुरा काचिदिन्दीवराक्षी
उन्मत्तेव स्खलितकवरी नि:श्वसन्ती विशालं ।
अत्रैवास्ते मुररिपुरितिभ्रान्ति दूतीसहाया
त्यक्त्वा गेहं झटिति यमुनामञ्जुकुञ्जं जगाम ॥

The poem has been printed in Hæberlin's Sanscrit Anthology, and other collections, with an additional verse at the end, according to which it was composed, in Śaka 1645 (1723 A.D.), for *mahārājādhirāja Rāmajīvana.*

For another MS., the colophon of which locates the poet at Navadvīpa, see Rāj. Mitra, Notices, ii., p. 380. [H. T. Colebrooke.]

3889.

1177 i. Foll. 16; size and writing as in last MS.; six lines in a page.

Padāṅkadūta-ṭīkā, a commentary on *Kṛishṇaśarman's* poem, by *Rāmahari.*

It begins:

नत्वा स्वेष्टपदारविन्दयुगलं स्वेष्टार्थदं वाञ्छितं
संसारार्णवतारणैकपरमं योज्ञं कृपासागरं ।
श्रीकृष्णस्य पदाङ्कदूतरचनाग्रन्थस्य टीकां मुदा
विप्र: संतनुते श्रिया हरिपरो राम: स्वयं यत्नत: ॥

It ends: इति श्रीकृष्णसार्वभौमभट्टाचार्यकृतपदाङ्कदूतटिप्पनी समाप्ता ॥

नवीनजलदद्युतिक्षिति ⏑ – ⏑ निस्तारिणी-
पदाम्बुजकृपावशात्परमदेवचित्तस्थिर: ।
कृती द्विजतनु:श्रिया वितनुते ऽत्र टीकां मुदा
परं तु मथुरापतेश्चरणचिह्नदूतस्य वै ॥

[H. T. Colebrooke.]

3890.

1384 b. Foll. 15; size 14¼ in. by 5 in.; careless, modern Bengālī handwriting; six lines in a page.

Pānthadūta-kāvya, a poem in 105 verses (in the *śārdūlavikrīḍita* metre), by *Bholānātha,* a Vaishṇava Brāhman of Ṭikurī.

The subject of the poem is a love-message sent by a *gopī* (perhaps *Rādhā*) to her lord through a pilgrim who passes by on his way to Mathurā.

It begins:

भक्तोद्धारणकारणादवतरिष्यन्त्या स्वशापच्छलात्
स्वच्छन्दं सवयस्यया सकृपया गोलोकतो गोकुले ।
ह्लादिन्या परकीययेव सहितो हृष्टो ऽवतारीह य:
श्रीकृष्णो ऽवततार व: सरसिक: स्वान्तं समुल्लासयेत् ॥ १ ॥

भूमौ दैत्यभुवो भवं प्रभजता भूभावभूमीभुजां
  निर्भाराय भुवो भवाम्बुधिभियामाभीरवामभ्रुवां ।
सौभाग्याय च शम्भुवा विभवभूभाव्यो ऽभवो ऽप्युद्भवं
  यो लेभे भवतां भवोद्भवभयाभावे स भूयाद्भृशं ॥ २ ॥

काचित्क्वापि दिने दिवाकरसुताकूले सखीभिः समं
  प्रत्यूषे विरहग्रहग्रहणतो वैवश्यमाप्नाष सा ।
कृष्णं तज्जलनीलपेशलतनुं स्मृत्वापतन्मूर्छिता
  दूतोदन्तजनैर्विबुध्य मथुरापान्थं कमूचे(!) वचः ॥ ३ ॥

साधो स्वागतमास्यतामिह महातीर्थे कलिन्दात्मजा-
  तीरे नीरजनिःसरन्मृदुमरुत्संचारतश्चारुणि ।
दृग्धारानिधनाय साधुविधिना गोधुग्वधूनां पुनस्
  त्वत्सङ्गो विहितो हि साधु मिनन्[1] संतापसंतापनं ॥ ४ ॥
गन्तव्यं तव भव्य किं मधुपुरीत्याकर्ण्य कर्णप्रियं
  भद्रं भद्रमनूद्य साह भवता कार्योद्यमो मामकः ।
कर्तव्यो भवितव्यमेव भविता संपादिते प्रोद्यते
  कार्या(? कार्ये) सिद्धिरपि प्रभुस्तवगुणाय(?) स्यान्ममापि
    [ध्रुवं ॥ ५ ॥

It ends :

मालाकृतेव कुसुमोत्थमिवाक्षमेण
  प्रेम्णा गुणेन च मया ग्रथितं हि हारं ।
राधोत्थितप्रमदसार[गुणं] पवित्रं
  कुर्वन्ति के सहृदया हृदये न मोदात् ॥ १०३ ॥

कुर्यात्पादमहः प्रभोर्मुरमथश्चेतो [ऽ]वदातं तयोर्
  निर्मन्थ्यं मम तत्कलापचरिकृल्लेशं(?) सुरैः काङ्क्ष्यते ।
हृत्स्थं भूरि यथेन्धनान्तरगतं ज्योतिर्विभाव्यं मुदा
  दान्तो व्याकुरुते निजे हि हृदये मोदान्विते यत्सदा ॥ १०४ ॥

श्रीसीतापतिसेवकेन टिकुरीवासेन काव्यं मुदा
  भोलानाथधरामरेण रचितं यत्पान्थदूताह्वयं ।
राधाकृष्णपदारविंदविगलन्मध्वादराः सादराः
  सन्तस्तत्परिशीलयन्तु सततं संतोषसंप्राप्तये ॥ १०५ ॥

[H. T. Colebrooke.]

3891.

1177k. Foll. 14; size 13 in. by $4\frac{3}{4}$ in.; fair, modern Bengālī handwriting; eight lines in a page.

Haṃsadūta, a poem, by *Rūpa* (or, as he is here called, *Rūpadeva*) *Gosvāmin*, in 142 stanzas, picturing *Rādhā* as sending a love-message to *Kṛishṇa*, who is absent at Madhupurī.

It begins: दुकूलं बिभ्राणो दलितहरितालद्युतिहरं °

Printed in Hæberlin's Sanscrit Anthology, pp. 374–400, and in other collections.

[H. T. Colebrooke.]

3892.

570b. Foll. 32; size $12\frac{3}{4}$ in. by $5\frac{3}{4}$ in.; large, modern Bengālī handwriting; six lines in a page.

Haṃsadūta, by *Rūpa Gosvāmin.*

On the margin are inscribed occasional notes of explanation.

[H. T. Colebrooke.]

3893.

570a. Foll. 30; size and writing as in last MS.

Uddhavadūta, another poem, in 131 verses, composed (? by *Rūpa Gosvāmin*) in imitation of the *Meghadūta*. In this instance it is *Kṛishṇa* who sends his love-message to *Rādhā* through his friend and adviser *Uddhava*.

The poem has been printed, under the title of *Uddhavasandeśa*, in Hæberlin's Sanscrit Anthology (pp. 323–347); whilst a different *Uddhavadūta* (by *Mādhavakavīndra* of Tālitanagara) is given in the same Anthology (pp. 348–373), as also in the *Kāvyasaṃgraha* (1872, 1888) and *Kāvyakalāpa* (1864).

It begins with a verse not given in the edition:

विभ्रद्विद्युद्वसनममलं प्राणिनिस्तारहेतुः
  संसाराग्नेः शमनसुपटुर्नीलकण्ठस्य बन्धुः ।

[1] ? मिनं orig. MS., corr. to मिलं.

रासाभुक्तव्रजपरिलसच्चातकाना(? °ञा) विधुन्वन्
चास्तां चित्ते सरसहृदयः कृष्णमेघः सदा मे ॥ १ ॥
सान्द्रीभूतैर्नवविटपिनां पुष्पितानां वितानैः °

The MS. omits the last verse of the edition (श्रीदामाद्यैः °), ending with the verse गोष्ठक्रीडोल्लासितमनसो ° and the colophon: इति श्रीकृष्णचरितमुद्धवदूताख्यं खण्डकाव्यं समाप्तं ॥

[H. T. Colebrooke.]

3894.

823c. Foll. 17; size 12¾ in. by 4½ in.; fairly good, modern Bengālī handwriting (without diacritic r-point); eight lines in a page.

Uddhavacarita, a poem, composed by *Raghunandana Dāsa*, in 163 verses in the *mandākrāntā* metre; in which *Uddhava* appears in the character of a confidant of *Krishṇa*, bearing messages backward and forward between the god and his female companions, who are rendered desolate by his disappearance.

It begins:

श्रीशो भूत्वा मधुपुरजनानन्दसंदोहवर्षी
ज्ञात्वा गोपीविरहविदशां जातकारुण्यभावः ।
आत्मीयत्वं मृदुमधुरताश्चेपि साकूतवाचा
प्रोवीकुर्वन्(? प्रोच्चो°) रहसि विनयादुद्धवं व्याजहार [॥ १ ॥
यद्युक्तो ऽसि प्रकृतिशबलः कृत्यसंपादनात्मा
रागौदार्यव्यवहृतिपटुर्गूढवाचां प्रगोप्ता ।
तस्मादस्मिन्न इति विधये(? विषये) मां नियोक्तुं मदीयं
चेतो ऽत्यर्थं त्वरयति मुहुस्तत्तु संपादनीयं ॥ २ ॥
यो मामन्तःकरणकलितस्नेहभावानुरक्त्या
ध्यायेद्दीमत्रहमपि तथा तत्र हार्दी भवामि ।
यद्विच्छेदाद् व्यसनविकला मद्गुणग्रामगीता
मद्दैन्यार्ता व्रजयुवतयो मां सदुद्वेजयन्ति ॥ ३ ॥

It ends:

इत्थं श्रुत्वोद्धववदनतो माधवो व्याकुलात्मा
संप्रावोचज्ञनिति मकृपं साश्रुसंपूर्णनेत्रः ।
यद्विच्छेदव्यथितहृदयाः सन्ति ये ये व्रजस्था
आनेतव्याः प्रियतम सखे मत्समीपं पुनस्ते ॥ १६२ ॥
मासुद्धान्तर्भुवि मम पुरो द्वारिकाख्या यदाख्या
भाव्या तस्यां मधुनगरतः संप्रयास्यामि तर्हि ।
श्रीनन्दाद्यं तदधिवसतिं सर्वमानीय तस्यां
वासः कार्यः सह सहचरैस्तैर्यदीयैर्व्रजेन ॥ १६३ ॥
इति श्रीरघुनन्दनदासविरचितं उद्धवचरितं समाप्तं ॥

[H. T. Colebrooke.]

3895.

12. Foll. 11; size 12 in. by 7 in.; large, modern Devanāgarī writing; five lines in a page.

Mukundamuktāvalī, a poem in honour of *Vishṇu*, ascribed to *Rūpa Gosvāmin.*

It begins:

नवजलधरवर्णं चंपकोद्भासिकर्णं
विकसितनलिनास्यं विस्फुरन्मंदहास्यं ।
कनकरुचिदुकूलं चारुबर्हावचूलं
कमपि निखिलसारं नौमि गोपीकुमारं ॥

The poem consists of 30 verses, two and two of which are in the same metre (or tune).

It ends:

पशुपयुवतिगोष्ठी चुंबितश्रीमदोष्ठी-
स्मरतरलितदृष्टिर्निर्मितानंदवृष्टिः ।
नवजलधरधामा पातु वः कृष्णनामा
भुवनमधुरवेषा मालिनीमूर्तिरेषा ॥ ३० ॥ मालिनी ॥
इति श्रीमुकुंदमुक्तावली संपूर्णा ॥

It was published (with a commentary of his own) by *Premacandra Tarkavāgīśa*, Calc. 1859; also in the *Kāvyamālā.*

The author's name is not mentioned in this MS. [? J. R. Ballantyne.]

3896.

1184g. Foll. 8; size 13 in. by 4¾ in.; good, modern Bengālī handwriting; six lines in a page.

Mukundamuktāvalī-ṭīkā, an anonymous commentary on *Rūpa Gosvāmin's* poem.

It begins :

ओं नमः श्रीगोविन्दाय ॥ नवजलधरेत्यादि ॥ अथ वृत्त-मुक्तावल्या मुकुन्दं स्तौति । नवेत्यादिभिः । °

It ends :

> तस्यैव हरिधर्मस्य यदिच्छोक्तिः पुनः पुनः ।
> तं गाढरागान्नावद्यमेतत्तद्भक्तलक्षणं ॥

इति श्रीलश्रीरूपगोस्वामिविरचितमुकुन्दमुक्तावलीस्तोत्रस्य टीका संपूर्णा ॥

[H. T. Colebrooke.]

3897–3899.

1184 d, e, f. Foll. 26 ; size 13 in. by 4¾ in.; good, modern Bengālī handwriting ; six lines in a page.

Three poems in honour of *Vishṇu* and *Kṛishṇa* :—

I. *Mukundamuktāvalī,* in 30 verses, as above, foll. 1*b*–4*a*, without the author's name.

II. *Manodūtakāvya,* foll. 4*b*–14*a*, a poem in 101 *vasantatilaka* verses, in which the poet, who calls himself *Vishṇudāsa Kavīndra,* makes his own mind the messenger for conveying his feelings of devotion to *Vishṇu.*

It begins :

> निर्वर्ण्य तानि रहसि स्वयमर्जितानि
> भूयस्तराणि दुरितानि सुदुःसहानि ।
> श्रुत्वा च कालविहितान्यवशेन्द्रियाणां
> दुःखान्यचिन्तयत कश्चन विष्णुदासः ॥ १ ॥
> इष्टो धनैः शमदमादिभिरेव योगः
> क्षान्त्या तपो बहुविधभ्रमतश्च तीर्थं ।
> तत्किं करोमि विकलो ऽहमितः क्व यामी-
> त्येवं विलप्य शरणं हरिमानृचोचे(?) ॥ २ ॥

It ends :

> बन्धुस्त्वमेव हृदयार्पयथं(°स्यपथ R.M.) प्रपन्नं
> सत्यं रिपुर्विपथगामितया त्वमेव ।
> तत्कातरे मयि विधेहि कृपां यदेतद्(यदै° R.M.)
> उक्तं कुरुष्व मुरवैरिपदे(मु° R.M.) रमस्व ॥

इति श्रीविष्णुदासकवीन्द्रविरचितं मनोदूतकाव्यं समाप्तं ॥

For another MS. of this poem (wanting the first leaf) see Rāj. Mitra, Notices, ii., p. 56.

For a *Manodūtikā,* by an unknown poet, see Stein, Cat. of Jammu MSS., p. 287.

III. A poem in prose and verse, by *Gopāla-bhaṭṭa,* descriptive of *Kṛishṇa's* sports with *Rādhā* and the Gopīs, and perhaps forming part of a larger work (foll. 14*b*–26*b*).

It consists of four chapters, viz.: *vasana-cauryakelivartanam* (ends fol. 17*b*), *bhārakhaṇḍa* (fol. 20*a*), *pārakhaṇḍakelivartanam* (fol. 24*a*), and *dānakhaṇḍa* (fol. 26*b*).

Chapter 1 begins :

> यं ब्रह्मा वरुणेन्द्ररुद्रमरुतस्तन्वन्ति दिव्यैः स्तवैर्
> वेदैः साङ्गपदक्रमोपनिषदैर्गायन्ति यं सामगाः ।
> ध्यानावस्थिततद्गतेन मनसा पश्यन्ति यं योगिनो
> यस्यान्तं न विदुः सुरासुरगणा देवाय तस्मै नमः ॥ १ ॥
> जयति जलनिवासो(!) देवकीजन्मवादो
> यदुवरपरिषत्स्वैर्दोर्भिरस्यन्नधर्मं ।
> स्थिरतरवृजिनघ्नः सस्मितश्रीमुखेन
> व्रजपुरवनितानां वर्धयन्कामदेवं ॥ २ ॥

Ch. 2 : ततो दिनान्तरे दधिविक्रयणार्थं मथुरां व्रजन्तीनां गृहीतधुराणामग्रत एवापरः(?°रतः) ॥

> राधानुरोधवसतो(°वशतो) निजलीलया च
> स्कन्धे निधाय दधिभारमपारमायः ।
> कौतूहलेन कपटेन च मन्दमन्दं
> कृष्णः कलिन्दतनयातटमाजगाम ॥ ३० ॥

Ch. 3 :

> विक्रीय तक्रमचिरेण निवर्तमानां
> राधां सुधाकरमुखीमभिवीक्ष्य दूरे ।
> कूले निधाय तरणिं सहसा मुरारिर्
> धूलीगृहीतरविज्ञा(?धूलीं गृ°ज्ञां) पुलिने तनोति ॥

राधा सत्वरमागत्य कृष्णं प्रति ॥

> क्षणं धूलिक्रीडां परिहर समारोह तरणिं
> मुरारे चण्डांशुश्चरमगिरिचूडामणिरभूत् ।
> पुरः प्राचीम्लानं बहुलजलसंभारभवितं
> स्फुरद्विद्युन्मालं किमु घनकुलं नाकलयसि ॥

Ch. 4: ततो दिनान्तरे व्रजाङ्गना भारमादाय गव्यं विक्रेतुं मथुरां व्रजन्तीरालोक्य कृष्णो जगदे ॥

अत्र क्षणं विरम सुन्दरि नीपमूले
कूले कलिन्ददुहितुः सह गोपिकाभिः ।
अद्य त्वया किमपि न श्रुतमस्ति भावे
पारे कलिन्ददुहितुः करमाचकार ॥

It ends: ततो राधा ॥
अन्योन्यबाहुपरिशीलितकण्ठदेशं
शश्वन्मिथःस्मरकथास्मितसुन्दरास्यं ।
लीलाभ्रमन्मधुरगुञ्जितचञ्चुपुञ्जं(?)
कुञ्जं जगाम तवपा(? तरसा) हरिणायताक्षी ॥

ततस्तत्र गत्वा सखिभिः सुरतमनुभूय निजभवनं जगाम । राधापि सखीभिः सह मथुरां गतवती ॥ इति श्रीगोपालभट्टविरचितो दानखण्डः समाप्तः ॥ [H. T. COLEBROOKE.]

3900.

1605c. Foll. 35; size 9½ in. by 4 in.; fair Devanāgarī writing of about 1750 A.D.; eight lines in a page.

Kṛishṇakarṇāmṛita-stotraratna, a poem, of three *śatakas,* in praise of the youthful *Kṛishṇa,* by (*Bilvamaṅgala,* also called) *Līlāśuka,* pupil of *Somagiri* (?). [A.]

The three *śatakas,* here consisting of 113, 111 and 108 verses respectively, begin thus:

I. चिंतामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिञ्छमौलिः ।
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥ १ ॥
अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं
वस्तुप्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलं ।
स्रस्तस्रस्तनिरुद्धनीविविलसद्गोपीसहस्रावृतं
हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृतिं ॥ २ ॥
चातुर्यैकनिधानसीमचपलापांगच्छटामंथरं (° मंथरं)
कारुण्यामृतवीचिलोलितदृशं लक्ष्मीकटाक्षादृतं ।
कालिंदीपुलिनांगणप्रणयिनं कामावतारांकुरं
बालं नीलममी वयं मधुरिमस्वाराज्यमाराधुमः ॥ ३ ॥

II. अभिनवनवनीतस्निग्धमापीतदुग्धं
दधिकणपरिदिग्धं मुग्धमंगं मुरारेः ।
दिशतु भुवनकृच्छ्रच्छेदिता पिच्छगुच्छ-
च्छविनवशिखिपिच्छालांछितं वांछितं वः ॥ १ ॥

III. अस्ति स्वस्त्ययनं समस्तजगतामभ्यस्तलक्ष्मीस्तनं
वस्तुध्वस्तरजस्तमोभिरनिशं न्यस्तं पुरस्तादिव ।
हस्तोदस्तगिरींद्रमस्तकतरुप्रस्तारविस्तारित-
स्रस्तस्वस्तरुसूनमस्तरलसत्प्रस्तावि राधास्तुतं ॥ १ ॥

It ends: कोदंडमैश्वमखंडमिषुं ° ॥ १०६ ॥
या प्रीतिर्विदुरार्पिते ° ॥ १०७ ॥
जयतु जयतु देवो देवकीनंदनो ऽयं
जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।
जयतु जयतु मेघः श्यामलकोमलांगो
जयतु जयतु पृथ्वीभारनाशो मुकुंदः ॥ १०८ ॥

इति श्रीलीलाशुकविरचिते श्रीकृष्णकर्णामृतस्तोत्ररत्ने त्रिशतकं संपूर्णं ॥

The verse from the *Karṇāmṛita* quoted above, p. 813*b*, occurs as I. 55 of this MS.; but not those quoted from *Bilvamaṅgala* (for which see, however, the quotations in the *Sumaṅgalastotra,* below, p. 1474*b*). [H. T. COLEBROOKE.]

3901.

1994. Foll. 40; size 8¼ in. by 4 in.; clear, modern Devanāgarī writing (European paper); ten lines in a page.

The same work. [B.] The MS. is very far from correct.

I. consists of 105 verses; but in colophon: द्वादशस्तोत्रश्लोकोत्तरशतसंख्यातं ° प्रथमशतकं ।

II., 105 verses, but in colophon: द्वादशश्लोकोत्तरशतसंख्यातं ° द्वितीयशतकं ।

III., 89 verses, ends: कोदंड ° ॥ ८६ ॥ या प्रीति ° ॥ ८७ ॥ जयतु ° ॥ ८८ ॥

गोपाल मूले वदनानिलेन
किं पूरिते वत्स पयोधरार्थं ।
कुचौ मदीयौ पयसा विहीना (° नौ)
यतांचकता (?) कुरु मे मुकुंद ॥ ८९ ॥

इति श्रीकृष्णलीलाशुकमुनिविरचितं श्रीकर्णामृतस्तोत्ररत्नाकरं (° रत्नं I., II.) तृतीयशतकं संपूर्णं ॥

[DR. JOHN TAYLOR.]

3902.

74. Foll. 16; size $10\frac{3}{4}$ in. by $3\frac{3}{4}$ in.; indifferent Devanāgarī writing of about 1750 A.D.; ten lines in a page.

The same work, here called *Kṛishṇastotra,* and ascribed to *Bilvamaṅgalācārya.* [C.]

The three sections consist of 106, 109 and 67 verses respectively; but in the first century the above figure includes a number of verses supplied in the margin, whilst others (as *e.g.* 107–112) are marked as omitted in the margin. From the colophon it appears that the copyist on purpose omitted some verses.

The text ends as MS. A, after which the colophon: इति श्रीविल्वमंगलाचार्यविरचितान्त्रिशतपद्यात्मककृष्णस्तोत्रात्कानिचिद्रम्यपदानि लिखितानि स्वार्थं परार्थं च ॥

[H. T. Colebrooke.]

3903.

1177f. Foll. 9; size $13\frac{1}{4}$ in. by $4\frac{1}{2}$ in.; fair, modern Bengālī handwriting; seven lines in a page.

Līlāśuka's Kṛishṇakarṇāmṛita, śataka I., consisting of 112 verses. [D.]

[H. T. Colebrooke.]

3904.

1293. Foll. 108; size $12\frac{3}{4}$ in. by 5 in.; fair, modern Devanāgarī writing; nine lines in a page.

Karṇāmṛitavyākhyā, also called *Suvarṇacashaka,* a commentary on the *Kṛishṇakarṇāmṛita,* by *Pāpa Yallaya Sūri,* son of *Tirumalla Bhaṭṭopādhyāya* and *Koṇḍamāmbā;* with the text of *Līlāśuka's* poem between the commentary.

The three *śatakas,* consisting of 111, 110 and 106 stanzas resp., have separate paginations; mistakes occurring in *śat.* II., where no. 36 is passed over and the last leaf is misplaced at the end of the whole work; and in *śat.* III., where nos. 28–37 are passed over without any omission.

It begins:

श्रीरामं सीतया साकं मुकुंदं मौलिशेखरं ।
यज्वानं वाजपेयेन यज्ञेशं प्रणतो ऽस्म्यहं ॥ १ ॥
येषां संदर्शनेनैव षट्शास्त्रवशगो भवेत् ।
यतींद्रान्वासुदेवेन्द्रान्नमामो ऽभीष्टसिद्धये ॥ २ ॥
वसुमत्यन्वये जातपापयल्लयसूरिणा ।
कर्णामृतस्य व्याख्यानं क्रियते कृतिनां मुदे ॥ ३ ॥
मंत्रशास्त्रे महाभाष्ये मणिमीमांसयोः सदा ।
मतिर्यस्य भवेत्तेन मंतव्या कृतिरीदृशी ॥ ४ ॥ ० ५ ॥
पेद्दिभट्टादिभिः प्राप्य यशसे प्रार्थनानि मे ।
किंतु कृष्णस्मृतिर्नित्यं भवत्विति मतिर्मम ॥ ६ ॥
अर्थांतरपरिस्फूर्तिर्यत्र क्वापि भवेद्यदि ।
भाट्टाप्रभाकरौ(!) दृष्ट्वा परितुष्यंतु ते जनाः ॥ ७ ॥
अज्ञानाद्यत्र कुत्रापि विपरीतार्थवर्णनं ।
कृतं चेत्क्षाम्यतां तत्तद्विद्वद्भिर्वीतमत्सरैः ॥ ८ ॥ ०

अत्र ग्रंथकर्ता ग्रंथं चिकीर्षुः आदौ गुरून् महीकरोति । चिंतामणिरिति । ० चिंतामणिर्नाम मंत्रविशेषो यच्चिंतनवशात्कृतार्थो ऽभूत्कविः । स जयति सर्वोत्कर्षेण वर्तत इत्यर्थः । न तु गुरुं प्रकाशयेद्धीमान्न तु मंत्रं प्रकाशयेदित्यादिना मंत्रो न प्रकाश्यत इति चेन्न तच्चिंतामणिमंत्रचिंतनफल इत्यादिना श्रीहर्षेण प्रकाशितत्वात् । स्मृतिस्तु साध्यमंत्रविषया न तु सिद्धमंत्रविषयेति ज्ञेयं। यद्वा चिंतामणिरिति कश्चिद्योगी यत्संनिधाने कविना योगाभ्यासः कृतः । यद्वा चिंतामणिरिति सोमगिरेर्विशेषणं । तस्मिन्पक्षे चिंतामणिवदभीष्टप्रदाता सोमगिरिर्नाम काचिद्वारवनितेति वा । यद्वा । उक्तविशेषणविशिष्टः सोमगिरिर्नाम महावाक्योपदेष्टा गिरिसंप्रदायप्रवर्तकः । मे मम गुरुर्जयति । शिक्षागुरुरंतर्यामित्वेन शिक्षकः शिखिनः मयूरस्य पिच्छं बर्हं मौलौ शिरसि यस्य स तथोक्तः । भगवान् षड्गुणैश्वर्यसंपन्नः श्रीकृष्ण इत्यर्थः । सो ऽपि जयति । ०

It ends: या प्रीति० ॥१०६॥ इति श्रीपदवाक्यप्रमाणपारावारपारीणश्रीमहोपाध्यायतिरुमलभट्टपुत्रेण कोदंडमांबा (कोंतमांबा I.; कोंडमांबा II.) गर्भशुक्तिमुक्तामणिना पापयल्लयसूरिणा विरचितायां कर्णामृतव्याख्यायां सुवर्णचषकसमाख्यायां तृतीयो ऽध्यायः ॥

There is much uncertainty about the Sanskrit spelling of these apparently Tamil names; the father's name appearing in the colophons as **तिरुमल**, the mother's as **कोंतमांबा**, **कोदंडमांबा** and **कोंडमांबा**, and the author's name as **पययज्ञय**, **पापपज्ञय** and **पापयज्ञय**.

[H. T. Colebrooke.]

3905.

2577. Foll. 46; 4to, size 10 in. by 8½ in.; modern Telugu writing; 31–33 lines in a page. Foll. 12*b* and 14*b* have been left blank.

Līlāśuka's Kṛishṇakarṇāmṛita, with *Pāpa Yallaya Sūri's* commentary. *Adhyāya* (or *śataka*) II. and III., of 110 and 106 stanzas resp.

The commentary begins:

> लोकप्रसिद्धकोदंडबाणान् त्यक्त्वैश्वं धनुः ।
> पुष्पास्त्राण्यपि वेणवादीन्नमो रामाय गृह्णते ॥

पूर्वशतकांते तु यद्वैभवमेव मदीयं ज्ञानकरणं गोचरयन्वितुक्तं तद्वैभवं येन येन प्रकारेण प्रतीतं तेन तेन प्रकारेणाह। अभिनवेत्यादिना । ०

Adhy. III. beg. fol. 24:

> व्याख्यामुकुलसङ्खानि पंकजं पार्थसारथिं ।
> भजे ऽहं परमानंदमनं(? ०मेनं) पद्मालयापतिं ॥

(Text:) अस्ति स्वस्त्ययनं ० ॥ १ ॥

It ends: इति श्रीपदवाक्यप्रमाणपारावारपारीणवसुमतीतिरुमलभट्टोपाध्यायपुत्रेण कोंडमांबागर्भशुक्तिमुक्तामणिना पापयज्ञयसूरिणा विरचितायां [कर्णामृतव्याख्यायां *adhy.* II.] सुवर्णचषकसमाख्यायां तृतियो ध्यायः ॥

[Mackenzie Collection.]

3906.

823 d. Foll. 38; size 12¾ in. by 4½ in.; fairly good, modern Bengālī handwriting; eleven lines in a page.

Sārańgarańgadā, a commentary, by *Kṛishṇadāsa*, pupil of *Rūpa Gosvāmin*, on the first *śataka* of the *Kṛishṇakarṇāmṛita*.

It begins:

> कृपासुधासरिद्यस्य विश्वमाप्लावयन्त्यपि ।
> नीचगैव(निचलैव N.) सदा भाति तं श्रीचैतन्यमाश्रये॥१॥
> वमन्ती कृष्णमाधुर्यकेलिसौन्दर्यसंपदं ।
> कैश्चिन्न भावज्ञा सम्यग् ज्ञेया लीलाशुकस्य गीः ॥ २ ॥
> मन्दो ऽपि कश्चित् श्रीरूपपादाम्भोजमधून्मदः ।
> कृष्णकर्णामृतव्याख्यां विवृणोति यथामति ॥ ३ ॥
> स्पष्टे चाष्टदशोक्त्यर्थे निर्बन्धं परिमुञ्चता ।
> निगूढो ऽन्तर्देशोक्त्यर्थो व्याख्येयः साग्रहं(? साम्प्रतं) मया॥४॥
> मदास्यमरु[त्]संचारखिन्नांगा गोकुलोन्मुखीं ।
> सन्तः पुष्यन्तीमां स्निग्धां कर्णकासारसंनिधौ ॥ ५ ॥
> सद्भक्तभावगन्धर्वगान्धर्वभवलम्पटैः ।
> सारङ्गैः शोध्यतामेषा टीका सारङ्गरङ्गदा ॥ ६ ॥

अथ दाक्षिणात्यः कृष्णवेणापश्चिमतीरवासी पण्डितकवीन्द्रः श्रीविल्वमङ्गलनामा कश्चिद् ब्राह्मणः किलासीत् । स च पूर्वदुर्वासनाप्रेरितस्तत्पूर्वतीरनिवासिन्यां कस्यांचिच्चिन्तामणिनाम्न्यां वेश्यायामतीवासक्तो बभूव । स कदाचित् प्रवृद्धतमिस्रायां जीमूतमन्द्रगर्जितजातहृच्छयो ऽन्ध इवागणितप्रत्यूहचयः स्वगृहान्निर्गत्य तां नदीं हस्ताभ्यां सचालयनेनोत्तीर्य(*r.* शवा०) कीलितकपाटं तदावासद्वारमाससाद । तत्रापि तत्र वै(*r.* तत्राप्य-) श्रुतफुत्कारशत इतस्ततो भ्रमन् भित्तिगर्तेऽर्धप्रविष्टकृष्णभुजङ्गपुच्छमालम्ब्य भित्तिमुल्लङ्घ्य प्रणालिकामध्ये निपतन्मूर्छितो बभूव।०(cf. Oxf. MS., no. 231[1]) सार्वलौकिकी प्रसिद्धिरिति ॥ अथवा सर्वोन्मत्तः स्वालयात् श्रीवृन्दावनाय प्रस्थानं कुर्वन्नेव श्रीलीलाशुकः स्वगुरोः स्वगुरुत्वेनैव स्वेष्टदैवतस्य च संकीर्तनरूपं मङ्गलमाचरति स्म। ० गुर्विष्टदेवस्मरणं तद्यथा चिन्तामणिरित्यादि । सोमगिरिस्तन्नामा मे मम गुरुः जयति सर्वोत्कर्षेण वर्तते। कीदृक् । चिन्तामणिः आश्रयमात्रेणाभीष्टपूरकत्वात् चिन्तामणित्वं सर्वसेविता चास्य । किं वा जयति तं प्रति प्रणतो ऽस्मीत्यर्थः । ० । तथा मे ममेष्टदैवतं भगवांश्च जयति । को ऽयं भगवानित्यचाह । शिखिपिच्छमौलिः ०

It ends:

> जयतां सुरतौ पङ्गोर्मम मन्दमतेर्गती(!) ।
> मत्सर्वस्वपदाम्भोजौ राधामदनमोहनौ ॥ १ ॥

---

[1] Of *variæ lectiones* of our MS. may be mentioned: स्वः सर्वं twice for स्वसर्वं; रासकुञ्जादिलीला०(!) for राजकुंजादि०; and कृष्णलीलादिवर्णनमयग्रन्थांश्चकार for श्रीकृष्णलीलादिवर्णनग्रंथांश्चकार ।

जयति मधुरराधाकृष्णलीला° २ ॥
अचक्षुषो पथि मेऽन्धस्य स्खलत्पादगतेर्मुहुः ।
स्वकृपायष्टिदानेन सन्तः सन्त्ववलम्बनं ॥ ३ ॥
श्रीरूपचरणाम्भोजालिकृष्णदासेन निर्मिता ।
कृष्णकर्णामृतस्यैषा टीका सारङ्गरङ्गदा ॥ ४ ॥

Though the author's name is not mentioned in the Oxford MS., this is doubtless the commentary referred to by Wilson, Sel. Works, i., p. 168. Whether it extended beyond the first *śataka* seems doubtful, seeing that the other MSS. of which particulars are given correspond to ours. Cf. Notices, 2nd ser., i., p. 71 (beginning, like the Oxf. MS., with an additional verse: यद्भावभावितधियो ऽघ वाचां°).

[H. T. Colebrooke.]

3907.

564. Foll. 64 (the first of which was lost and replaced by two leaves); size 12½ in. by 6 in.; fair Devanāgarī writing of about 1780 A.D.; 9–15 lines in a page.

Sumaṅgalastotra, by *Bilvamaṅgala*; with a (partial) commentary, called *Bhaktavallabhā*, by *Bhaṭṭa Vanamālin.*

The work is of essentially the same character as the same author's *Kṛishṇakarṇāmṛita*, with which it has indeed much of its matter in common, and with which it seems actually identified by the commentator. But, besides containing a good deal of new matter, it is arranged in a totally different way, so as virtually to constitute a different work.

The text begins:

चिंतामणिर्जयति सोमगिरिर्गुरुर्मे° ॥ १ ॥
मातर्नातः परमनुचितं यत्खलानां पुरस्ताद्
अस्ताशंकं जठरपिठरीपूर्तये नर्तितासि[1] ।
तत्क्षंतव्यं सहजसरले वत्सले वाणि कुर्यां
प्रायश्चित्तं गुणगणनयोगोपवेषस्य विष्णोः ॥ २ ॥

[1] See the comment on p. 1475*a*.

यो लोकभारोद्धरणाय चक्री
चक्रे ऽवतारं वसुदेवगेहे ।
गोपीजनानंदकरो मुकुंदः
पायात्स वो यादवराजसिंहः ॥ ३ ॥
आवबंध मुकुटं कुटुंबिनी
तत्र मूर्धनि मुकुंदजन्मनि ।
यत्र रंगचितपुष्पपल्लवैर्
बल्लवीभिरपि पर्यधीयत ॥ ४ ॥
उपासतां ब्रह्मविदः पुराणाः
सनातनं ब्रह्म निरुद्धचित्ताः ।
वयं यशोदासुतबालकेलि-
कथासुधासिंधुषु मज्जयामः ॥ ५ ॥
विहाय पीयूषरसं मुनीश्वरा
ममांघ्रिराजीवरसं पिबंति किम् ।
इति स्वपादांबुजपानकौतुकी
स गोपबालः श्रियमातनोतु नः ॥ ६ ॥

The work, consisting of 383 stanzas, shows the following topics: *iti kaumāram* (after v. 69), *kaiśorakeliḥ* (v. 233), *tāruṇyam* (v. 240), *iti kaviprasādaḥ, samāptaṃ gokulacaritāmṛitam* (v. 271), *mathurācaritam* (v. 286), *dvārakācaritaṃ samāptaṃ kṛishṇacaritāmṛitam* (v. 306), *śrīnārāyaṇastutiḥ* (v. 331), *śivastutiḥ* (v. 336), *hariharastutiḥ* (v. 338), *nṛisiṃhastutiḥ* (v. 342), *rāmacaritāmṛitam* (v. 355).

It ends:

यं शैवाः समुपासते शिव इति ब्रह्मेति वेदांतिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सो ऽयं नो विदधातु वांछितफलं श्रीदेवकीनंदनः ॥ ३८० ॥
इति समाप्तं स्तोत्रम् ॥

अमीभिरष्टाभिरभिष्टुतः स्तवैः
शतेन देवः शतपत्रलोचनः ।
किशोरवेषे न कृपासुदः स्वयं
विराजमानो हृदि मे विराजताम् ॥ ३८१ ॥
श्रीवासुदेवकृतभक्तिरतिप्रसिद्धो
योगीश्वरो विदिततत्त्वमतिः प्रशांतः ।
मुक्त्यै पदं भुवि चिकाय परं पवित्रं
द्वारावतीं ननु जगाम नमन् हरिं सः ॥ ३८२ ॥

हस्तौ सुयोज्य हरिभक्तिरतश्चकार
स्तोत्रं वरं हरिविलोकनकांक्षयासौ ।
श्रीविल्वमंगल इदं पठतो जनस्य
प्रीतो हरिर्दिशति भक्तिमतिप्रगल्भाम् ॥ ३८३ ॥

इति श्रीविल्वमंगलकृतं सुमंगलाख्यं स्तोत्रं समाप्तं ॥

The four verses quoted in the *Bhaktirasāmṛitasindhu*, above fol. 813*b*, as extracted from *Bilvamaṅgala* and *Bilvamaṅgalastotra* (and not found in the author's *Kṛishṇakarṇāmṛita*, cf. p. 1471*b*) occur here as vv. 305 (fol. 61*b*), 271 (fol. 60*a*), 189 (fol. 54*a*) and 245 (fol. 59*a*) resp.

Of the first 25 verses of this work the following occur also in the *Kṛishṇakarṇāmṛita*: 1 (=*K.* I. 1), 2 (II. 4), 5 (II. 55), 8 (III. 65), 13 (II. 54), 17 (II. 76), 21 (II. 69), 23 (II. 98), 24 (II. 82), 25 (II. 15); whilst of the last 25, not a single verse appears there; and of the last five verses commented upon, only the last two are found there (199 = III. 29, 200 = III. 80).

Bilvamaṅgala's Kṛishṇastotra (109 verses), printed at Calcutta (1817), represents a third work or version, which again has much in common with the present work, *e.g. S.* 2 (=*K.* 109), 5 (5), 11 (1), 12 (69), 13 (87), 14 (88), 201 (102).

The Commentary begins:

श्रीमद्गिरिवराधीशं वृंदारण्यपुरंदरं ।
कृष्णचंद्रं प्रपद्ये ऽहं भक्तानुग्रहकातरं ॥ १ ॥
नंदव्रजे यामरता नान्यत्रामरता समा ।
यत्र प्रातर्दिवा सायं नक्तं व्यक्तं परं महः ॥ २ ॥
कृष्णकर्णामृतस्यैषा टीका श्रीभक्तवल्लभा ।
भूनिर्ज्जरेण भट्टेन क्रियते वनमालिना ॥ ३ ॥

अथाखिलगोपनितंबिनीनिकरावलंबि रासविहारि श्रीकृष्णभावाविष्टः परमभागवतो लीलाशुकः श्रीकृष्णकर्णामृताख्यं स्तोत्ररत्नं चिकीर्षुः शिखिपिच्छमौल्यं(°स्यलं)कृतश्रीकृष्णचंद्रष्टदेवतानुस्मरणरूपं मंगलमाचरति चिंतामणिरिति॥ भगवान् जयति सर्वोत्कर्षेण वर्तते भगवान् श्रीकृष्ण एव।° कीदृशः। चिंतामणिः चिंतानां चिंत्यमानानां बाल्यादिकिशोरलीलातानां भक्तेषु मणिरिव प्रकाशकः।° पुनः कीदृशः। सोमगिरिः सोमस्यामृत[स्य] गिरिः पर्वत इ[ति] बहुप्रकारास्वाद्यपरमानंदनिर्झररसमयः। अथवा। उमया सह सोमः श्रीमहेशस्तस्य गिरिः पूज्य इति°। पुनः कीदृशः। मे मम गुरुः।°॥१॥ मातरिति°॥ हे मातर्वाग्देवि अतः परमन्यदनुचितं नास्ति।° खलानां श्रीकृष्णानुरागरहितानां पुरस्तादग्रे न्यस्ताशंकं। दूरीकृतये हि पारलौकिकभयं यथा तथा वृथा त्वं नर्तितासि। नर्तनं श्रीभगवदग्रे तद्भक्तानां वा समुचितमिति भावः।°॥ २ ॥

The commentary ends (fol. 56*b*) with the explanation of verse 200:

गोपीनामभिमतगीतहर्षवर्षाद्
आपीनस्तनभरनिर्भरोपगूढं(°गूढं) ।
केलीनामथतु रसैरुपास्य मानं
कालिंदीपुलिनचरं परं महो नः ॥ २०० ॥

गोपीनां सर्वतः पीनैः पुष्टैः स्तनभरैर्भारैर्निर्भरं गाढं उपगूढं आलिंगितं हेतुमाह। अभिमतः स्वस्याभीष्टो यो गीतवर्षः मधुरगानामृतवर्षस्य हर्षः आनंदस्तस्मात् तत्श्रवणादित्यर्थः॥ २०० ॥

[H. T. COLEBROOKE.]

3908.

2420 b. Foll. 34; size 8½ in. by 4 in.; fairly good Devanāgarī writing of 1494 A.D.; eleven lines in a page; foll. 1–3, 6, 10–12 supplied by a more recent hand.

Vishṇubhaktikalpalatā, a poem in eight *stavakas*, consisting of meditations and devotional effusions on the names and qualities of *Vishṇu*; by *Purushottama*, son of *Vishṇu* and *Mānī*.

The poem has been published in the *Kāvyamālā* (no. 31, Bomb. 1892). It begins:

अतिसुदृढमगातां हर्षमंगैकभावाद्
अधिकतममुमेशौ यं तथात्मैकयोगात् ।
तदधिकमिव यातौ यं सुतं वीक्षमाणौ
सफलयतु स देवो वः क्रतुं वक्रतुंडः ॥ १ ॥
स्फटिकमणिमयाद्य° ॥ २ ॥
हृदयजलजजाग्रज्ज्योतिर्° ॥ ३ ॥
अधिजगति जनानामेक एवास्त्युपायो
विषमतमभवाब्धिं तूर्णमेतं तरीतुं ।
श्रवणमननपूर्वं विष्णुपादारविंद-
स्मरणमिति तदेतत् प्रोच्यते भक्तिलोभात् ॥ ४ ॥

विमलयतु मनो मे दूषितं दोषसंघैर्
अहरहरिह रम्या रामचंद्रस्य भक्तिः ।
सगरतनयभूतिभ्रेषितं भूमिभागं
सुरसरिदिव दोषप्रोषविख्यातशक्तिः ॥ ५ ॥

I. contains 39 verses; II., 51; III., 41; IV., 41; V., 38; VI., 39; VII., 36; VIII., 40.

It ends:

मच्चेतोवृत्तिलक्ष्मीरहसि विहसिते हृत्सरोजे सुजाग्रद्-
विष्वक्सेनप्रसंगोत्सवमवगणितोपायसर्वांतरायां ।
संप्राप्य प्रेमपाथोनिधिलहरिपरिष्वाकुलाश्लिष्टवार्ढं
स्वामिव्यामिश्रभावं समलभत सुखे यत्र वाचां विरामः॥४०॥

इति श्रीविष्णुभक्तिप्रबंधे कल्पलताख्ये कविश्रीपुरुषोत्तमकृतौ चित्तप्रबोधो नामाष्टमः स्तबकः॥ समाप्तोयं विष्णुभक्तिकल्पलताख्यः। संवत् १५५१ वर्षे चैत्रे शुदि १० गुरौ दामोदरेण लिलिखे ॥

मानो माता पिता विष्णुर्यस्याख्या पुरुषोत्तमः ।
विष्णुभक्तिलतां चक्रे सतां चक्रे कृतांजलिः ॥

[GAIKAWAR.]

3909.

2468a. Foll. 66; size 10 in. by 6¼ in.; good, clear Devanāgarī writing of 1791 A.D.; fifteen lines in a page.

Vishṇubhaktikalpalatā, with a commentary (*vivaraṇa*), called *Kalpalatāprakāśa*, composed by *Mahīdhara* (or *Mahīdāsa*, as he is also called) in 1597 A.D. It begins:

नृहरिं गिरिजां गिरं गणेशं
गुरुपादाब्जयुगं शिवं प्रणम्य ।
हरिभक्तिलताभिधेयकाव्ये
विवृतिं वच्मि यथामतीशतुष्ट्यै ॥

तत्र स्वाभीष्टदेवतावर्णनरूपं विष्णुभक्तिकल्पलताख्यं काव्यं चिकीर्षुः प्रारिप्सितग्रंथनिर्विघ्नसमाप्त्यै सदाचारपरिपालनाय पुरुषोत्तमः कविराट् विघ्नेशस्मरणलक्षणमाशीरूपं काव्यमुखं वदति । आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखमित्युक्तेः ॥

अतिसुदृढमगातां ० ॥ १ ॥

उमेशौ भवानीशंकरौ अंगैकभावाद्देहैक्यादतिसुदृढं निबिडं हर्षं संतोषमगातां यं वीक्षमाणौ विलोकयंतौ तदधिकमिवात्मवात्यहर्षाधिकं(!) हर्षं यातौ प्राप्तौ स व[क्र]तुंडोऽयमिति। प्रापतुः। तथा आ[त्मै]क्ययोगादात्मनोरैक्यादधिकतममत्यधिकं हर्षमगातां। तथा यं सुतं गणेशं पुत्रं शो(स or स गणेशो) देवो वो युष्माकं क्रतुं संकल्पं सफलयतु सफलं करोतु मनोरथसिद्धिं करोत्वित्यर्थः। मालिनीवृत्तं ॥ १ ॥

It ends: इदानीं ग्रंथांते मातृपितृनामकथनपूर्वकं स्वनाम।

माना (मानो) माता पिता विष्णुर्यस्याख्या पुरुषोत्तमः ।
विष्णुभक्तिलतां चक्रे सतां चक्रे कृतांजलिः ॥ ४१ ॥

निगमयति मातेति । यस्य माता मानोनाम्नी पिता विष्णुनामा। यस्याख्या नाम पुरुषोत्तमः स इमां विष्णुभक्तिकल्पलतां चक्रे कृतवान्। कीदृशः। सतां साधूनां चक्रे समूहे कृतोंजलिर्येन साधु[न]मनकृदित्यर्थः ॥ ४१ ॥

इति श्रीविष्णुभक्तिकल्पलताविवरणे चित्तप्रबोधनामाष्टमः स्तबकः ॥ ० संवत् १८४८ वर्षे ज्येष्ठमासे शुक्लपक्षे १ प्रतिपदि गुरुवासरे लिखितं भट्टकाशीदासहरीहराणो लिखावीतं से-(? l. सो)तावेणीरामसुतकुबेरजीदं पुस्तकं ॥

[GAIKAWAR.]

3910.

1500. Foll. 76; size 11¾ in. by 5 in.; fair Devanāgarī writing of about 1650 A.D.; 8–12 lines in a page.

The same works.

Colophon: इति श्रीविष्णुभक्तिकल्पलताविवरणे चित्तप्रबोधो नामाष्टमः स्तबकः ॥ समाप्ता विवृतिः ॥

श्रुतिबाणरसेंदुमानवर्षे
नभसि स्कंददिने सिते ऽर्कवारे ।
महिदा[स]बुधो गिरीशपुर्यां
कृतवान् कल्पलताप्रकाशमेतं ॥ ०

Cf. Weber, Berlin Cat., no. 542.

[H. T. COLEBROOKE.]

3911.

2079d. Foll. 13; size 8¼ in. by 4 in.; fair Devanāgarī writing of about 1600 A.D.; 9–12 lines in a page.

Vṛindāvanakāvya, a descriptive poem, composed—by *Māna* (*Mānāṅka*), son of *Ugrasena*—

in 52 (of which 1–48 *āryāgīti*) verses characterised by alliterative (or agnominative) rhyme, in form of a dialogue held between *Rāma* and *Krishṇa* in the Vṛindāvana wood; with a commentary by *Rāmarshi*.

The text and commentary begin:

वरदाय नमो हरये पतति जनो यं स्मरन्नपि न मोहरये।
बहुशश्चक्रंद हता मनसि दितिर्येन दैत्यचक्रं दहता ॥ १ ॥

तस्मै वरदाय हरये नमः। तस्मै कस्मै। यं हरिं स्मरन् चिंतयन्नपि जनो लोकः मोहरये न पतति। अज्ञानवेगे न भ्रस्यति। पुनस्तस्मै कस्मै। येन हरिणा दैत्यचक्रं राक्षसवृंदं दहता भ्रता बहुशोऽनेकवारं मनसि हता हृदि ताडिता दितिर्हिरण्यकशिपुमाता चक्रंद रुरोद ॥ १ ॥

स्वमिव भुजं गवि शेषं
व्युपधाय स्वपिति यो भुजंगविशेषं।
नवपल्लवसमकरया
श्रियोर्मिपंक्त्या च सेवितः समकरया ॥ २ ॥

पुनस्तस्मै। कस्मै। यो हरिः श्रीकृष्णः गवि जले समुद्रोदके स्वपिति शेते। किं कृत्वा। भुजंगविशेषं सर्पोत्कृष्टं शेषं शेषाकं नागं व्युपधाय उपधानीकृत्य। कमिव। स्वं निजं भुजं बाहुमिव। यथान्यः स्वं भुजमुपधानीकृत्य शेते इति निर्भयत्वे दृष्टांतः। किंभूतः नवपल्लवसमकरया। नूतनकिशलयतुल्यपाण्या श्रिया लक्ष्म्या सेवितः। पुनः किं। ऊर्मिपंक्त्या कल्लोलश्रेण्या च सेवितः। किंभूतया। समकरया। मकरैर्मीनैः सह वर्तमाना समकरा तया। बाणे चापि (? r. वाचि) पशौ भूमौ दिशि रश्मौ जले ऽक्षिणि। स्वर्गे मातरि वज्रे ऽग्नौ मुखे सत्त्वे च गोध्वनिरिति नानार्थे ॥ २ ॥

येन च बलिरसुरो[ऽ]धः
क्षितेरथ स्थापितः सुरैरसुरोधः।
पृथुकः सन्निभवदनम्
चिक्षेप यः सरोजसन्निभवदनः ॥ ३ ॥

पुनस्तस्मै। कस्मै। येन हरिणा बलिः असुरो दैत्यः क्षितेर्भूमेः अधस्तले स्थापितो रक्षितः। किंभूतः। सुरैर्देवैः असुरोधः सुखेन न रोद्धुं शक्यः। यो हरिः पृथुकः बालः सन् अनः शकटं चिक्षेप प्रेरयामास। किंवत्। इभवत् गजवत्। किंभूतः। सरोजसन्निभवदनः पद्मतुल्यमुखः। पृथुकः शावकः शिशुः। करोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियां। बलिर्दानवपुंगवे। सर्वत्राप्यमरः। एवं श्लोकत्रयेण श्रीकृष्णं नत्वा श्रीबलभद्रं स्तौति ॥ ३ ॥ °

The author of the poem speaks of his father as a ruler of men in the regions of the Vindhya and Ṛikshavat (vv. 7, 8), and a poet in the same style of poetry (*varṇakavi*) as himself (vv. 9, 12):

यो भोक्तेव सुधाया वर्णकविः शासिता च वसुधायाः।
यस्य परामुदधीनां तटेषु कीर्तिं प्रचक्षते मुदधीनां ॥ ९ ॥

यः कः। य उग्रसेनः वसुधाया भूमेः शासिता च पालक इव। सुधाया अमृतस्य भोक्तेव देव इव। किंभूतः। वर्णकविः प्रत्यक्षरप्रकल्पितार्थपदकविः। यस्योग्रसेनस्योदधीनां समुद्राणां तटेषु तीरेषु पराम् उत्कृष्टां कीर्तिं प्रचक्षते कथयंति बुधाः। किंभूतां कीर्तिं। मुदधीनां मुदो हर्षस्याधीनामायत्तां। आनंदकारिणीमित्यर्थः। सुधास्वादे भुवि द्रव्ये सुधा विद्युत्सुधामृतं। सुधा हि भोजनं ज्ञेयं सुधा धात्री सुधा विषं ॥ ९ ॥ ° ११ ॥

यस्येयमकार्येभ्यश्
च्युतेन तनयेन रचितयमकार्येभ्यः।
दत्ता वाक् स्वा कृतिना
मानाकेन हरिसंश्रया स्वाकृतिना ॥ १२ ॥

यस्योग्रसेनस्य मानाकेन माननाम्ना तनयेन पुत्रेण स्वा वाक् काव्यरूपा वाक् आर्येभ्यो विद्वद्भ्यो दत्ता समर्पिता। किंभूतेन। स्वाकृतिना सुशोभना आकृतिराकारो देहो यस्य तेन। पुनः किं। कृतिना कुशलेन। किंभूता वाक्। हरिसंश्रया श्रीकृष्णकथाश्रिता। पुनः किं। रचितयमका गुंफितयमका। पुनरावर्तमानं पदं यमकं। पुनः किं। अकार्येभ्यः पापकर्मभ्यः च्युतेन निवृत्तेन। इयं वक्ष्यमाणेति योज्यं। कृती कुशल इत्यपि ॥ १२ ॥

The text of the poem (in 51 verses) is given in Hæberlin's Anthology, pp. 453–462. The additional verse contained in this MS. is:

दिगसावयमदयिता याम्या ध्रुवमयमृतुश्च वर्यं मदयिता।
यदियमुग्रतमेषु प्राप्ता जलदेषु रविमुदग्रतमेषु ॥ ४३ ॥

The last four verses are composed in a longer *mātrāvṛitta* (22 × 4).

The commentary ends: दशनैर्दंतैः सह लाजानां धानानां छायां शोभां बिभ्रद्धारयन्। हसन्नित्यर्थः। ° लोचनं नयनं नेत्रं। लीला विलासक्रिययोः। सर्वत्राप्यमरः ॥

पदाबोधेन खिन्नानां विदां चेतःप्रसत्तये।
रामर्षिरकरोद् व्याख्यां यथामति कवेर्गिरां ॥

इति श्रीवृंदावनकाव्यस्य रामर्षिणा विरचिता टीका समाप्ता॥

[GAIKAWAR.]

3912.

1819. Foll. 16; size 12½ in. by 4 in.; fair Devanāgarī writing on European paper (watermark 1808); 7–11 lines in a page.

Rāmakrishṇakāvya, or *Rāmakrishṇavilomakāvya*, an artificial poem, by the astronomer and poet *Sūrya Paṇḍita*, son of *Sugaṇaka Jñānādhirāja*, in 36 verses, praising in alternate half-verses *Rāma* and *Krishṇa*, and giving the same text whether read forward or backward;—with the author's own commentary.

The Text begins:

तं भूसुतामुक्तिमुदारहासं वंदे यतो भव्यभवं दयाश्रीः ।
श्रीयादवं भव्यभतोयदेवं संहारदामुक्तिमुतासुभूतं ॥ १ ॥

The Commentary begins:

श्रीमन्मंगलमूर्तिमार्तिशमनं नत्वा विदित्वा ततः
शब्दब्रह्म मनोमयं सुगणकज्ञानाधिराजात्मजः ।
यद्ग्रंथाध्ययनैर्विनेयनिवहो ऽप्याचार्यचर्यामगात्
सो ऽहं सूर्यकविर्विलोमरचनाकाव्यं करोमि स्फुटं ॥ १ ॥
छंदःपूरणमुत्क्रमविधौ साकांक्षता तत्पदैः
प्रारंभाच्चरितक्रमो ऽपि सुतरामेतत् त्रयं दुर्गमं ।
एवं सत्यपि मन्मतिः कियदपि प्रागल्भ्यमालंबते
तत्सर्वं गुणिनः क्षमंतु यदहो यूयं श्रमज्ञाः स्वयं ॥ २ ॥ ° ३ ॥
भागीरथी रामकथा मनोज्ञा कालिंदिका कृष्णकथातिरम्या।
सरस्वती सूर्यकवेस्तृतीया स्नातु प्रयोगे ऽत्र मतिः कवीनां ॥४॥
समाक्षरार्धा विषमाक्षरार्धा द्वेधा भवेच्चित्रकवित्वसीमा ।
समानभिन्नार्थतया द्विधाद्या भिन्नाक्षरार्धा च भवेद्द्वितीया॥५॥

As in Hæberlin's Anthology, p. 468, the two final verses of the commentary are counted continuously with the text; the last being:

एवं विलोमाक्षरकाव्यकर्तुर्भूयासमायासमवेक्ष्य तज्ज्ञाः ।
जानंत्विमां चित्रकवित्वसीमां दैवज्ञसूर्याभिधसंप्रदिष्टां ॥३८॥

इति श्रीदैवज्ञकविसूर्यपंडितविरचिते रामकृष्णाख्यकाव्ये समाप्तिं गते शुभं स्यात् ॥

For text and commentary see now *Kāvyamālā* (1895); also Aufrecht, Cat. Bodl., no. 240; Raj. Mitra, Notices, i., p. 42.

[Dr. John Taylor.]

3913.

1185 d. Foll. 22; size 13¼ in. by 5 in.; clear, modern Devanāgarī writing; seven lines in a page.

Saṃkashṭanāśanastotra, a poem in praise of *Rāma-Kṛishṇa*, in 141 verses, composed, in 1762 A.D., by *Gaṅgādhara Mahāḍakara*, son of *Sadāśiva*, and grandson of *Vīreśvara*.

The metre varies between *śārdūlavikrīḍita*, *vasantatilaka* and *mālinī*. The *stotra* is preceded by a brief prose introduction, beginning:

इह खलु श्रीमद्भगवन्नारायणत्रिगुणमायापरमशक्तिपरिकल्पितविचित्रलोकजालसारभूतायां हरिहरादिसुरमुनिमुमुक्षुपरमहंससमाश्रितायां – – श्रीविश्वनाथराजधान्यां – – श्रीमन्महाडकरोपनामकश्रोत्रियवीरेश्वराग्निहोत्रिसूनुसदाशिवसूरिसूनुसाधुजनकिंकरगंगाधरेश्वरपूजकगंगाधरो नाम कवीनानुचरो(!)– – चंपकवनमधितिष्ठामि । ° ॥

The *stotra* begins fol. 2*b*:

राम च्छिंद्धि कुकाममाशु भगवन् येनास्मि दुःखी सदा
नत्वा त्वां शरणं गतो ऽस्मि सततं शूरं दयालुं परं ।
सामर्थ्यं तव नास्ति चेत्यजचरं चापं च मौनं भज
दीनत्राणपरायणो ऽहमिति तं गर्वं वृथा मा कृथाः ॥ १ ॥

It ends:

अद्वैतसौख्यगुरुपूतपदारविंदं
चित्ते निधाय परमादरतो विमुक्त्यै ।
गंगाधरेण कविना कविदेवरामम्
एवं विनुत्य सुखतः कृतकृत्यतात्मा ॥ १४२ ॥
संकष्टनाशनमिदं स्तोत्रं नवरसान्वितं ।
कृत्वा गंगाधरः काश्यां भुक्तिमुक्तिप्रदायकं ॥ १४३ ॥
ग्रहभूवसुभूमाने वत्सरे विजयाभिधे ।
माघे शनौ पौर्णमास्यां रामांघ्रियुगले न्यधां ॥ १४४ ॥
तेन प्रीणातु भगवान् श्रीरामः परमेश्वरः ।
पठतां शृण्वतां चैतत्सर्वदुःखहरो ऽस्तु मे ॥ १४५ ॥

ततो वागिति विख्याता शक्तिः शब्दमयी शुभा ।
प्रादुरासीज्जगन्माता वेदमाता सरस्वती ॥ १० ॥ ० २३ ॥

ओं अस्य श्रीभवानीसहस्रनामस्तोत्रमंत्रस्य श्रीभगवान्महादेव ऋषिराद्या शक्तिर्भगवती देवता अनुष्टुप्छंदः । ओं ह्रीं बीजं क्लीं कीलकं श्रीभवानीप्रीत्यर्थे धर्मार्थकाममोक्षार्थे जपे विनियोगः । अथ ध्यानं ।

अर्धेंदुमौलिममलाममराभिवंद्याम्
अंभोजपाशसृकपूर्णकपालहस्तां ।
रक्तांगरागरसनाभरणां त्रिनेत्रां
ध्याये शिवस्य वनितां मदविह्वलांगीं ॥ १ ॥ ०

It ends:

यो नरो भूतदिवसे ह्यर्कमूलसमाश्रितः ।
जपेदनन्यया बुद्ध्या साधको निर्भयाशयः ॥
तस्य शत्रुगणाः सर्वे गच्छंति यममंदिरं ।
एकरात्रप्रयोगेण सप्ताहाद्रिपुनाशनं ॥

इति श्रीभवानीसहस्रनामस्तोत्रं शुभं भूयात् ॥

[DR. JOHN TAYLOR.]

3935.

2930. Foll. 8; size 11¾ in. by 6 in.; large, modern Devanāgarī writing; five lines in a page.

[*Rādhākṛishṇastotra*], a rhymed hymn of two *ashṭakas* (each followed by an additional verse), in honour of *Kṛishṇa* and *Rādhikā* resp.

It begins:

अंबुदाजनेंद्रनीलनिंदिकांतिडंबर:
कुंकुमोद्यदर्कविद्युदंशुदीप्यदंबर: ।
श्रीमदंगचर्चितेंदुपीतनाक्तचंदन:
स्वांघ्रिदास्यदो ऽस्तु मे स बल्लवेशनंदन: ॥ १ ॥

गंडताडवातिपंडितांडजेशकुंडलम्
चंद्रपद्मषंडगर्वखंडनास्यमंडल: ।
बल्लवीषु वर्धितात्मगूढभावबंधन:
स्वांघ्रिदास्यदो ऽस्तु मे स बल्लवेशनंदन: ॥ २ ॥ ० ७ ॥

पुष्पचापिराधिकाभिमर्शलब्धितर्पित:
प्रेमवाम्यरम्यराधिकास्यदृष्टिहर्षित: ।
राधिकोरसीह लेप एष हारिचंदन:
स्वांघ्रिदास्यदो ऽस्तु मे स बल्लवेशनंदन: ॥ ८ ॥

अष्टकेन यस्त्वनेन राधिकासुवल्लभं
संस्तवीति दर्शने ऽपि सिंधुजादिदुर्लभं ।
तं युनक्ति तुष्टचित्त एष घोषकानने
राधिकांगसंगनंदितात्मपादसेवने ॥ ९ ॥

कुंकुमाक्तकांचनाब्जगर्वहारिगौरभा
पीतनांचिताब्जगंधकीर्तिनिंदिसौरभा ।
बल्लवेशसूनुसर्ववांछितार्थसाधिका
मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥ १० ॥ ०

It ends:

स्वेदकंपकंटकाश्रुगद्गदादिसंचिता
मर्षहर्षवामतादिभावभूषणांचिता ।
कृष्णनेत्रतोषिरत्नमंडनालिदाधिका
मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥ १६ ॥

या क्षणार्धकृष्णविप्रयोगसंततोदिता
नेकदन्यचापलादिभाववृंदमोहिता (?) ।
यत्नलब्धकृष्णसंगनिर्गताखिलाधिका
मह्यमात्मपादपद्मदास्यदास्तु राधिका ॥ १७ ॥

अष्टकेन यस्त्वनेन नौति कृष्णवल्लभां
दर्शने ऽपि शैलजादियोषिदालिदुर्लभां ।
कृष्णसंगनंदितात्मदास्यसीधुभाजनं
तं करोति नंदितालिसंचयाशु सा जनम् ॥ १८ ॥

[? J. R. Ballantyne.]

3936.

1846 b. Foll. 4; size 11⅞ in. by 3¾ in.; fair, modern Devanāgarī writing; European paper; 11–14 lines in a page.

Rāmāryā(-śataka), a poem of 108 *āryā* verses in praise of *Rāma*, by *Mudgala*.

It begins (cf. Rāj. Mitra, Notices, iv., p. 12):

त्वयि विमुखे मखमुख्ये सख्ये नान्यस्य जीवामि ।
जीवामितभवदर्पितवसनाशनमात्रजीवना: सर्वे[1] ॥ १ ॥

परित: पश्यसि परित: शृणोषि परितो जगद्विजानासि ।
मां राम किं तदंतर्न शृणोषि न वीक्षसे न वा वेत्सि ॥ २ ॥

जानाति भूपमल्पो नाल्पं जानाति भूप इत्येतत् ।
उचितं सर्वमपिज्ञे सर्वज्ञे त्वय्यद: कथं श्लाघ्यं ॥ ३ ॥

अर्थिनि विलसति लिप्सा दातरि दित्सा च दूरतो ऽप्यास्ता ।
आस्तां कृपणकथेयं रमापते राम नोचिता भवति ॥ ४ ॥

अपि रंकमंकनिष्ठ: प्रार्थयमानो ऽर्भको लभेतेष्टं ।
कष्टं बत जगदुद्भव भवदंकगतो (ऽपि) लभे न तद्भवत: ॥ ५ ॥

आशापाशनिबद्धं कारागारे कलेवरे निहितं ।
यदि मोचयसि न मां त्वं कुरु तर्हि स्वात्मनैव मे वृत्तिं ॥ ६ ॥ ० ८ ॥

यदि पुनरपराधानां कोटिभिरंतर्विषादमायासि ।
पत्ताडितापि बाले रुष्यति[2] किमितीह मानुषी जननी ॥ ९ ॥

अयि वद राघव तथ्यं कोपो ऽयं केन मदपराधेन ।
शपथस्ते दाशरथे दशरथपदयोर्यदन्यथा[3] ब्रूषे ॥ १० ॥

It ends:

आकर्णकृष्टचापं वर्षंतं बाणवृष्टिमुन्नापं ।
वंदे योगिदुरापं कंचन हुंकारसुंदरं कोपं ॥ १०६ ॥

खंडितहरकोदंडा ब्रह्मांडकरंडमंडनीभूता ।
वैदेहीगलमाला विलसति लीलाविलासवती ॥ १०७ ॥

---

[1] ०सख्येनान्यस्य कस्य जीवामि। जीवामि न भव० Rāj. M.

[2] तत्ताडितापि बालैस्तुष्यति next MS.

[3] दाशरथेरथ रथपदयोर्यदन्यथा next MS.

धनुषा रिपुजयतनुषा[1] रुचिरतराकारनिर्जितांबुधरा ।
तरुणारुणनिभचरणा कापन करुणा रुणद्धि मे हृदयं [॥ १०८ ॥
इत्यार्याः समाप्ताः ॥
महामुद्गलभक्तेन रचितार्यानिबंधनं ।
भक्तिप्रेरितचित्तेन विवृतं बुद्धिशुद्धये ॥ १ ॥
भक्तवाग्जातिसुमनान्यादाय कुशलानि मे ।
चिदानंदेन तान्यर्यैरर्पितानि रघूत्तमे ॥ २ ॥
यः पूज्यः सकलामरैः सविधिभिर्ध्यायंति यं योगिनो
येनेदं परिपालितं जगदिदं यस्मै हविर्दीयते ।
यस्मात्स्थाणु चरिष्णु विश्वमभवद्यस्य प्रमातांशको(प्रभा°)
यस्मिन्सर्वमिदं प्रयाति विलयं तं रामचंद्रं भजे ॥ ३ ॥

The leaves are marked रामार्या °.

[Dr. John Taylor.]

3937.

2538 b. Foll. 16; size 9½ in. by 4½ in.; good, clear Devanāgarī writing of 1619 A.D.; nine lines in a page.

Āryāvijñapti, a hymn to *Rāma* in 209 verses in the *āryā* metre, by *Rāmacandra*, son of *Viśvanātha Sūri*.

It begins, as above: त्वयि विमुखे°; the first 61 verses being the same, after which it is entirely different.

It ends:

आर्याशतद्वयीयं भक्तिविरक्तिप्रबोधमयी ।
विषयासक्तिविमुक्तैः शक्या मुक्तं जगत्कर्तुं ॥ २०७ ॥
आर्या[: श्री]विश्वनाथस्य नंदनो रघुनंदने ।
रामचंद्रो दधत्प्रेम सार्द्धं निर्मितवानिमाः ॥ २०८ ॥
चैत्रे मासे रघुवरपरो रामचंद्रे हि भक्तिं
प्रेमायासो दधदपि मतिं साधुभक्त्यातिशुद्धा ।
कष्टेनैयं त्वकृपत इदं काव्यमार्यायुतं हि
भुग्नग्रीवाकटितटभुव(°वं) वैश्वनाथं न वित्तं ॥ २०९ ॥

इति श्रीविश्वनाथसूरिवरतनयेन रामचंद्रेण विरचितयमार्याविज्ञप्तिः ॥ संवत् १६७६ वर्षे वैशाषवदि ८ सोमे लिपिकपाठयो ॥

Burnell, Tanjore MSS., p. 163*b*, ascribes the poem to *Viśvanāthasūri*. [Gaikawar.]

---

[1] Thus both MSS.; °जनुषा Rāj. M.

3938.

2346 a. Foll. 15; size 6¼ in. by 9½ in.; modern Devanāgarī writing; twenty lines in a page.

Sūryaśataka, a hymn to the Sun, by *Mayūra Bhaṭṭa*.

Printed in Hæberlin's Anthology, pp. 197–216; *Jīvānanda's Kāvyasaṃgraha*, the *Kāvyamālā* (1889), etc. Cf. Cat. Bodl., no. 819.

[Gaikawar.]

3939.

281 c. Foll. 11; size 10¼ in. by 2¾ in.; fair, modern Devanāgarī writing; 8–10 lines in a page.

The same work. [H. T. Colebrooke.]

3940.

1120 d. Foll. 9; size 12 in. by 4½ in.; fair, modern Devanāgarī writing; ten lines in a page.

Sūryaśataka. Not very correct.

[H. T. Colebrooke.]

3941.

2095. Foll. 30 (numbered 28; nos. 2 and 7 being double); European fashion; size 5¼ in. by 9¾ in.; good, clear Devanāgarī writing of 1681 A.D.; 21 lines in a page.

Sūryastuti, or *Sūryastotra*, by *Sāmba* (generally spelled *Śāmba*); with a commentary, composed by the same author.

It begins: यस्मात्सर्वः प्रसरतितरां ज्ञातृकर्तृस्वभावो° cf. Cat. Bodl., no. 248.

Colophon: संवत् १७३८ फाल्गुनसुदि ८ रवौ अद्येह राजनगरवास्तव्य-आभ्यंतरनागरज्ञातीय-पंचोलीत्यात्याभाइसुत-नरसिंहेन श्रीशांबकृता सभाष्या स्तुतिर्लिखिता ॥

[Gaikawar.]

3942.

2538 c. Foll. 6; size 10¼ in. by 4¾ in.; good Devanāgarī writing of 1781 A.D.; ten lines in a page.

Mṛigāṅkaśata, a hymn to the Moon, in 100 verses, by *Kavikaṅkaṇa*.

It begins:

जेतुं त्रिभुवनमखिलं स्फटिकगणेशं तु शारकरपिंडं(? सा०)।
विल्वदलैरर्चितवांस्तदिह कलंकं विशंकंते ॥ १ ॥
शशिनि सुधामयसिंधौ स्वपिति हरिः किल कलंककपटेन।
अविरतमेव यदेतत्तनयो मदनः पुरः सरति ॥ २ ॥
रजनीशरजतभाजनमरकतमृत्युंजयः कलंकमिषात् ।
नभसि नवांभसि निहितः किमु जीवयितुं पतिरत्या(? परि-
[गच्छति) ॥ ३ ॥

It ends:

विधुदधितंडुलपिंडं लांछनबदरीदलं विधिर्वहति ।
अहह चिरादिह सूते कमपि कुमारं स्मरं रजनी ॥ १०० ॥
इति कविर्कंकणभणितं शतकं तनुतां मृगांकस्य ।
विदुषो रुचिमचिरादिव ककुभामुदयो मृगांकस्य ॥ १०१ ॥
इति कविकंकणभणितं मृगांकशतं समाप्तं ॥ ० पंचाजजीश्री ५
दामोदरजीवत्पुत्रदुर्लभरामजीपठनार्थं लि० मथुरानाथ संवत् १८३८॥

[GAIKAWAR.]

3943.

586 d. Foll. 70 (two of which, 12 and 39, are wanting) and a second fol. 20; size 11 in. by 4½ in.; good Devanāgarī writing of 1645 A.D.; ten lines in a page.

Stavamālā, a collection of *Vaishṇava* songs and poems in honour of *Kṛishṇa-Caitanya* and *Rādhā*; composed by *Rūpa Gosvāmin*, and collected by *Jīva*.

It begins:

श्रीमद्दीश्वररूपेण रसामृतकृता कृता ।
स्तवमालानुजीवेन जीवेन समगृह्यत ॥

पूर्वं चैतन्यदेवस्य कृष्णदेवस्य तत्परं ।
श्रीराधायास्ततः कृष्णराधयोर्लिख्यते स्तवः ॥
विरुदाली ततो नानाछंदोभिः केलिसंहतिः ।
ततश्चित्रकवित्वानि ततो गीतावली ततः ॥
ललितायमुनावृष्णिपुरीश्चोहरिभूभृतां ।
वृंदाटवीकृष्णनाम्नोः क्रमेण स्तवपद्धतिः ॥

तत्र श्रीचैतन्यदेवस्य ॥

सदोपास्यः श्रीमान् धृतमनुजकायैः प्रणयितां
वहद्भिर्गीर्वाणैर्गिरिशपरमेष्ठिप्रभृतिभिः ।
स्वभक्तेभ्यः शुद्धां निजभजनमुद्रामुपदिशन्
स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदं ॥ १ ॥
सुरेशानां दुर्गं गतिरतिशयेनोपनिषदां
मुनीनां सर्वस्वं प्रणतपटलीनां मधुरिमा ।
विनिर्यासः प्रेम्णो निखिलपशुपालांबुजदृशां
स चैतन्यः किं मे० ॥ २ ॥
स्वरूपं बिभ्राणो जगदतुलमद्वैतदयितः
प्रपन्नश्रीवासो जनितपरमानंदगरिमा ।
हरिर्दीनोद्धारी गजपतिकृपोत्सेकतरलः
स चैतन्यः किं मे० ॥ ३ ॥

iti śrī-caitanyadevastotrāṇi, fol. 3*a*; *śrīmahānandākhyaṃ stotram*, fol. 3*b*; *līlāmṛitaṃ nāma kṛishṇasya nāmadaśakam*, fol. 4*a*; *śrīpremendusāgarākhya-śrīkṛishṇa-nāmāshṭottaraśatam*, fol. 6*a*; *śrīkeśavāshṭakam*, fol. 6*b*; *kuñjavihāryashṭakam*, fol. 7*a*; *śrīmukundāshṭakam*, fol. 7*b*; *kuñjavihāryashṭakam*, fol. 8*a*; *vrajanavayuvarājāshṭakam*, fol. 9*a*; *praṇāmapraṇayanastavaḥ*, fol. 9*b*; *harikusumastavaka*, fol. 10*a*; *iti mukundamuktāvalī*, fol. 12*a*; *premasudhāsatrākhyaṃ śrīvṛindāvaneśvarīnāmāshṭottaraśatam*, fol. 15*a*; *śrīrādhāshṭakam*, fol. 15*b*; *prārthanāpaddhati*, fol. 16*a*; *cāṭupushpāñjali*, fol. 17*a*; *śrīgāndharvāsamprārthanāshṭakam*, fol. 18*b*; *vrajanavīnadvandvāshṭakam*, fol. 19*b*; *śrīkārpaṇyapañjikā*, fol. 20*b*; *ity utkalikāvallarī*, with the date Śaka 1471 (A.D. 1549):

चंद्राश्वभुवने शाके पौषे गोकुलवासिना ।
इयमुत्कलिका पूर्वा वल्लरी निर्मिता मया ॥

govindavirudāvalī, foll. 27*a*–38*b*; *atha yamalārjunabhañjanam*, fol. 39*a*; *vṛindāvane vatsacāraṇādi*, fol. 40*b*; *vatsaharaṇādicaritam*, fol. 41*a*;

tālavanacaritam, fol. 42*a*; *kāliyadamanam,* fol. 42*b*; *bhāṇḍīrakrīḍanādi,* fol. 43*b*; *varshāśaradvihāracaritam,* fol. 44*a*; *vastraharaṇam,* fol. 44*b*; *yajñapatnīprasāda,* fol. 45*b*; *govardhanadharaṇam,* fol. 46*a*; *nandāharaṇam,* fol. 47*a*; *rāsakrīḍā,* fol. 47*b*; *sudarśanādimocanam,* fol. 49*a*; *gopikāgītam,* ib.; *arishṭavadhādikam,* fol. 49*b*; *raṅgasthalakrīḍā,* fol. 50*b*; *iti kaṃsavadhāntā śrīkrishṇalīlā,* fol. 51*b*; *iti govardhanoddharaṇam,* fol. 53*b*; *rāsakrīḍā,* fol. 55*b*; *iti vilāsamañjarī,* fol. 57*a*; *iti gītāvalī,* fol. 66*a*; *śrīyamunāshṭakam,* fol. 66*b*; *mattamayūrākhyaṃ śrīgovardhanastotram,* fol. 67*b*; *girīndravāsanandanandanāma śrīgovardhanāshṭakam,* fol. 68*b*; *śrīvṛindāvanāshṭakam,* fol. 69*a*; *śrīkrishṇanāmastotram,* fol. 70*a*.

It ends: इति ललिताष्टकं ॥ संवत् १७०२ चैत्रकृष्णपंचम्यां शुभदिने ऽलेपि। श्रीवृंदावने श्रीश्रीगोविंददेवकेखरासे आगे लिखि पूर्णकीयो ॥ ० इह पोथि श्रीरसिकानंद गोसाईजूकी ॥ लेखक सेवक जगजीवनदास ॥

[H. T. Colebrooke.]

3944.

1384 c. Foll. 78; size 13¾ in. by 5 in.; good, modern Bengālī handwriting; six lines in a page.

Stavamālā.

At the end, the collection here is somewhat shorter, ending as it does (on fol. 77*a*) with the *mattamayūrākhya-śrīgovardhana(-stotram),* after which the colophon: इति श्रीमद्रूपगोस्वामिकृता स्तवमाला संपूर्णा ॥

Then follow six stilted verses (श्रीमच्चिन्तामणिमणिगणश्रेष्ठ ०), in which a scribe (*Ayodhyārāma*) states that he copied the work for king *Kīrtipūrṇa* in Śaka 1662 (*netra-shaṭ-shoḍaśair gaṇite śāke*). This date (1740 A.D.) must, however, belong to a former MS., the present one having been written some 50 years later.

[H. T. Colebrooke.]

3945.

2929. Foll. 4; size 12 in. by 6 in.; large, modern Devanāgarī writing; five lines in a page.

Yamunāshṭaka, a rhymed hymn to the *Yamunā*, in eight stanzas, extracted from the preceding collection (fol. 66*b*).

It begins: श्रीयमुनायै नमः ॥

भ्रातुरंतकश्य(० स्य) पत्तने विपत्तिहारिणी
प्रेक्षयातिपापिनो ऽपि पापसिंधुतारिणी ।
नीरमाधुरीभिरप्यशेषचित्तबंधिनी
मां पुनातु सर्वदारविंदबंधुनंदिनी ॥ १ ॥
हारिवारिधारयाभिमंडितोरुखांडवा
पुंडरीकमंडलोद्यदंडजालितांडवा ।
स्नानकामपामरोग्रपापसंपदंधिनी (*r.* ० संप्रदग्धिनी)
मां पुनातु सर्वदारविंदबंधुनंदिनी (A, B) ॥ २ ॥

It ends:

चिद्विलासवारिपूरभूर्भुवस्वरापिनी
कीर्तितापदुर्मदोरुपापमर्मतापिनी ।
बल्लवेंद्रनंदनांगरागभंगगंधिनी
मां पुनातु सर्वदारविंदबंधुनंदिनी ॥ ८ ॥
तुष्टबुद्धिरष्टकेन निर्मलोर्मिचेष्टितां
त्वामनेन भानुपुत्रि सर्वदेववेष्टितां ।
यः स्तवीति वर्धयस्व सर्वपापमोचने
भक्तिपूरमस्य देवि पुंडरीकलोचने ॥ ९ ॥
इति श्रीयमुनाष्टकम् ॥

Cf. Rāj. Mitra, Notices, ix., p. 60, where the hymn is assigned to *Rūpa* in the colophon.

[? J. R. Ballantyne.]

3946.

2663 c. Foll. 2; size 9 in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

Abhimanyuvākya, consisting of 23 verses, apparently a fragment of some poem.

It begins:

अस्मि वीरतनया वरवीरप्रेयसी च कुरुवीरसवित्री ।
विक्रमं युधि तथा विदधीया नो यथा भवति तात विकल्पः* ॥१॥

* This stanza has been identified by Prof. Aufrecht with *Bālabhārata*, *Bhīshmaparvan* I., vv. 17, 18 (Paṇḍit, v., p. 198).

सूते दीनं ब्राह्मणी याचितारं गौर्वोढारं धावमानं तुरंगी ।
शूद्री दासं पाशुपालं च वैश्या वीरं सूते मद्विधा राजपुत्री ॥२॥
तन्निशम्य वचनं तनयः स्वां मातरं खलु जगाद स वीरः ।
अंब मातिविधुरं विदधीथा मामकं युधि विलोकय शौर्यं ॥ ३ ॥
अंब तीक्ष्णशरनुन्नविपक्षप्रेयसीनयनजाश्रुनदीस्ताः ।
सार्थकं च तव वीरसवित्रीशब्दमद्य भुवनेषु विधास्ये ॥ ४ ॥
उक्त्वा चैवं मातरं तां प्रणम्य प्रष्टुं प्रायो सुत्तरामार्जुनीयः ।
दृष्ट्वा तस्या रूपलावण्यशोभां चित्रन्यस्तो ऽभून्नदा सो ऽभिमन्युः॥५॥
अनंगकांतासदृशं तदीयं रूपं निरीक्ष्याथ वभाण बाला ।
कृष्णेन दुष्टेन तवांगदोषो महान्ममाग्रे कथितो सलीकः॥ ६॥०

It ends:

नार्यो नरेंद्रतनयस्य विलोकनार्थं
कुर्वंत्यनीहगमने ऽपि विलासलीलां ।
काचित्करेण दधती परिधानवस्त्रं
काचित्करादपि न मुंचति कंचुकं च ॥ २२ ॥
योषिन्निजोष्ठनखचुंबनदर्शनाय
आदर्शमेव दधती स्वकरेण चान्या ।
काम्यंगनार्धग्रथितां कबरीं करेण
पीनोन्नतस्तनतटांतरितां दधंती ॥ २३ ॥

इति श्रीअभिमन्युवाक्यं संपूर्णं ॥ ० इदं पुस्तकं नृसिंहभट्टस्य लिखितं ॥

[Gaikawar.]

3947.

2593. Foll. 21; size 11½ in. by 5 in.; fairly written in Devanāgarī, fol. 1 about A.D. 1650, the remainder about A.D. 1750; twelve lines in a page.

Kavīndra-Kalpadruma, a collection of *stotras* intended to serve as models of literary composition, by *Kavīndrācārya Sarasvatī*.

It begins:

गुरुं गंगां गणेशं च शिवौ विष्णुदिनेश्वरौ ।
प्रणम्य रम्यतासिंधुर्निबंधो ऽयं निबध्यते ॥ १ ॥
काशीवासी प्रकाशीकृतगुणनिचयः सर्वविद्याविलासी
दासीभूतः स्मरारेर्विषयसुखगुणे भूयुदासीनचेताः ।
गोदातीरे प्रमोदावलिवलिततमे जन्मभाक्पुण्यभूमाव्
ऋग्वेदी वेदवेदी जगति विजयते श्रीकवींद्रो द्विजेंद्रः[1] ॥२॥

[1] यतीन्द्रः Notices.

अधीत्य वेदवेदांगकाव्यशास्त्राणि सर्वशः ।
ततः स्वीकृत्य मध्यामं ब्रह्मान्याम समाश्रितः ॥ ३ ॥
करान्मोचितौ येन काशीप्रयागौ
महींद्रस्य स श्रीकवींद्रस्तनोति ।
जगत्यत्र कल्पद्रुमं भूसुराणाम्
अभीष्टार्थलाभाय सौभाग्यभाजां ॥ ४ ॥

तत्रादौ गणेशस्तोत्रं ॥

स्वचित्ते ऽपि धत्ते यदीयस्मृतिर्यम्(०स्मृतिं यम्)
तदैवातिविन्नेशता तस्य पुंसः ।
प्रकामं प्रकामं द्रुतं या विधत्ते
प्रमत्तेभतुंडं ‑समिद्यं(समीड्यं) तमीडे ॥ ५ ॥ ० ८ ॥

इति श्रीसर्वविद्यानिधानकवींद्राचार्यसरस्वतीविरचिते कवींद्रकल्पद्रुमे गणेशस्तोत्रं ॥ अथ गंगास्तोत्रं ॥ ० (66 stanzas), ends fol. 5*a*; यमुनास्तुतिः (1 st.), ib.; वितस्तास्तुतिः (1 st.), ib.; सूर्यस्तोत्रं (6 st.), fol. 5*b*; शिवस्तोत्रं (45 st.), fol. 8*a*; भवानीस्तवः (77 st.), fol. 12*a*; नृसिंहवर्णनं (1 st.), ib.; कृष्णवर्णनं (58 st.), fol. 14*b*; रामचंद्रवर्णनं (11 st.), fol. 15*a*; हनुमत्स्तोत्रं (7 st.), fol. 15*b*; प्रास्ताविकश्लोकदंडकप्रशस्त्यादि (9 st.), fol. 16*a*; शिवरामवर्णनं (2 st.), ib.; ब्रह्मेंद्रवर्णनं (5 st.), fol. 16*b*; then follow miscellaneous stanzas.

The MS. breaks off abruptly shortly after the commencement of the stanza रुचिरतरवचनरचनसमुच्चरण-

For the same work see Notices, x., p. 162.

[Mackenzie Collection.]

3948–3950.

2164–2166. Foll. 1168; size 12 in. by 8 in.; fair Devanāgarī writing of 1789 A.D.; ten lines in a page.

Kathāsaritsāgara, a collection of poetic tales in 18 *lambakas*, or 124 *taraṅgas*, composed by *Somadeva*, son of *Rāma*—between 1063 and 1082 A.D., according to Bühler, Ueber das Zeitalter des Kaśmīrischen Dichters Somadeva, p. 16—for the amusement of *Sūryavatī*, the wife of *Ananta*, and grandmother of king *Harshadeva* of Kaśmīr.

The collection (like *Kshemendra's Bṛihatkathāmañjarī*) is based on an older work, written in a popular dialect, the *Bṛihatkathā* of *Guṇāḍhya*.

Editions of the work have been published by H. Brockhaus (books 1–5, in Devanāgarī, with a German translation, chiefly based on the present MS., Leipzig 1839; books 6–18, only in the Roman character, 1862–66); at Calcutta 1883, and Bombay (by *Durgāprasāda* and *Paraba*) 1889. An excellent English translation has been published by C. H. Tawney (Bibl. Ind., 1880–84).

The three volumes are paged continuously (foll. 1–392, 393–792, 793–1168 resp.); the leaves wanting after fol. 60 having been inserted by mistake between foll. 90 and 91.

The colophons of the 18 *lambakas* occur in the following places: I., fol. 45*a*; II., fol. 88*a*; III., fol. 147*b*; IV., fol. 174*a*; V., fol. 216*b*; VI., fol. 295*b*; VII., fol. 383*b*; VIII., fol. 474*b*; IX., fol. 579*a*; X., fol. 709*b*; XI., fol. 717*a*; XII., fol. 1005*b*; XIII., fol. 1018*b*; XIV., fol. 1055*a*; XV., fol. 1073*a*; XVI., fol. 1095*a*; XVII., fol. 1152*a*; XVIII., fol. 1168*b*.

The MS. ends with the first verse (see next MS.) of the genealogical account of the royal house, followed by the date: **संवत् १८४६ ॥ विक्रमादित्यराजा ॥ माघकृष्णात्रयोदश्यां इदं पुस्तकं ज्यानसन्** (*i. e.* Johnson) **साहिबार्थे लिखितम् ॥**

[R. JOHNSON.]

3951–3953.

3001–3003. Foll. 681; size 14¼ in. by 6½ in.; fair Devanāgarī writing of 1762 A.D.; nine lines in a page.

The same work.

Vols. I. and II. have a combined pagination of 408 leaves; whilst vol. III. counts 271 leaves. Fol. 252 of vol. II. and fol. 122 of vol. III. being double, make the sum total 681.

The distribution over the three volumes is as follows:—

Vol. I. contains *lamb.* I. (fol. 30*a*), II. (fol. 59*b*), III. (fol. 103*a*), dated saṃvat 1819, IV. (fol. 124*a*), V. (fol. 155*a*).

Vol. II. contains *lamb.* VI. (fol. 207*a*), VII. (fol. 273*a*), VIII. (fol. 335*a*), IX. (fol. 408*b*).

Vol. III. begins with *taraṅga* 8 of *lamb.* XII., and completes this section on fol. 124*b*. The other *lambakas* end at the following places: XIII., fol. 133*a*; XIV., fol. 158*a*; XV., fol. 170*a*; XVI., fol. 184*b*; XVII., fol. 223*b*; XVIII., fol. 271*a*.

Thus the MS. wants *lambakas* X. and XI., and *tar.* 1–7 of *lamb.* XII.

This MS. has at the end the complete genealogical account of 13 verses: **श्रीसातवाहनकुलाबुधिपारिजातः संग्रामराज इति भूमिपतिर्बभूव । °**

[DR. JOHN TAYLOR.]

3954, 3955.

419, 1102. Foll. 325 & 269; size 12¼ in. by 4½ in.; modern Devanāgarī writing; 10 and 11 lines in a page.

Kathāsaritsāgara; carelessly written, and bound up out of order.

Lambaka I. and the *Vetālapañcaviṃśati* (XII., 8–32) are left out. The rest is distributed in the following order:

Vol. I. contains *lamb.* II. and III. in 73 foll.; IV., 17 foll.; IX., 76 foll.; XIII.–XVIII., in 109 leaves, ending respectively on foll. 7*b*, 25*b*, 34*b*, 47*a*, 75*b*, 109*b*; X., in 50 foll.

Vol. II. contains *lamb.* V. in 27 foll.; VI., 50 foll.; VIII., in 26 and 24 foll., paged separately; VII., 61 foll.; XI., 5 foll.; XII., in 47 and 29 foll., paged separately.

In this MS. also *lambaka* XVIII. ends with the genealogical epilogue.

[H. T. COLEBROOKE.]

3956–3958.

1880–1882. Foll. 272, 267, & 258; size 12 in. by 8 in.; good, modern Devanāgarī writing; 13–16 lines in a page.

The same work.

Vol. I. contains *lambakas* I.–VI.; vol. II. continues the text as far as XII. 6; and vol. III. completes it. The pagination is irregular, owing to the MS. being written by different hands, and each having numbered the leaves independently of the others.

This MS. ends likewise with the genealogical account, here beginning: **संग्रामलब्धशशिशुभ्रयशोवितानः संग्रामराज इति °.** The second half of v. 8, which, in the other two MSS. giving the epilogue, shows the same two lacunae* as the Bombay edition, is here altogether omitted.

[DR. JOHN TAYLOR.]

3959.

2552. Foll. 121; size 14 in. by 8 in.; modern Devanāgarī writing; fifteen lines in a page.

A fragment of *Somadeva's Kathāsaritsāgara*, breaking off after *lamb.* VI. 4.

[MACKENZIE COLLECTION.]

* The edition makes the second *ardharca* of verse 8 to read thus:

विश्वंभरा .... न च नापि भृ ....

विश्वं सदा भगवती किल या बिभर्ति ॥

Our two MSS. (3003 and 419) read the portion between the two lacunae thus: रचनापितृ, marking 2 *aksharas* as omitted in the first, and 3 *aksharas* in the second lacuna. This cannot be right, since the metre requires that the number of *aksharas* omitted must be either 1 (⏑) and 4 (–⏑–⏑), or 4 (⏑⏑⏑–) and 1 (⏑) respectively. In the former case the last syllable between the two lacunae (भृ or तृ) must be metrically short, in the latter long. In other respects MS. 419 usually has the readings of the edition, whilst the other MSS. have numerous various readings.

3960.

1957. Foll. 77; size 9¾ in. by 5½ in.; fair, modern Devanāgarī writing; 11–13 lines in a page.

Vikramodaya, a series of tales regarding *Vikramāditya*, incomplete at the beginning and end. The MS. begins with the 7th *sarga*, and ends in the 28th *sarga*, which treats of the legendary birth and life of *Śālivāhana*.

The MS., which is rather incorrect, begins:

रहसि प्रणतां वेश्यां शुकः संबोध्य नामतः ।
अयि वेश्येऽतितुष्टास्मि(!) तवोपरि न संशयः ॥ १ ॥
वरमतो वृणीष्व त्वमित्युक्ता साब्रवीद्वचः ।
धनं सुविपुलं देहि जरामपनयस्व मे ॥ २ ॥ ° १६ ॥

इति विक्रमोदये शुकचरित्रे वेश्याप्रक्रियाकथनो नाम सप्तमसर्गः ॥

The 8th *sarga* begins (fol. 2*b*):

विक्रमस्य तु सखा(!) वंदी[1] सोमदत्त इति श्रुतः ।
अन्वेषयस्स राजानं देशाद्देशांतरं गतः ॥ १ ॥
शुकरूपधरो राजा यत्र वृक्षे निषण्णवान् ।
तद्वृक्षस्य तले वंदी सोऽपि दैवाद्विषेदिवान् ॥ २ ॥
श्रांतस्तस्मिन्विशश्राम पीत्वा तोयं सुशीतलं ।
अयि क्वासि नृपेंद्र त्वं विक्रमारिक्रमाक्रम ॥ ३ ॥
सीदंति सर्वदा राजन् त्वां विना निखिला प्रजाः ।
वंचितः कुब्जकेनासि दुर्मित्रेणातिपापिना ॥ ४ ॥
कदा जीवयसि प्रीत्या त्वदालोकसमुत्सुकाः ।
अहं तु त्वामचक्षाणो न यास्यामि गृहं निजं ॥ ५ ॥
सहिष्ये शीतवातादि गमिष्याम्यथवा वनं ।
एवं लालप्यमानं तं शुको वीक्ष्य दयान्वितः ॥ ६ ॥
आगत्य वंदिनो हस्ते निषसादाविशंकितः ।
वत्स श्रांतोऽसि नितरां सोमदत्त तवाधुना(!) ॥ ७ ॥
वंचितः कुब्जकेनाहं नातितेनातिपापिना(!) ।
तदारभ्य प्रविष्टोऽस्मि शुकदेहे चरन्वने ॥ ८ ॥
इत्यादि सर्वमाख्याय पृष्टवांस्तं किमद्भुतं ।
भुवां पर्यटता दृष्टं तन्ममाचक्ष्व सौहृदात् ॥ ९ ॥

[1] The MS. spells the word throughout with च.

ततो दृष्टेनादृष्टः स विक्रमस्तेन वंदिना ।
पाणिना शुकमामृज्य प्राह दृष्टं यदद्भुतं ॥ १० ॥
कस्मिंश्चिन्नगरे दृष्टं तपस्यना(? तपस्यन्न)द्भुतं तपः ।
योषिद्रत्नस्य लाभार्थं धूम्रपानं करोति सः ॥ ११ ॥
अत्यद्भुतमिति प्राहुर्लोका रत्नं हि योषितां ।
बिले तिष्ठति सा नारी नारीणामपि मोहिनी ॥ १२ ॥
तद्रूपरचनां दृष्ट्वा सुरूपा अपु(!) योषितः ।
तद्भावं मनसा प्राप्य नरा मुह्यंति किंवद(!) ॥ १३ ॥
इति वंदिवचः श्रुत्वा तत्स्थानं मम दर्शय ।
इत्युक्तः स शुकेनाथ वंदी गंतुं प्रचक्रमे ॥ १४ ॥
वंदिनः शिरसि स्थित्वा शुको मार्गमचिक्रमत् ।
देशाद्देशांतरं गच्छन्बिलद्वारमवाप्नवान् ॥ १५ ॥
तत्र गत्वा सोमदत्तं राजाह शुकरूपधृक् ।
कन्याया वरणे कीरदेहो नैवोपयुज्यते ॥ १६ ॥
अतस्त्वदीयं देहि मे दत्त्वा शुकवपुर्विश ।
ततः शंकितचित्तस्तं वंदी नेत्यवदच्छुकं ॥ १७ ॥
शुकस्तं वहुसांत्वेन वाचा सूनृतयाभ्यधात् ।
ततः सांत्वेन राज्ञः स वंदी सुष्ठुमना ह्यभूत् ॥ १८ ॥
तथेत्युक्तो ऽथ तेनासौ शुकस्तं सोमदत्तकं ।
परकायप्रवेशस्य विद्यामुपदिदेश ह ॥ १९ ॥
ततो वंदिशरीरे स प्राविशद्विक्रमो नृपः ।
शुकदेहे तथा वंदी विवेशाथ विलं नृपः(? ततः) ॥ २० ॥
विले प्रविष्टमात्रं तं दृष्ट्वा दास्यो ऽतिभूषिताः ।
प्राहुस्तप्तकटाहे ऽस्मिन्प्रविश्य वहिराव्रजेत् ॥ २१ ॥
भाययेच्च चतुर्वारमिमां योषिद्वरां तु यः ।
तमेवैषा हि वृणुयादन्यथैषा न लभ्यते ॥ २२ ॥
ततो राजास्मरच्छीघ्रं वेतालं तं च दृष्टवान् ।
तदाज्ञयाविशत्तप्तं कटाहं तैलपूरितं ॥ २३ ॥
वेतालस्य प्रसादेन तत्तैलं शैत्यमापतत् ।
राजाविशत्कटाहं तं सुसंस्थो वहिरागमत् ॥ २४ ॥
तदद्भुतमवेक्ष्याथ विदित्वा तं नरोत्तमं ।
आतिथ्येनार्हयामासुः शयनं स समाविशत् ॥ २५ ॥

प्रदीपदीपावलिराजिराजिते
प्रपुष्पपुष्पावलिलंबिदामके ।
सुधूपधूपावलिकर्वुरे वरे
सुधामु[धा]म्नि प्ररुरोह विक्रमः ॥

इति श्रीविक्रमोदये विलप्रवेशो नामाष्टमसर्गः ॥

9. *sārikoktakathāvarṇanam*, fol. 5*a*; 10. *śukokta-śivadāsaharidāsakathanam*, fol. 13*a*; 11. *sumantumālatīkathā*, fol. 16*a*; 12. *cārucārvaṅgī-kathā*, fol. 22*a*; 13. *gopīcandaśukamelanam*, fol. 24*b*; 14. *sapatnīvivādakhaṇḍanam*, fol. 25*b*; 15. *śrīkanyāvadhanyāyakhaṇḍanam*, fol. 27*b*; 16. *ratnanyāyaviveka*, fol. 29*a*; 17. *mādhavāpamānakaraṇam*, fol. 31*a*; 18. *śrīmaheśadambhākhyānam*, fol. 32*b*; 19. *śivaśaṅkarayoḥ sanmārgasthāpanam*, fol. 35*a*; 20. *buddhyādipratipādaketihāsakathanam*, fol. 42*b*; 21. *damanākhyānam*, fol. 47*b*; 22. (?); 23. *gaurījitisamāgama*, fol. 60*a*; 24. *sukathākhyānam*, fol. 64*a*; 25. *mokshopāyakathanam*, fol. 68*a*; 26. *prakīrṇanirūpa*, fol. 70*b*; 27. *Vikramodaye Vikramacaritravarṇanam*, fol. 73*a*; 28 begins:

प्रतिष्ठाने ऽभवत्कश्चिद्ब्राह्मणस्तस्य कन्यका ।
गंगायां नागतीर्थे ऽगात्स्नातुं तावत्तु कन्यकां ॥
तीरस्थामहरन्नागः स्वबिलं तामुपानयत् ।
त्रिदिनं स्थापयित्वात्र तया सुरतमाचरन् ॥ °

It terminates abruptly at the point when *Śālivāhana*, having made himself an army of clay soldiers and breathed life into them, scours the country:

अस्याभ्यक्षादिनं वाणैर्विक्षतांगं तु विक्रमं ।
यावन्नर्मदयाधावत्शालिवाहो महावलः ॥ प्रविष्ट ॥

There are blank spaces here and there.

[Dr. John Taylor.]

3961.

2799 c. Foll. 110; size 9½ in. by 4 in.; clear Devanāgarī writing of the latter part of the 17th century (foll. 8 and 9 by a different hand from the rest); 11–14 lines in a page.

Vīracarita, an heroic poem in 30 *adhyāyas*, composed, in *anushṭubh ślokas* interspersed with other metres, by *Ananta*.

The poem narrates the events which are supposed to have taken place at Pratishṭhāna-

pura (Paithan) on the Godāvarī, in connection with *Śālivāhana* (*Śālavāhana*), the conqueror of *Vikramāditya* of Ujjayinī, and his son *Śaktikumāra*; the leading features of the narrative being the heroic achievements of *Śūdrika* (*Śūdraka*), the friend and afterwards co-regent of *Śālivāhana*, and subsequently of his son who, however, becomes jealous of him and tries to disembarrass himself of his influence, but is apparently in the end himself overthrown and dethroned by him; the MS. terminating abruptly (at *adhy.* 30, v. 127) shortly before the final contest between the two armies.

An elaborate German analysis of the work, of which no other MS. is hitherto known, has been published by Dr. H. Jacobi, in Weber's Indische Studien, vol. xiv., pp. 97–160.

The first leaf is badly injured, whilst the second is half torn away.

It begins:

ऋषयो नैमिषारण्ये दीर्घसत्त्रेण द[ीक्षिताः ।
पप्रच्छुः] सूतमासीनं सत्कृतं विनयानताः ॥
त्वत्तः सूत श्रुतं सर्वं कलेर्वृत्तमतः परं ।
भविष्यद्भूपच[रितमुत्कृष्टं] नः प्रकीर्तय ॥ ०

Dr. Jacobi's analysis also includes the text of the 8th *adhyāya*.

The last two leaves have been wrongly inserted between foll. 3 and 4.

[Coll. of Fort William.]

3962.

1744. Foll. 44; size $7\frac{1}{4}$ in. by $4\frac{3}{4}$ in.; good, though somewhat quaint Devanāgarī writing of about 1750 A.D.; fifteen lines in a page.

Bhāratīcamatkāra (*Prākṛitasaṃskṛitakāvyam*), a series of 18 acrostic poems, by *Ghanaśyāma*, surnamed *Vaśyavacas Sarvajña Sarasvatī*.

I. begins:

हेरंबो मे वितरतु ज्ञानलक्ष्मीकुलोन्नतिं ।
कर्णतालानिला यस्य विघ्नतूलाचलोहराः ॥ १ ॥
वाणी नृत्यतु डिंभस्य मुखनाट्यगृहे मम ।
विद्यातटाकलीलायां वीणा यस्याः प्रचायते ॥ २ ॥
सुखं कृतार्थयति भूलोकं काशीति कापि पूः ।
अविमुक्ताभिधा प्राप्ता त्रयीव परमार्थता ॥ ३ ॥
देहिनो यत्र तिष्ठंतो भक्तिभिर्लेखयंति नो ।
अधरां भोगिनगरीमुहृत्तामामरावतीं ॥ ४ ॥
वरायाश्चिंतने यस्याः स्वयं भवति चिंतनं ।
रामेश्वरस्यापि सदा साधुचिंता हि वृद्धिदा ॥ ५ ॥
महातिशयिना यस्याः पारम्येण विलज्जिता ।
पुरी कृष्णस्य संतत्या किं निमग्नाधिसागरं ॥ ६ ॥
हिरण्यगर्भं निंदंती यस्याः सौंदर्यकल्पकं ।
विरक्ता विजनानाम श्रितायोध्या तपस्विनी ॥ ७ ॥
तारवेदध्वनिर्लंका(?०वेध०) विभीषणतपोऽर्चिता ।
याति यस्या न सामीप्यं कुत्र कामोचितं फलं ॥ ८ ॥
रजः सरस्वती सत्त्वं जह्नुजा यमुना तमः ।
हरीशयोर्यत्र पादावर्धनारीशभूपदौ(!) ॥ ९ ॥
माया नानार्थविस्तारवासनाबलमेदुरा ।
यस्याः सीमप्रपन्नानां पुरोरूपं प्रपद्यते ॥ १० ॥
विशालाक्षीसखकृपाकांक्षी यस्यां यमः स्वयं ।
कुशलं जन्मिसामान्यं नित्यं साधुवं(?विं)पृच्छति ॥ ११ ॥
तरुकोटद्विजातीनामवसानेषु तारकं ।
समो विषमनेत्रो ऽपि यत्रोपदिशति प्रभुः ॥ १२ ॥
रथभूस्पर्शविरहो(?) मूलं यस्या विवेचने ।
देवानां भूमिदेवानां मिलितानां च कोटिशः ॥ १३ ॥
मेधावी नतमेतस्मिन् क्षेत्रे निधनमस्तु ते ।
इति यत्राशिषं शंभुदुर्लभां(?शंभुदुं०) वक्ति शोभने ॥ १४ ॥
विलासिनीव या भाति कैलासाद्रिपतिस्तनी ।
रवींद्रनयना सिंधुकेशी शिवमनोहरा ॥ १५ ॥
भोगिनीवोल्लसति या वेदाग्निः शास्त्रवालधिः ।
चतुर्वर्गस्तनी सत्यज्ञानशृंगा मखानना ॥ १६ ॥ ० ३२ ॥

The initial syllables of the *ślokas* of this poem make up the verse:

हे वासुदेव महिता रमा वितर मे विभो ।
विहारपरमोदार गोप चारुदरीपते ॥

The colophon of this poem runs thus: इति महाराजपदमहनीयतुक्कोजिराजाधिष्ठितचोलभूसाम्राज्यसर्वाधिकारधुरंधरमहामात्यशिखामणिना वैदिकलौकिकपंटापथगहनमहासिंहेन मौनभार्गवकुलजलधिचंद्रचौंडोबालाजिपौत्रेण चिदंबरब्रह्मयोगिपूर्वाश्रमानुजेन काशीमहादेवतनयेन शाकंभरीभ्रातृकेण सुन्दरीकमलापतिना सर्वभाषाकविना निखिललिपिलेखनवाचनादिकलाकुशलेन देवीताटंकलिपिकल्पकेन अष्टादशप्रबंधीकरेण वश्यवचःसर्वज्ञसरस्वतीनामत्रयभूषितेन एकाधिकद्वाविंशवयसा महाराष्ट्रमहत्तरेण घनश्यामेन योजनार्धगम्यमार्गलीलया विरचिते सत्यम(!)भूतवर्तिभाविसादृश्ये सहजभव्ये प्राकृतसंस्कृतकाव्ये प्रतिपद्यपूर्वपूर्वाक्षरपरिणतपद्यभारतीचमत्कारो नाम प्रथमो विशेषः ॥

II. begins:

गंगा नदीरूपधरापि तस्या
  मध्ये ऽस्ति मुक्तारशनायमाना ।
पुनाति या पुण्यजला त्रिलोकीम्
  आम्नायमातेव पदार्थजातिं ॥ १ ॥
धरंतीव क्रीडां रतिसमुचितां या विजयते
  स्फुटव्यालीवेणी धृतकपसुमा फेनहसिता ।
क्षिपंती वीचीदोर्भिरितघनपुष्पं तटविटे
  विमुंचंती पात्रं घनरसभरा भोगरुचिरा ॥ २ ॥ ० २३ ॥

इति ० प्रतिपद्यप्रथमद्वितीयाक्षरपरिणतपद्यभारतीचमत्कारो नाम द्वितीयो विशेषः ॥

Some of the devices adopted are rather complicated, and in some sections the rhyme is likewise employed, as in the 7th canto, where it is combined with the alphabetical (or 'abecedarian') method; whilst in others, again, different modes are employed in the same poem. In comparatively few places Prākṛit is used.

The last poem, descriptive of love-scenes in *Indra's* heaven, ends:

प्रातः स्वागतसौरसैंधवजलस्नायी विभूषोज्ज्वलो
  वश्यायाभदुकूलकस्तिलवरारंभाकरालंबकः ।
देवौघे जयवाक्यपाठिनि वलारातिर्वले पार्श्वगे
  चंडाडंबरमारुरोह शिखरं सिंहो व(?न) सिंहासनं ॥२७॥
सप्ताशेशत्रिमूर्तिप्रमुखनुतगुणालंकृतः पूर्णसंधा-
  कामः सस्त्रीसुतादिः परशिवनिरतो जीवमंत्रिस्थभारः ।
सभ्रातृव्यो मृकंडुप्रभवगुहगणाधीशशाकंभरीष्टस्
  तुष्टो नित्यं मखींद्रः सुखमनुभवति प्रौढसाम्राज्यलक्ष्मीं॥२८॥

इति महाराजपद० काव्ये प्रतिपद्यद्वितीयचरणद्वितीयाक्षरपरिणतार्थद्वयचतुरपद्यभारतीचमत्कारो नाम अष्टादशो विशेषः॥० संपूर्णमिदं प्राकृतसंस्कृतकाव्यं सं० १५०० ॥

From the author's reference to Tukkojī (cf. Mill, iii., 62) he would seem to have lived in the first half of the last century, and the MS. may possibly be in his own handwriting.

[H. T. Colebrooke.]

3963.

1183 a. Foll. 30; size 13 in. by 6 in.; fair, modern Bengālī handwriting; 8–20 lines in a page.

Caitanyacandrāmṛitam, a poem in praise of *Caitanya,* in 12 *vibhāgas* of together 134 verses, by *Sarasvatī Gosvāmin;* with a commentary (?by *Ānandin*), called *Rasikāsvādinī.*

The poem begins (fol. 5*a*): श्रीकृष्णचैतन्यचन्द्राय नमः ॥

स्तुमस्तं चैतन्याकृतिमतिविमर्यादपरमा-
  द्भुतौदार्यं वर्यं व्रजपतिकुमारं रसयितुं ।
विशुद्धस्वप्रेमोन्मदमधुरपीयूषलहरीं
  प्रदातुं चान्येभ्यः परपदनवद्वीपप्रकटं ॥ १ ॥
धर्मास्पृष्टः सततपरमाविष्ट एव त्वधर्मे
  दृष्टिं प्राप्तो न हि खलु सतां दृष्टिषु क्वापि नो सन् ।
यद्दत्तश्रीहरिरससुधास्वादमत्तः प्रनृत्य-
  त्युच्चैर्गायत्यथ विलुठति स्तौमि तं किंचिदीशं ॥ २ ॥
यन्नातं कर्मनिष्ठैर्न च समधिगतं यत्तपोध्यानयोगैर्
  वैराग्यत्यागतत्त्वस्तुतिभिरपि न यत्तर्कितं चापि कैश्चित् ।
गोविन्दप्रेमभाजामपि न च कलितं यद्रहस्यं स्वयं त-
  न्नामैव प्रादुरासीदवतरति परे यत्र तन्नौमि गौरं ॥ ३ ॥
दृष्टः स्पृष्टः कीर्तितः संस्मृतो वाहूतो वा दूरस्थितैरानतो वा ।
प्रेम्णः सारं दातुमीशो य एकः श्रीचैतन्यं नौमि देवं दयालुं ॥४॥
कैवल्यं नरकायते त्रिदशपूराकाशपुष्पायते
  दुर्दान्तेन्द्रियकालसर्पपटली प्रोत्खातदंष्ट्रायते ।
विश्वं पूर्णसुखायते विधिमहेन्द्रादिश्च कीटायते
  यत्कारुण्यकटाक्षवैभववतां तं गौरमेव स्तुमः ॥ ५ ॥

The commentary begins (fol. 1*b*): श्रीकृष्णचैतन्यनित्यानन्दाद्वैतेभ्यो नमः। श्रीराधाकृष्णाभ्यां नमः। श्रीगुरवे नमः। सर्वेषां वैष्णवचरणेभ्यो नमः। श्रीगौराङ्गभक्तवृन्देभ्यो नमः। श्रीराधिकायै नमः॥

कृत्वा मूर्ध्ना प्रणामं स्वगुरुवरमहाश्रीनृसिंहाङ्घ्रिपद्मे
केनाप्यानन्दिनाम्ना प्रकरणघटिका रच्यते स्वल्पबुद्ध्या।
टीका चैतन्यचन्द्रामृतरसरसिकास्वादिनी वैष्णवानां
देवा लीलामिवासत्कुलदनुजमुटामोहनीयद्वरायां(?) ॥ १ ॥

श्रीपादपरिव्राजरजोवेदान्तादिसांख्यवैशेषिकपातञ्जलमीमांसागममहापुराणसेतिहासपञ्चरात्रालंकारकाव्यनाटकादिरहस्य-सिद्धान्तानर्गलवक्तु(?क्तृ)त्वोज्ज्वलीकृतासंख्यकाशीवास्यन्तेवासिकणान्तःकरणकसर्वावतारिणस्वयंभगवतोऽङ्गीकृताह्लादिनीशक्तिसारभूतश्रीराधिकाभावरूपस्य श्रीश्रीकृष्णचैतन्यमहाप्रभोःकृपा-दृष्टिपातेन स्फुरितयथार्थसिद्धान्तप्रबोधानन्दसरस्वतीपरममहानुभावस्तस्यैवोपास्यत्वं निर्णयन् तद्गुणवर्णनप्रधानचैतन्यचन्द्रामृताभिधानमङ्गलस्वरूपमारभते। तत्रादौ स्तौति सप्तश्लोक्या। ०

Rūpa's Lalitamādhava and *Raghunāthadāsa's Caitanyāshṭaka* are quoted on fol. 2*b*; as are also *Sanātana-gosvāmin*, fol. 3*b*; *Jīva-gosvāmin* and *Rūpa-gosvāmin*, fol. 4*a*.

The commentary is discontinued after v. 102 (fol. 25*b*), the colophons running thus: इति श्रीचैतन्यचन्द्रामृते रसिकास्वादिन्यां टीकायां० विभागः॥

The text ends:

यदि निगदितमानाद्यं शरद्गौरचन्द्रो
न तदपि स हि कश्चिच्छक्तिलीलाविकाशः।
अतुलसकलशक्त्याश्चर्यलीलाप्रकाशैर्
अनधिगतमहत्त्वः पूर्ण एवावतीर्णः॥ १४१ ॥

ब्रह्मेशादिमहाश्चर्यमहिमापि महाप्रभुः।
मुग्धबालोदितं श्रुत्वा स्निग्धोऽवश्यं भविष्यति ॥ १४२ ॥

दृष्टं न शास्त्रं गुरवो न दृष्टा
विवेचितं नापि बुधैः सबुद्ध्या(स्व०)।
यथा यथा जल्पति बालभावात्
तथैव मे गौरहरिः प्रसीद(०देत्) ॥ १४३ ॥

इति श्रीचैतन्यचन्द्रामृते शोचकवर्णनं नाम द्वादशविभागः॥ इतिश्रीसरस्वतिगोस्वामिना विरचितं चैतन्यचन्द्रामृतग्रन्थं संपूर्णं॥ श्रीरस्तु मे लेखके॥

[H. T. COLEBROOKE.]

3964.

1592. Foll. 93 (the first 10 of which have been replaced by 11 leaves); size 11 in. by 4½ in.; clear Devanāgarī writing of 1642 A.D.; nine lines in a page.

Guruśataka, or *Gurustotra*, a *Śaiva* poem of 125 *ślokas* in praise of the principal spiritual heads of the sect, by *Saccidānanda Bhāratī*; with a commentary (*ṭippaṇa*) by *Lakshmaṇa Śarman*, son of *Rāmakrishṇa*, son of *Nārāyaṇa Bhaṭṭa Sūri*, son of *Rāmeśvara Bhaṭṭa*.

The text begins (fol. 2*b*):

विनायकमहं वंदे विविधार्थविधायकं।
विद्वज्जनलसच्चेतोविषयं विश्वरूपिणं ॥ १ ॥
अनुग्रहाय भक्तानां प्रणमामि गुरूनहं।
श्लोकैः शतमितैः साधुपदैरर्थाभिधायिभिः ॥ २ ॥
अखंडसच्चिदानंदरूपाय ब्रह्मरूपिणे।
प्रचंडकरवर्णाय परिपूर्णाय नित्यशः ॥ ३ ॥
ओंकाराय नमस्तुभ्यं मंगलाय महात्मने।
वेदमूलाय नित्याय ज्योतिषे विमलाय च ॥ ४ ॥
नमः सदाशिवायाथ कोटिसूर्योपमाय च।
नमः सहस्रशीर्षाय तावद्दक्पादबाहवे ॥ ५ ॥
नमः प्रकृतये तस्यै त्रिगुणाकृतयेऽनिशं।
यया विमोहिता रुद्रब्रह्मविष्णुपुरोगमाः ॥ ६ ॥
नमः शिवाय रुद्राय पार्वतीरमणाय च।
नीलकंठाय नित्याय निरवद्याय शूलिने ॥ ७ ॥

Having dealt at some length with *Śiva-Rudra*, as the supreme deity and first revealer of the *Vedānta*, the poet passes in review the following succession of teachers (cf. Wilson, Works, i., pp. 201-2): *Gauḍapāda* (verse 32), *Govindapādācārya* (33), *Śaṅkarācārya* (34–52), and his four disciples *Sureśvarācārya*, *Padmapāda-Keśava*, *Troṭakācārya*, and *Amalakācārya* (53–56); *Viśvarūpācārya* (57), *Bodhaghanācārya* (58), *Jñānaghanācārya* (59), *Prajñānagiri* (61), *Siddhagirīśa* (62), *Īśvaratīrtha* (63), *Nrisiṃhatīrtha* (64), *Ādyavidyātīrtha* (65), *Bhāratīkrishṇa*-

tīrtha (71), *Vidyāraṇya Munīśa* (72), *Candraśekharāraṇya* and *Nṛisiṃha Bhāratī* (81, 84, 87, 93), *Purushottama Bhāratī* (82, 85), *Rāmacandra Yatīndra* (86), *Vidyāśaṅkara* (88), and possibly some others disguised under hyperbolical epithets which may, however, refer to *Nṛisiṃha Bhāratīśa*, apparently alluded to allegorically (in v. 94) as the author's guru.

It ends:

मनुजा भक्तिसंयुक्ता ये पठंति गुरुस्तुतिं ।
ते श्रिया विद्यया लोके युक्ता वृद्धिमवाप्नुयुः ॥ १२३ ॥
श्रीकृष्णपादस्मृतिधूतपापः
श्रीसच्चिदानंदयतींद्रवर्यः ।
श्रीशंकराचार्यसुसंप्रदायः
श्रीमद्गुरुस्तोत्रमिदं व्यतानीत् ॥ १२४ ॥
नमस्कृतिलसद्वाग्भिः शुभैषा गुरुसंततिः ।
पुनाति सकलान् लोकान् जाह्नवीव प्रकीर्तिता ॥१२५॥

The commentary begins:

गुणवृद्धिगरिष्ठशास्त्रनेतृप्रसरद्वाक्सरणिप्रमेयमेकं ।
गुरुवृत्तविचेयपादयुग्मं सहसीतं रघुनंदनं प्रपद्ये ॥ १ ॥
गुरुशतमतिगूढं सारवच्छ्लोकरूढं
प्रविततविविधार्थप्रौढमस्तप्रमूढं ।
कतिपयबहुधार्थैर्व्याकरोत्यार्यपाद-
प्रणतिपरमनस्को लक्ष्मणस्तर्कगर्भैः ॥ २ ॥

तत्रादोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यं । तच्च द्विविधं महाकाव्यमुपकाव्यं च । सर्गबद्धं महाकाव्यं । असर्गबद्धमुपकाव्यं । उभयं त्रिविधं गद्यमयं पद्यमयमुभयमयं चेति । ० — — ॥ तत्र समवृत्तमुपकाव्यरूपं गुरुशतकमारिप्सुरस्तद्गुणाभिव्यंजनया तद्भावं प्रतिपिपादयिषुरस्तत्स्तुत्या पुरुषार्थं चतुष्टयमधिजिगमिषवो गुरूपासनेन ब्रह्मतत्त्वं बुभुत्सवः श्रीमत्सच्चिदानंदभारत्यः कर्तव्यस्य विघ्नाभावसमाप्तिप्रचयगमनान्यतरलिप्सया वाङ्मनसाभ्यां मंगलमातन्वंति । विनायकमहं वंदे ० ॥

The first 11 leaves seem to have belonged to a different MS.; the two portions overlapping each other, so that the text of verse 3 occurs both on the last line of fol. 11*b* of the former, and on fol. 12*b*, l. 4 of the latter portion. Moreover, the portion common to both shows considerable divergencies; and if the 10 missing leaves of the second MS. were written in the same style as the bulk of the latter, they should have contained a good deal more matter than is contained on the supplied leaves. Fol. 46 has also been supplied by another hand.

It ends:

क्लेशेन चातिमहता प्रतिपादितं यत्
तत्रोक्तयुक्तिभिरतीव विभूषितं च ।
साफल्यमस्तु सकलस्य सदैव तस्य
श्रीरामकृष्णचरणाब्जसमर्पणेन ॥ १ ॥
निगदितमिह साध्वसाधु वा यद्
वृतमतिना प्रविचार्य लक्ष्मणेन ।
तदखिलमपहाय दोषदृष्टिं
चिरमवलोक्य विशोधयंतु संतः ॥ २ ॥

इति श्रीमन्नारायणभट्टसूरिसूनुश्रीमद्रामकृष्णतनुजन्मश्रीमल्लक्ष्मणशर्मणा कृतं गुरुशतकटिप्पणं समाप्तिमयासीत् ॥ ० संवत् १६९९ समये पौषशुदि पौर्णमास्यां ॥

[H. T. Colebrooke.]

3965.

1443. Foll. 136; 4to, size 12 in. by 8¾ in.; fairly written in Devanāgarī; 25 lines in a page. Modern.

Nānakacandrodaya, a poetical account of the religious work of *Nānak Shāh*, the founder of the Sikh religion; in 19 cantos.

It begins:

यस्याज्ञानवशादसावनवधिर्दुर्वारदैन्यास्पदं
संसारः सुखदुःखमोहगहनः प्राचीन उज्जृंभते ।
दृष्टे यत्र विनश्यतीव तिमिरं तूर्णं तिरोधीयते
सत्यं ज्ञानमनंतमेकममलं तद्भासतां वो महः ॥ १ ॥
औदार्यार्जवकीर्तनीयकरुणः शौर्यादिलक्ष्मीगुणः
शास्त्रार्थव्यवसायिसंगनिपुणः श्रीभागमल्लाभिधः ।
शश्वत्स्वीयसमर्हणीयचरणध्यानानुरक्तः कृती
राजासीन्निजधर्मकर्मसु दृढः प्रख्यातकीर्तिः सुधीः ॥ २ ॥

प्रस्यातातस्तिमिरतरणिः पूर्णविद्याविलास-
  प्रेमासक्तः सरसजनतासंस्तुतो ब्रह्मनिष्ठः ।
सांगोपांगश्रुतिकृतिपटुः स्वीयवात्सल्ययुक्तः
  शांतो दांतः प्रभवति गुरुर्धर्मदासाभिधानः ॥ ३ ॥

सकलकर्मसु धर्मसु निष्ठितो
  विशदबुद्धिविलासविचेष्टितः ।
सुरतरामसमाख्य उदारधीर्
  जयति संततमात्ममुदान्वितः ॥ ४ ॥

ज्ञानं गुह्यतमं मतित्वममलं ध्यानं तथाध्यापनं
  मानंदाध्ययनं सुयोगमयनं सद्वृंदसंमाननम् ।
संभाष्यात्मगतौ रतः समभवद्भस्मावृतांगः सदा
  सिद्धश्रीहरिदासयोग्यतुलधीर्दैगंबरीवृत्तिकृत् ॥ ५ ॥

श्रीमद्बुद्धिसुधाकरः पटुतरः सर्वागमज्ञानभृद्
  वेदांतैकविचारचारुचतुरश्चैतन्यचिंतामणिः ।
सद्वर्णाश्रमसिद्धशुद्धविलसत्साम्राज्यतत्त्वोत्सुकः
  सर्वैश्वर्यसमन्वितो विजयते श्रीनानकाख्यः सुधीः ॥ ६ ॥

श्रीचंदः प्रभवत्यनेकगुणवद्वृंदस्तुतः संमतः
  सद्विद्याभ्यसने सदैव जनताकारुण्यकल्पद्रुमः ।
धैर्यस्थैर्यतपेप्सितस्थितिरतिस्वच्छस्वभावोर्जितः
  श्रीमद्बुद्धिसमीहितेष्टविमलज्ञानप्रधानप्रधीः ॥ ७ ॥

बालाख्येन पुरांगदं प्रति कथा प्रोक्ता निजप्राकृत-
  ब्राह्म्या नानकसंगतात्मविशदज्ञानांबुधिः श्रीगुरोः ।
गंगाराममुदाह्य सैव भवता गीर्वाणवाणीवृता
  श्राव्या मे कृपयेत्युवाच नृपतिः श्रीभागमल्लाभिधः ॥ ८ ॥०

इति श्रीजगद्गुरुनानककथायां नानकचंद्रोदयसमाख्यायामंगदबालसिंधुसमागमो नाम प्रथमः प्रस्तावः (114 stanzas), fol. 6*b*; इति॰ राजबहुमानो नाम द्वितीयः प्रस्तावः (121 stanzas), fol. 12; इति अधिकारग्रहणं नाम तृतीयः प्रस्तावः (123 stanzas), fol. 16*b*; इति॰ नृपप्रसादो नाम चतुर्थः प्रस्तावः (111 stanzas), fol. 21*b*; इति॰ परिणयो नाम पंचमः प्रस्तावः (172 stanzas), fol. 28; इति॰ वनगमनं नाम षष्ठः प्रस्तावः (146 stanzas), fol. 34; इति॰ सिद्धविमोचनं नाम सप्तमः प्रस्तावः (154 stanzas), fol. 41; इति॰ सालसरायविमुक्तिर्नामाष्टमः प्रस्तावः (168 stanzas), fol. 48; इति॰ सुवर्णपुरगमनं नाम नवमः प्रस्तावः (149 stanzas), fol. 55; इति॰ सुमेरुयात्रा नाम दशमः प्रस्तावः (126 stanzas), fol. 60*b*; इति॰ भर्तृहर्यादिजयो नामैकादशः प्रस्तावः (139 stanzas), fol. 67; इति॰ सिद्धसंवादो नाम द्वादशः प्रस्तावः (213 stanzas), fol. 76*b*; इति॰ भगवत्स्तुतिर्नाम त्रयोदशः प्रस्तावः (155 stanzas), fol. 84; इति॰ भूगोलादिवर्णनं नाम चतुर्दशः प्रस्तावः (340 stanzas), fol. 97; इति॰ श्रीरामचरितं नाम पंचदशः प्रस्तावः (168 stanzas), fol. 105; इति॰ गांधारगमनं नाम षोडशः प्रस्तावः (154 stanzas), fol. 111; इति॰ कुरुक्षेत्रयात्रा नाम सप्तदशः प्रस्तावः (159 stanzas), fol. 117*b*; इति॰ अजिताद्युद्धारो नामाष्टदशः प्रस्तावः (176 stanzas), fol. 125*b*.

The last canto ends:

वंशो बभूव विततो महनीयकीर्तेर्
  एवं प्रभूतमहिमा भुवि नानकस्य ।
अस्मिन् जितेंद्रि[यन]याः परमार्थनिष्ठा
  देवद्विजश्रुतपराः पुरुषा बभूवुः ॥ १८९ ॥
तापत्रयस्य विगमो नानकचंद्रोदयाद्भविता ।
तदिमं श्रयंतु सुजना वांछंतो नित्यकल्याणं ॥ १९० ॥

इति श्रीजगद्गुरुनानककथायां नानकचंद्रोदयसमाख्यायां विश्वविजयो नामैकोनविंशः प्रस्तावः ॥

[H. T. Colebrooke.]

3966.

2683. Foll. 89; 4to, size 9⅜ in. by 7¼ in.; Telugu character; 20–30 lines in a page; recent.

Camatkāracandrikā (*Siṃhabhūpālakīrtisudhāsāraśītalā*), a panegyrical poem celebrating (*Sarvajña-*)*Siṃha Bhūpāla*, a petty ruler of the zemindari of Pithapur, in the Rājamahendri district (Wilson)—composed, with a view to illustrating the principles of rhetoric, by *Viśveśvara Kavicandra*. Eight cantos.

It begins:

वाग्देवी वदने मम स्फुरतु या ध्वन्यात्मनोल्लासिनी
  वर्णव्यक्तिमुपागता च तदनुस्थानप्रयत्नादिभिः ।
भावानां पदसंज्ञया विदधती त्रेधातुमुल्लेखना-
  न्यानंदाननुसंदधाति विदुषां प्राज्ञा महावाक्यता ॥

रम्योत्कर्षतनूज्ज्वला रसमयप्राणा गुणोल्लासिनी
  चेतोरंजकरीतिवृत्तिकथितापाकं वयो बिभ्रती ।
नानालंकरणोज्ज्वलादयसती(!) सर्वत्र निर्दोषता
  शय्यामंचति कामिनीव कविता कस्यापि पुण्यात्मनः ॥

कृतिरभिमतकृतिचतुरा यदि चतुरोदात्तनयगुणोदारा ।
इति लक्षणकृतिरत्नं रचये सिंगनृपगुणोदाहरणं ॥
लोके राघवपांडवाद्भुतकथागंधानुसंधायिनौ (°ग्रंथानु°)
तौ ग्रंथाविव तन्मुनिप्रणिहितौ श्रीसिंगभूपाश्रयः ।
यायादादरणीयतां कृतधियां ग्रंथो ऽयमस्मत्कृतो
नाहं यद्यपि तादृशो ऽस्त्ययमसौ राजा हि तादृग्गुणः ॥
नृणां विधौ च नाथे च शिक्षा काव्यप्रयोजनं ।
शिक्षा च न चमत्कारं चादिता स्थिरतां भवेत् (!) ॥
चमत्कारस्तु विदुषामानंदपरिवाहकृत् ।
गुणं रीतिं रसं वृत्तिं पाक (पाकं) शय्यामलंकृतिं ॥
सप्तैतानि चमत्कारकारणं ब्रुवते बुधाः ।
गुणादीनां वाक्यशोभा कृतौ साधर्म्ययोगतः ॥

I., *varṇapadaviveka*, fol. 9; II., fol. 15; III., *arthaguṇadoshaprabandhaviśeshaviveka*, fol. 28; IV., *guṇaviveka*, fol. 36*b*; V., *alaṃkṛitau rasaviveka*, fol. 48; VI., *śabdālaṃkāraviveka*, fol. 54; VII., *arthālaṃkāraviveka*, fol. 71; VIII.: इति सरससाहित्यचातुरीधुरीणविश्वेश्वरकविचंद्रप्रणीतायां श्रीसिंगभूपालकीर्त्तिसुधासारशीतलायां चमत्कारचंद्रिकायां अष्टमो विलासः ॥

For other works of the same title see Aufrecht, Cat. Catt., *s.v.*

[MACKENZIE COLLECTION.]

3967.

3017. Foll. 718; size 10 in. by 6½ in. (bound in Persian fashion); indifferent, modern Devanāgarī writing; mostly 16 lines in a page.

Rājataraṅgiṇī, a poetical history of Kaśmīr, composed, in the 12th century, by *Kalhaṇa*, son of *Campaka*. Complete in 8 *taraṅgas*.

The work has been published (with the supplements) by the Paṇḍits of the As. Soc. of Bengal (Calc. 1835); and of *taraṅgas* 1–6, with a French translation of the complete work, by A. Troyer (Paris 1840–52); and a new critical edition, with English translation, by Dr. M. A. Stein. Cf. also G. Bühler, Detailed Rep. of a Tour . . . in Kaśmīr, etc., p. 52 seqq.

[LORD ELPHINSTONE.]

3968.

3019. Foll. 43; size 7½ in. by 5½ in. (bound in the Persian fashion); legible, modern Devanāgarī writing; seven lines in a page.

Rājataraṅgiṇī-saṃgraha, a continuation of the preceding work (by *Sāhebrām*).

The companion volume to the preceding work.

[LORD ELPHINSTONE.]

3969, 3970.

664 a, b. Foll. 90+58; size 11½ in. by 9 in.; good Devanāgarī writing (of 1807 A.D.); about twenty lines in a page.

Rājataraṅgiṇī, *taraṅgas* 1–6; preceded by an index to the same portion of the work, compiled by *Bāla Govinda*.

The index ends:

४ ६ ८ १
बालगोविन्दमिश्रेण वेदतर्काष्टभूयुते ।
वर्षे राजतरङ्गिण्याः सूचीपत्रं विनिर्मितम् ॥

[H. T. COLEBROOKE.]

3971–3974.

2769 b-e. Foll. 149; size 12¼ in. by 8¾ in.; fair Devanāgarī writing of 1821 A.D.; 21 lines in a page.

Four sections of the history of Kaśmīr, viz.:

b. (foll. 16). *Taraṅgas* I. and II. of *Kalhaṇa's* work.

c. (foll. 62). *Śrīvara's* (*Jainarāja-*)*Taraṅgiṇī*.

d. (foll. 43). *Taraṅgas* IV.–VIII. of *Kalhaṇa's* work.

e. (foll. 28). The 4th *Taraṅgiṇī*.

[COLL. OF FORT WILLIAM.]

3975–3979.

1146 a-e. Foll. 369; size 9 in. by 5 in.; legible, modern Devanāgarī writing; ten lines in a page.

Different sections of the history of Kaśmīr, viz.:—

a. (foll. 157). *Taraṅgas* I.–VI. of *Kalhaṇa's* work. Each *taraṅga* is paged separately (fol. 2 of the first of which is missing).

b. (foll. 141). *Śrīvara's* (*Jainarāja-*) *Taraṅgiṇī.*

c. (foll. 33). The first part of the 4th *Taraṅgiṇī*, to the end of the *Tāhirājavaṃśavarṇanam* (*śl.* 1–498).

d. (foll. 8). *Taraṅga* VII. 1–118 of *Kalhaṇa's* work.

e. (foll. 30). The second portion of the 4th *Taraṅgiṇī* (*śl.* 499 to the end).

[H. T. COLEBROOKE.]

3980.

2848. Foll. 166; size 16½ in. by 5½ in.; clear Devanāgarī writing (European paper, watermark 1806); eight lines in a page.

Two sections of the history of Kaśmīr, viz.:

a. (foll. 76). *Taraṅgas* I.–VI. of *Kalhaṇa's* work.

b. (foll. 90). *Paṇḍita Śrīvara's Jainarāja-taraṅgiṇī*, in four *taraṅgas*.

[DR. LEYDEN.]

3981.

837. Foll. 258; size 12½ in. by 5¼ in.: good, large, modern Devanāgarī writing; eight lines in a page. The MS. has suffered from damp in some places.

The three supplements to *Kalhaṇa's* work, viz.:—

1. *Jonarāja's* (2nd) *Taraṅgiṇī*, ends fol. 75*b*.

2. *Paṇḍita Śrīvara's* (3rd, or *Jainarāja-*) *Taraṅgiṇī*, ends fol. 202*b*.

3. The 4th *Taraṅgiṇī*, here likewise ascribed to *Śrīvara Bhaṭṭa*, ends fol. 258*a*:

पुराणनगरोदाहे सा षभी नगरी नया ।
मपत्नीविरहे जाते नूतनोढेय वल्लभा ॥
कृता श्रीवरभट्टेन पंडितेन महात्मना ।
ज्यलालदीनपर्यंतं राज्ञां राजतरंगिणी ॥
श्रीमद्राजतरंगिणी संपूर्णा ॥ सं ६१ ॥

[H. T. COLEBROOKE.]

3982.

2414. Foll. 109; size 9 in. by 3¼ in.; fair, modern Devanāgarī writing; seven lines in a page.

Śrīvara's Jainarājataraṅgiṇī.

[?]

3983.

2901. Foll. 134; size 8¼ in. by 7 in.; indifferent, modern Devanāgarī writing; sixteen lines in a page.

The same supplement to *Kalhaṇa's* work.

[DR. LEYDEN.]

3984.

1581. Foll. 144 [numbered 146; five leaves (63, 110–112, 129) being wanting; while no. 54 occurs twice, and 127 thrice; and fol. 5 has been wrongly inserted between 64 and 65]; size 18½ in. by 3¼ in.; modern Bengālī handwriting; 5 or 6 lines in a page.

Nānākula-vaṃśāvalī, genealogies of some septs of the Kulīna Brāhmans of Bengal (by *Miśra Dhruvānandaka* ?).

It begins:

वन्द्यो मुखैटी काञ्जिश्च घोषालश्च तथा परे ।
चट्टः पूतिश्च गाङ्गोली कुन्दग्रामी (?) क्रमादमी ॥
आयितो बहुरूपाख्यः शिवो गोवर्धनः सुधीः ।
गा°शिमो(!) मकरन्दश्च जाङ्गलाख्यसमा इमे ॥

अं उत्साहसुतः ॥

आयितस्य परीवर्तम्मार्या देवलके पुरा ।
चट्टेन बहुरूपेण मकरन्देन चोचितः ॥
जाङ्गलेन(?) समानो ऽसौ पूतिगोवर्धनेन च ।
उचितेन खादुकेन देवलेन समः पुनः ॥

महिन्त्या माधवक्षेम्यो गुडिः शरणिकस्तथा ।
उपोको लौलकश्चैव पुत्रौ द्वौ ख्यातपौरुषौ ॥ °

Fol. 2b: इदानीं लक्ष्मणसेनस्य सभाश्रिताः [१४] कुलीना निगद्यन्ते ॥

अरविन्द्यो हलो नामा(?) शुचो वाङ्गालदेवलौ ।
महेश्वरस्तथेशानो वोशोवादलिवामनाः (?) ॥
पण्डितो माधवाख्यश्च कृष्णः कुतूहलस्तथा ।
समानाः कथिता एते लक्ष्मणेन प्रपूजिताः ॥ १४ ॥

वं लौलिकसुतः ।

आर्त्तिः कृतासीन्मकरन्दवन्द्यो
श्रीलारविन्देन विनायकाख्यः ।
क्षेम्यः सुवन्द्योपरराजगामी
गंभेश्वरक्षेम्यतयाथ पश्चात् ॥
बभूव तस्मात्सुत आयितो ऽसौ
श्रीचट्टवंशाम्बुजभानुरेकः । °

Numerous marginal and interlinear glosses have been added over the greater part of the volume. The top margin of fol. 1b has the following stanza, which perhaps belongs to the work itself:

नत्वा तां कुलदेवतां खलु सदा सन्मानसे हंसतां
यातां भक्तिविशेषतः कुलसभामध्ये सदा मोदितां ।
श्रीमद्वन्द्यघटीयकादिकमहावंशावलिं पद्यतो
वक्ष्ये तत्परिवर्तवर्तनविधिं मिश्रो ध्रुवानन्दकः ॥

Cf. Rājendralāla Mitra, Notices of S. MSS., I., nos. 400 and 402 (the final stanza of these MSS. has not been found in the present MS.).

Fol. 1a also is written over with stanzas, the first of which is:

पायम्पायमपाम्पते जलधरा वर्षन्ति पुष्पस्पयो
देवाधीशरणे भयाग्निरिपरित्राणे गरीयानसि ।
अन्यत् किं जनको ऽमृतेन्दुकमला देवद्रुमाणामहो
गर्वः सर्वत एव ते समुचितो नागस्यपाने पुनः ॥

On fol. 125b we read:

कालिदासकुलं वक्ष्ये यस्य काशी स्ववन्द्यजे ।
आर्त्तिर्नूनोचितो गेहे योगानन्दश्च गाङ्गुली ।
गोविन्दछकडी पुत्रौ कालिदासमहामतेः ॥

The MS. ends:

श्रीपतिः केशवश्चैव तथा श्रीयदुनन्दनः ।
समानाः कथिता एते गाङ्गवंशप्रतिष्ठिताः ॥
देवीदासो महेशश्च गोपालो वंशिचट्टजः ।
वंशी गाङ्गस्तथा ख्यातः पद्मगर्भसमा इमे ॥

समाप्तो ऽयं ग्रन्थः ॥

[?]

3985.

2351. Foll. 42; size $10\frac{1}{4}$ in. by $5\frac{1}{4}$ in.; good, clear Devanāgarī writing of 1809 A.D.; nine lines in a page.

Jāmavijaya-kāvya, a poem on the history of the *Jāma* dynasty of *Kaccha* and *Navanagara* (esp. of *Śatruśalya Nṛipa*), claiming descent from *Yadu* and *Kṛishṇa;* in seven cantos, composed (? towards the end of the 16th century) by *Vāṇīnātha.*

It begins:

करकिशलयकंपांदोलि मंगल्यमाल्यं
दधदुरसि नतीस्यं(? नवीयः) सीतयासज्यमानं ।
गुरुजनचलदक्षिप्रांतमाव्रीडमानो(? °मानो)
हृदयनिहितभावो राघवो वः पुनातु ॥ १ ॥

एकस्त्रिजगतां नाथः करुणावरुणालयः ।
वासुदेव इति श्रीमानात्मारामोऽवतीर्णवान् ॥ २ ॥

संभवंति विलीयंते यन्निमेषाज्जगंत्यपि ।
भुवो भारावताराय सो ऽजायत यदोः कुले ॥ ३ ॥

केवलं चित्स्वरूपो यो [न] वाङ्मनसगोचरः ।
त्रिजगत्संततेस्तस्य तत्र संततयो ऽभवन् ॥ ४ ॥

अनूनशौर्यसौंदर्यधैर्यगांभीर्यवानभूत् ।
तत्रैकस्तनयो नाम शांबो जांबवतीसुतः ॥ ५ ॥

कासारे सारसानीव रत्नानीव महार्णवे ।
वसंते कुसुमानीव मणीनिव वराकरे ॥ ६ ॥

विस्मयास्पदवीर्याणि यशोर्जितजगंत्यपि ।
दैवतान्यवतीर्णानि क्षिताविव यदृच्छया ॥ ७ ॥

नरदेवप्रधानानि संभूतानि तदन्वये ।
वर्णयामि गुणोत्कर्षाण्याकर्षंति सतां मनः ॥ ८ ॥

ज्वल्यंते रिपवो शेषास्तेजोभिर्भुजसंभवैः ।
तेन ते जाम इत्येव दधते नाम सान्वयं ॥ ९ ॥

अगणेन(अगण्येन) गुणग्राम[:] संग्रामरसकर्कशः ।
आसीन्नमसमो नाम राजा जगति विश्रुतः ॥ १० ॥

समो रूपेण कामस्य तेजसा च बिडौजसः ।
यशसा शीतमहसस्तेन नाम समो ऽभवत् ॥ ११ ॥

सर्वेषां चैव लोकानामेकः स हृदयंगमः ।
शीलेनोल्लसयन् चेतो निदाघ इव चंद्रमाः ॥ १२ ॥

यस्मिन्राजति निःशेषं जगत्यस्तं ययुर्द्विषः ।
उदयत्यंबरमणावंधकारा इवांबरे ॥ १३ ॥

एकः प्रकाशको नृणां दारिद्र्यमुद्रितात्मनां ।
तिमिराबद्धकोशानां पद्मानामिव भानुमान् ॥ १४ ॥

करप्रतापसंक्रांतान् दिगंतानखिलानपि ।
मृष्टवानेक एवायमुदयन्भानुमानिव ॥ १५ ॥

अपनेता द्विषां नेता नाम नेताखिलक्षितेः ।
सिंधाविव रवेर्बिंबो वंशे तस्मादजायत ॥ १६ ॥

जनकादपि सो व्यंतमुच्चैःपदमवाप्तवान् ।
नयनानंदनो नृणां विधू रत्नाकरादिव ॥ १७ ॥

कष्टावलिं स निर्दह्य यत्प्रतापाग्निरुद्ययौ ।
यद्धूमलहरीश्यामो धाम(?°मोद्दाम) व्योमाखिलं बभौ
[॥ १८ ॥

अलंचक्रे कुलं कीर्त्या कांत्या चंद्र इवांबरं ।
नोतियार इति श्रीमान् नेतुः सूनुरजायत ॥ १९ ॥

किं ब्रूमस्तस्य भूभर्तुः स्तोत्रं श्रोत्रसुखावहं ।
यत्संग्रामकथां श्रुत्वा रोमांचंति तनूरुहः ॥ २० ॥

शेषशंकरकैलाशहिमवत्सुरनिम्नगा[:] ।
धवलीचक्रिरे येन स्वकीर्त्यात्यंतशोभया ॥ २१ ॥

गाढापोढारिवारीणां विश्वख्यातयशा अभूत् ।
अवडो नाम गूढौजा दृढाहंकारसंगरः ॥ २२ ॥

धनुरादाय यः सज्जमेकः सन् दृढविक्रमः ।
उर्वीमकार्षीन्निर्वीरां जामदग्न्य इवापरः ॥ २३ ॥

चंडप्रतापदुर्धर्षो ऽप्याहर्ता द्विषतां श्रियां ।
समुद्यत्तपनो ग्रीष्मे कासाराणामपामिव ॥ २४ ॥

विप्रान्प्रीणयतो नित्यं वसुभिर्वसुतेजसः ।
अभवत्तनयस्तस्य जराडीन इति श्रुतः ॥ २५ ॥

जराद्यपि च यो जित्वा स्वीयपुण्यप्रभावतः ।
पालयामास गां तस्माज्जराडीन इति श्रुतिः ॥२६॥ °२७॥

कवयो यं महाबाहुं राहुमाहुर्द्विषद्विधोः ।
स राहुरिति नाम्नाभूत्तस्य पुत्रो महीपतेः ॥ २८ ॥ ° २९ ॥

यो ऽजयत्करवालेन करालेन महीमिमां ।
अढाल इति नाम्नास्य राहोः सूनुरजायत ॥ ३० ॥ ° ३६ ॥

लक्ष्यावधि समुत्तीर्णे यहानविशिखैर्गते ।
साक्षाद्भीष्म इवास्यासील्लाख्यारिदिति वीर्यवान् ॥ ३७ ॥

उदयाय प्रतापाग्निर्ववृधे शत्रुभोजलं ।
बभ्रामास्य यशोहंसः शत्रवो मानसं जहुः ॥ ३८ ॥ ° ३९ ॥

उदंचितयशःशाखिशाखाशतदिगावलः ।
मरुत्सखोपमस्तस्य लख्यो* नाम सुतो ऽभवत् ॥४०॥ °४१॥

अशेषभूमिभृन्मूर्धवर्तितांघ्रस्य(°वर्तिनस्तस्य) भूपतेः ।
उन्नडो नाम पुत्रो ऽभूत् काले चारुकलेवरः॥४२॥°४४॥

यशसोत्पादितः सोमः सोमो येनार्चितः सदा ।
नृसोमस्तनयस्तस्य श्यामो नाम व्यजायत ॥ ४५ ॥ ° ४६ ॥

मनोभवमनोहारिविग्रहो ऽस्य सुतो ऽभवत् ।
काकुत्स्थपौरुषो नाम्ना काकुराकुलिताहितः॥४७॥°४८॥

प्रसह्य यो धनोपात्तविद्वेषिनिधनोद्यमः ।
तस्य रायधनो नाम पुत्रो ऽभूद्धनदोपमः ॥ ४९ ॥ ° ५१ ॥

अदानवर्त्तामब्रुवतो ऽप्यनाकर्णयतो ऽनृतं(!) ।
बलीयान् रूपशाली च बलीति तनयो ऽभवत्॥५२॥°५३॥

पंडीकृतारिस्तेजोभिर्मंडितान्वयको गुणैः ।
पांडरीकृतदिक्कीर्त्या सर्मा ऽयमिति(!†) तत्सुतः॥५४॥°५५॥

* Dr. Burgess, Rep. of Archæol. S. of N. W. I., ii., p. 201 seq., takes this king to have flourished at Nagar Ṭhāṭā in Sindh, about 1250 A.D.

† Dr. Burgess calls him *Jām Sāndha*, and his (2nd) son *Virjī*.

विरोचन इवाशासु व्यरोचत वपुःश्रिया ।
यः सरोरुहनेत्रो ऽभूद् वैरिहा नाम तत्सुतः ॥५६॥ °५८॥

मुखोपमितपूर्णेंदुर्विशिखोच्छिन्नशात्रवः ।
श्रीजितोग्रसखो ऽप्यासील्लक्षो नाम सुलक्षणः॥५९॥ °६१॥

अमंदानंदसंदोहे दुंदुभिध्वनिबंधुरे ।
अभूद् रायधनो नाम पुत्रो ऽस्य चित्रतेजसः ॥ ६२॥ °६३॥

दानैर्बहुविधैर्यज्ञैः सुप्रीता देवता द्विजाः ।
ततो ऽस्य पुत्रो ऽभून्नाम्ना गंजनं(?°नः) शत्रुगंजनः ॥ ६४ ॥

शल्याहतारती(°ति)मल्लः प्रोल्लसत्कीर्तिमंडलः। [° ६५ ॥
वेल्लद्बाहुरभून्नाम्ना हल्ल[ः] फुल्लांबुजेक्षणः ॥ ६६ ॥ ° ६८ ॥

निदानं(? निधानं) यं सुदामाहुः संनिधानं बिडोजसः ।
तस्य रायधनो नाम प्रधानं भूभुजामभूत् ॥ ६९ ॥ ° ७० ॥

श्रेयान्कुवेरकल्पो ऽस्य कुवेरसखसेवकः ।
कुवेर इति नाम्नाभूद्रवे[र]परबिंबवत् ॥ ७१ ॥ ° ७२ ॥

व्यधाद्बृंदावनं भद्रं गोपालैरनुजीविभिः ।
विलसत्कृष्णवर्त्मौजा नाम्ना हलधरो ऽभवत्॥७३॥°७४॥

साक्षात्कालो ऽरिवर्गाणां विशालो यशसां भरैः ।
हरिपाल इति श्रीमान् नृपालोऽजनि तत्सुतः॥७५॥°७६॥

शुद्धे कुले ऽस्य नाम्नाभूदुन्नतः संपदुन्नतः ।
अनूनगुणसौंदर्यो मुकुरे प्रतिबिंबवत् ॥ ७७ ॥ ° ७८ ॥

साक्षादिव प्रतीचीशो नीचीकृतरिपूच्चयः ।
तमाची नाम तत्पुत्रः समीचीनगुणो ऽभवत् ॥ ७९ ॥

दुर्योधनकुलं हंता यंता दुःशासनस्य च ।
हरिभीम इति श्रीमान् साक्षाद्भीम इवाभवत्॥८०॥°८१॥

राज्ञो हलधरो नाम पुत्रो हलधरोपमः ।
विख्यातकीर्तिः शत्रुणामासीदाशीविषोपमः ॥ ८२ ॥

सच्चेतःकुमुदामोदी लाख्यो नाम तदात्मनः ।
आसीज्जामकुलांभोधिचंद्रमा नृपचंद्रमाः ॥ ८३ ॥ ° ८५ ॥

यस्मिन् पालयति क्षोणीमासीच्चौरपदं परं ।
कामिनीनां मनश्चौरे रूपे भूपस्य केवलं ॥ ८६ ॥

तेजोनिर्धूतसर्वारौ यस्मिन् राजनि राजति ।
विश्रांताभूद्युद्धकथा यूनां सुरतसंगरे ॥ ८७ ॥ ° ९२ ॥

क्षीणः सन् द्विजराजो ऽर्कं प्राप्यैकः पुष्टिमश्नुते ।
वृद्धिमीयुर्द्विजातीनां लाक्षभूपं तु लक्षशः॥९३॥ °९७॥

चिराय कच्छदेशं स स्वच्छंदं स्वच्छमानसः ।
अपालयत्स्वर्गमिव वासवो भूमिवासवः ॥ ९८ ॥

इति प्रवर्धमानस्यानन्यसाधारणश्रियः ।
अथ दिग्विजयाकांक्षा कौतुकाद्भूपतेरभूत्॥९९॥ °१०३॥

Canto II., describing the successful invasion and conquest of Saurāshṭra, begins:

अथावनीभर्तुरुदग्रतेजसो
नियोगमाज्ञाय युयुत्सयोत्सुकाः ।
भटाः करास्फालनमेव चक्रिरे
तथा नु मन्ये द्विषतो जितानिव ॥ १ ॥

Canto III. describes how, on the death of *Lāksha*, his successor, *Rāyula* (or *Rāvala*, as he is also called), subdues some rebellious chiefs, and, as a devout worshipper of *Vishṇu*, resolves to reside in Saurāshṭra, 'in order to be nearer to *Dvārāvatī*'; whereupon the king of Saurāshṭra calls out his tributary chiefs, and enters into an alliance with the ruler of the Dekhan, but is finally defeated; *Rāyula* then builds himself a new capital, Navanagara (in 1539 A.D., acc. to Dr. Burgess), where he subsequently dies and is succeeded by his son *Vīrabhadra*.

This canto begins:

ततः सदानंदसमुत्थिताभिर्
आशोभमानं परितः प्रजाभिः ।
स पालयामास चिराय कच्छं
राज्यं नृपः स्वच्छमना मनीषी ॥ १ ॥ ° ४ ॥

तस्मिन् दिवं गतवति(? दिवंगे) प्रभुवंशवीरे
श्रीरायुले राज्यपदाभिषिक्ते ।
क्षणाद्विपक्षा उदिताश्च लीनाश्
चान्वग्ययौ दीनकृताभिलापात् ॥ ५ ॥ ° ३३ ॥

नवविभवविलासादेशविन्यासहेतोर्
नवभवनतडागारामशोभाभिरामात् ।
अभिनववयसाढ्यो रावलक्षोणिपालो
नवनगरमितीदं नामतो नाम चक्रे ॥ ३४ ॥ ° ४६ ॥

स पालयित्वाद्भुतसर्वसंपत्
क्षितिं क्षितींद्रो विधिवच्चिराय ।
विन्यस्य पुत्रे श्रियमेव काले
दिदृक्षयेव त्रिदिवं जगाम ॥ ४७ ॥

श्रिया तनोर्निर्जितकामदेवः
श्रीकृष्णपादाब्जनिरूढसेवः ।
श्रियोर्जितः पूजितभूमिदेवः
श्रीवीरभद्रः समभून्नृदेवः ॥ ४८ ॥

Cantos IV.–VII. deal with *Vīrabhadra's* son and successor, *Śatruśalya*.

C. IV. treats of the king's youthful pleasures, esp. those of the harem:

दिने दिनेशप्रतिमप्रतापः
सन्मंगले मंगलराशिरेषः ।
अरातिचिंताहितगाढशल्यो
राज्ये ऽभिषिक्तः खलु शत्रुशल्यः ॥ १ ॥ ° २८ ॥

C. V., on the same subject:

प्रबोधितो दुंदुभिनिःस्वनेन
प्रातः समुत्थाय स मानितार्थी ।
शुश्राव गीतान्यथ वंदवृंदैर्
उद्गीयमानान्यथ मंगलानि ॥ १ ॥ ° ११ ॥

C. VI. The king starts on a course of *digvijaya* (no particular countries being mentioned), and, implored by his wives, returns victorious:

अथांबुवाहारिवतांबुगर्भा(?)
नभस्युदासीनतया विरेजुः ।
तथा हि पूर्णाः खलु मानुषाणां
भवंति नेत्रातिथयो विशेषात् ॥ १ ॥ ° ११ ॥

C. VII., describing the daily life of the king, and esp. the enjoyments of the harem, also relates how a Muhammadan ruler (*sa pārasīkaḥ kshitipaḥ*) came to meet the *Jāma* in a friendly way (*prītiṃ cikīrshuḥ*); and having noticed among the tributary chiefs of the king of Navanagara one *Candrasena*, who had formerly given him trouble, he had him seized and fettered; on hearing which *Śatruśalya*, enraged, pursued him and made him give up his vassal.

It begins:

ततः स्ववीर्येण विजित्य जेता
युद्धे विरुद्धान्वसुधाधिपालान् ।
पुरं प्रगच्छन्पुरुहूततेजाः
परं प्रजानंदततिं ततान ॥ १ ॥

It ends:

उद्यत्प्रतापतपनो ऽखिललोकमुच्चैर्
आनंदयन् जगति विस्तृतकीर्तिचंद्रः ।
नक्तं दिवं जयति निर्जितशत्रुमल्लः
श्रीजामवंशतिलकः किल शत्रुशल्यः ॥ १०६ ॥

आस्ते यस्य समीप एव नगरी द्वारावती श्रीपतेर्
देवो नागविभूषणो ऽस्य नगरोपांते ऽस्ति नागेश्वरः ।
नानाशास्त्रविचारचारुचतुरः श्रीकंठनामा द्विजो
यस्यास्ते स चिरायुरस्तु जगति श्रीशत्रुशल्यो नृपः ॥ १०७ ॥

जीयाः श्रीयुतशत्रुशल्य भवतो भूयाद्भयो भूतये
धेयाः सर्वविपक्षभूमृधेसु पदं सद्यो विधेयास्तमः ।
मित्रेच्छाः परिपूरयेः प्रशमयेदारिद्र्यदावानलं
श्रीरामं परिचिंतयेर्वसुमतीमाकल्पमापालयेः ॥ १०८ ॥

श्रीजामविजयं नाम काव्यं काव्यविदो मम ।
कृपया शोधयंत्वेतत्सुधियो हि दयालयः ॥ १०९ ॥

दोर्दंडप्रबलप्रतापतपनव्यापन्नसर्वाहितः
श्रीमज्जामकुलप्रदीप उदितः श्रीशत्रुशल्यो नृपः ।
वाणीनाथकृते ऽस्य जामविजये तन्नद्गुणालंकृते
काव्ये दानविधानवर्णनविधौ सर्गो ऽगमत्सप्तमः ॥ ७ ॥

समाप्तो ऽयं(!) जामविजयकाव्यमिति ॥ संवत् १८६६ नाथवें भाद्रपदमासे कृष्णपक्षे दशमी १० बुधवासरे नौतनपुरवरे पुष्करज्ञाती जोसी भगवाननीलालजी लिखितमिदं ॥

[GAIKAWAR.]

3986.

1499. Foll. 57 (with *śuddhapattras* to foll. 13, 35–9, 48–50); size 12 in. by 3¾ in.; fairly good Devanāgarī writing of about 1750 A.D.; nine lines in a page.

Nṛipatinītigarbhitavṛitta, a versified account, by *Lakshmīpati*, of the historical events which occurred after the death of the emperor *Aurangzeb*, or rather of his son and successor (*Muazzam*) *Bahādur Shāh*.

When *Aurangzeb* died in 1707, the second of his three surviving sons, *Azam*, proclaimed himself emperor, but fell, with two of his sons, in battle with his elder brother *Muazzam*, who

thereupon was proclaimed emperor under the name of *Bahādur Shāh*. On his death, in 1712, his second son, *Azīm-ush-Shān*, proclaimed himself emperor, but perished in a sally from his camp while invested by his elder brother *Muizz-ud-dīn*, who then ascended the throne under the title of *Jahāndār Shāh*. The cause of *Azīm-ush-Shān's* son *Farrukh Siyar* was, however, espoused by *Saiyid Husain Alī* and his brother *Saiyid Abdullah*. It is at this point that the story commences, which is intended, at the same time, to serve the purpose of a frame for a course of instruction in political ethics and diplomacy :—

पृथ्वीं शासति कूर्माद्रौ श्रीजगच्चंद्रराजनि ।
पृथिवीनाथनिखिललक्षणैश्च सुलक्षिते ॥
लक्ष्मीपतिद्विजाग्र्येण वृत्तांतं मंत्रिभूपयोः ।
लिख्यते निजशेमुख्या(°मुष्या) शक्रप्रस्थसमुद्भवं ॥

सर्वेषां भूमिपालानामुपदेशाय शोभनं ।
अनयध्वंसकं नीतिगर्भितं बुद्धिवर्धकं ॥
औरंगजेबभूमींद्रतनयस्य तु नंदने ।
मौजदीनाभिधे भूपे शक्रप्रस्थे स्थिते सति ॥

नीतिज्ञे युद्धकुशले दुष्टामात्यविमर्दके ।
भयभीतैस्तु शयदैर्गतं(?शवरै°) पाटलिपुत्रकं ॥
द्रुतं भूमींद्रभ्रातृव्यं द्रष्टुमात्महिताय तु ।
अजमहीनतनयः फर्कसाहाभिधस्तु तैः ॥

संदृष्टस्तत्र भूमीशलक्षणैस्तु सुलक्षितः ।
अभिवाद्य तु तं तत्र स्थितं भयविवर्जितैः ॥
अवदुल्लाभिधस्तेषां मुख्यभूतस्तु यः स्थितः ।
तनोक्तं तस्य निकटे तत्कालसदृशं वचः ॥

समर्थो नाजमो यस्तु पितृव्यापादकं न हि ।
व्यापादयति तस्याशु धर्मः कीर्तिसमन्वितः ॥
क्षयं याति यतस्तस्मात्समर्थेनात्मजेन तु ।
तातव्यापादकः कामं व्यापाद्यः सर्वभारतः ॥

तातव्यापादकं हंतुं यो न कुर्वति(!) यत्नकं ।
स जीवन्नेव मृतको देहांते जायते खरः ॥
तातव्यापादकं हंतुं जायते यस्य वै घृणा ।
असंशयं स विद्वद्भिर्ज्ञातव्यो जारजातकः ॥

समर्थो यस्तु तातस्य हंतारं हंति वै न हि ।
हंतुमिच्छति तं वज्रपाणिर्गीर्वाणवंदितः ॥
अश्वत्थाम्ना स्वयं पूर्वं तातहंता न किं हतः ।
धृष्टद्युम्नः पुरा रात्रौ पशुमारतया द्रुतं ॥

पराशरेण किं पूर्वं स्वतातानिष्टकारकाः ।
न हता राक्षसाः क्रूराः स्वस्य चानृण्यहेतवे ॥
हिंदूकानां यथा श्राद्धात्पितृतृप्तिः प्रजायते ।
यवनानां तथा तातहंतुर्व्यापादनेन तु ॥

मौजदीनो न यावत्तु त्वया संहन्यते प्रभो ।
पितॄणां तव निर्मुक्तिस्तावन्नैव प्रजायते ॥
इत्याकर्ण्य वचस्तस्य फर्कसाहेन तं प्रति ।
कथितं वचनं चेदं तत्कालसदृशं स्वयं ॥

मौजदीनोऽस्ति भूमींद्रो बलवान् राजवंदितः ।
अहं तस्यास्मि भ्रातृव्यो बलहीनो निरंतरं ॥
यावत्तेन ममोपेक्षा विहितास्ति कृपाधिया ।
जीवनं जायते तावन्मम तेन यदा स्वयं ॥ °

The story is continued, in a rambling way, to the end of the power of the Syeds, when (in 1722), as a final, futile move, after the murder of his brother, *Syed Abdullah* set up *Rufy-ul-Kadr* (रफीलकदर), son of *Bahādur Shāh's* son of the same name, as counter-emperor.

The verses contain numerous modern dialectic and Persian words, usually explained in the margin, such as नाजमो in v. 9 above, explained by पुत्रे, अमंद (by स्यादमंस्तु मंत्रिणि, fol. 2*b*), करिम (by रिपौ तु करिमो भवेत् ib.), जारकाच (by जारकाचस्तु जनके), पारवादी (= चन्द्र), मज्जन (= सरित्पति), चार (= व्याघ्र), सरोज (= पण्डित), साहिव (= प्रभु), etc.

It ends :

फर्कसाहस्तु जल्लालदीनस्यांशो न वै यदि ।
असामाधीश्वरस्यांशो यदि नो ऽजीतसिंहकः ॥
सचिवांशौ न चेत्तौ स्तस्तर्हि तस्य तयोश्च वै ।
दूषणं चास्ति सुमहत्तेभ्यो दूषणवर्जितः ॥
ईश्वरः सर्वभावज्ञो दंडं दास्यति चोत्कटं ।
असारे मारसे(=संसारे) किंचित्कालं मे यशसः स्थितिः॥
जायतामिति संचित्य यथा सर्वैस्तु कार्यकं ।
क्रियते तु तथा चात्र मयापि निजभाषया ॥

लिखितं चास्ति यत्किंचित् तदिदं सर्वपार्थिवैः ।
द्रष्टव्यं न मयि द्वेषः कर्तव्यः सर्वभावतः ॥
इति श्रीलक्ष्मीपतिलिखितं नृपतिनीतिगर्भितं वृत्तं ॥

On fol. 1*a* Colebrooke's Paṇḍit calls the work नृपनीतिगर्भितनीतिशास्त्रं.

[H. T. Colebrooke.]

3987.

2320 c. Foll. 8; size 12¾ in. by 4½ in.; fair, modern Devanāgarī writing; seven lines in a page.

Ratnasenakulavaṃśamuktāvalī, by *Bhavadatta Paṇḍita;* a genealogical account of a family of Rājas of the common appellation of *Sena*, beginning with *Ratnasena*, and ending with *Raṇavīrasena*, by order of whose father, *Raṇa Bāhadūr* (*Bahādur*) *Sena*, the pedigree was composed, in 1802 A.D.

It begins:

सरस्वती व्यक्तिसुभक्तिशक्तिभिर्
निजार्थसार्थे ऽनुगतागताम्रतः (°म्रितः) ।
बुधैस्तु योग्या समुपासिता सती
रसानुकूला जयतीति मे मतिः ॥ १ ॥
आचार्यश्रीवराहार्यनिर्दिष्टेनामुनाध्वना ।
चरिष्णोरस्तु मे पक्षः क्षमासौकर्यभृद्बुधः ॥ २ ॥

शक्तिर्न नैपुण्यमथो न पुण्यं
शिक्षा कवीनां प्रतिभा न मे ऽस्ति ।
किं त्वेकमात्रं कविताविधौ मां
श्रीमद्गुरूणां हि कृपा नियुङ्क्ते ॥ ३ ॥

काव्यं नव्यं सौष्ठवं चेद्व्रजेत
जानीयात्तद्गौरवं विज्ञ एव ।
आहो हंहो सौष्ठवं चेद्व्रजेत
तन्मे लोके लाघवं शालिनीदम् ॥ ४ ॥

रणबाहदूरमुखसेनमुखाद्
अधिगत्य शासनमधीतरसः ।
भवदत्तपण्डित इमां कुरुते
प्रमिताक्षरां नृपकुलावलिकाम् ॥ ५ ॥

स्वस्ति श्रीरत्नसेनो ऽभवदतिदमितासर्वगर्वारिवर्ग-
ग्राहव्यूहाश्वनक्रद्विपकमठघटावैजयन्तीपिमारात् ।
कोदण्डामन्थदण्डात् स तरलतरवार्याहवक्षीरधेर्यं
भेजाते चन्द्रलक्ष्म्यौ निरवधिजलधिसन्धरायां धरायाम् ॥ ६ ॥ °

Ayodhyānagarīśālikā, Citaura, Vināyakapuram, Pālyāpurī, and Makavānanāmakam puram are referred to as places where different members of this family were domiciliated.

It ends:

श्रीमन्महादत्तनृपाङ्गभूर्बुभूर्षिश्रभूपालगुणाभिभाजः ।
शशित्रयोदग्रफलीभवन्तः पुत्रास्त्रयश्चारुमहा महान्तः ॥ ४३ ॥
श्रीमत्पृथ्वीपालसेनो महौजा
राजा यस्यां सा च राजन्वती भूः ।
इत्थं पूर्वं चिंतयित्वैव विज्ञैर्
अन्वर्थाख्या चास्य तावत्कृताभूत ॥ ४४ ॥ ° ४८ ॥
रणबाहदूरयुतसेन एकिका
रसना कुहूनिनदमञ्जुभाषिणी ।
किल यस्य वीरकमलालयः शयः
शयनं जयश्रिय उरो ऽपि संहतम् ॥ ४९ ॥ ° ५० ॥
वसुधातलं समरबाहदूरः प्रभुः
स्वयशःसुधातिधवलीकरोतीति किम् ।
स्वविभावलोकसमवेतचित्रद्रवैर्
गुणविक्रमान्विलिखितुं तदीयानुजः ॥ ५१ ॥ ° ५२ ॥
राजन्यप्रमुखतया तु रत्नसेनो
ऽन्वर्थाख्यो ऽजनि तत एव राजराजात् ।
चित्रं किं न बहुतुलां प्रहर्षिणीं ताम्
आरूढो ऽपि च सतुलां कदापि नैकाम् ॥ ५३ ॥
कौमारे वयसि कुमारविक्रमो ऽयं
सौन्दर्ये रतिपतिरेव कुत्सितो ऽतः ।
मादृग्भिर्विबुधजनैः कुमार इत्या-
ख्यातो ऽसौ नरपतिपुत्ररत्नसेनः ॥ ५४ ॥
श्रीचत्वरेशो रणबाहदूरसेनस्तु लब्ध्वा रणवीरसेनम् ।
प्राधान्यतो ऽर्थो व्यपदेशमर्हत्यन्वर्थसंज्ञं तनयं प्रमोदते ॥ ५५ ॥
शाके चतुर्भुजधराधरभूमियुक्ते
रात्रिं दिवं वृषबलादुपचीयमानाम् ।
श्रीरत्नसेनकुलजातनिजातिवंश-
मुक्तावलीं ग्रथितवान् भवदत्तधीमान् ॥ ५६ ॥

[Dr. F. Buchanan.]

3988.

2364. Foll. 32; size 10 in. by 4 in.; careless Devanāgarī writing of about 1750 A.D.; six lines in a page.

Vaṃśalatā, a compilation of genealogies of kings, by *Udayanācārya*.

It begins:

तीच्णैः कोटिनखाग्रकैश्च दिविजैस्सार्कं महीमण्डले ।
स्तम्भोत्पाटननर्दतर्दितपरं कम्पयन्यस्त्रिलोकम् ।
भित्त्वा राक्षसगूढपाटलपटुं वक्षःस्थलं क्षेत्रकं
प्रह्लादाय वराङ्गरं च निनदौ(°दे) तं तारसिंहं भजे॥१॥
वाग्देवी यस्य जिह्वाग्रे नरीनर्त्ति सदा मुदा ।
तं गुरुं परमानंदं नौमि नित्यमखण्डितम् ॥ २ ॥
वरीवर्त्तु सदास्माकं नृसिंहो हृदये प्रभुः ।
यस्य स्मरणमात्रेण क्षीयन्ते सर्वसंशयाः ॥ ३ ॥
स्मृत्वा स्मृत्वा गुरोः पादं नत्वा गुरुपरंपराम् ।
उदयनाचार्यो ऽहं वै वक्ष्ये वंशलतां शुभाम् ॥ ४ ॥
वंशाब्धेः क्वातिगाम्भीर्यं क्वाहं चाल्पमतिस्तथा ।
तथापि वक्ष्ये कृपया हरेर्वंशलतां तथा ॥ ५ ॥
वंशानामेव ह्यानन्त्यात्पारं नैव च विद्यते ।
शास्त्रसिद्धान्ततश्चैव संक्षेपेणेह कथ्यते ॥ ६ ॥ °

Sūryavaṃśa, foll. 3*a*–11*a*; *Nabhagavaṃśa*, fol. 5*a*; *Ikshvākutanayam*, fol. 5*b*; *Rāmacandrasya vaṃśavarṇanam*, fol. 9*a*.

Somavaṃśa, foll. 12*b*–32*a*; *Jayāter vaṃśaḥ*, fol. 14*b*; *Gautamavaṃśa*, fol. 16*b*; *Māgadharājānaḥ*, fol. 19*a*; *Yador vaṃśaḥ*, fol. 20*b*; *Kaler ārambhe rājavaṃśavarṇanam*, fol. 29*a*.

It ends:

उदरं भरतस्यार्थैः सत्यत्वे धार्ष्ट्यमेव हि ।
ब्रह्मविट्क्षत्रशूद्राणां यो बली भविता नृपः ॥
एवं वंश्याः समाख्याता विस्तरेणाल्पशस्तथा ।
तेन तेनैव बोद्धव्या देशे देशे नृपास्तथा ॥

इति श्रीमदुदयनाचार्यकृतो वंशलतात्मकः समाप्तः॥ सम्वत् ८ शुभं॥

[Dr. F. Buchanan.]

---

2. Original Collections of Miscellaneous Verses, and Anthologies.

3989.

2411. Foll. 9; size 8⅜ in. by 3¾ in.; legibly written in Devanāgarī; 8 or 9 lines in a page.

Cāṇakya's collections of sententious couplets, entitled *Rājanīti(-samuccaya)*.

The MS. contains first the shorter collection, or *Laghu-Cāṇakya* (A), consisting of a hundred couplets, arranged in eight *adhyāyas* (the last two of which are wrongly numbered 6 and 7). This version differs considerably from those hitherto published.

Then follows the first, and part of the second, *adhyāya* of the larger collection, or *Vṛiddha-Cāṇakya* (B).

A., *adhy.* I. begins:

प्रणम्य शंकरं देवं ब्रह्माणं च जगद्गुरुं ।
विष्णुं प्रणम्य शिरसा वक्ष्ये शास्त्रमनुत्तमं ॥ १ ॥
चाणिक्येन(!) स्वयं प्रोक्तं(प्रोक्तो) राजनीतिसमुच्चयः ।
तमहं संप्रवक्ष्यामि नराणां बुद्धिवर्धनं ॥ २ ॥
अतोर्थं पठ्यते शास्त्रं कीर्तिर्लोकेषु जायते ।
कीर्तिमान्पूज्यते लोके परत्रेह च मानवः ॥ ३ ॥
बली पलितकायेन कर्तव्यः श्रुतसंग्रहः ।
न तत्र धनिनो यांति यत्र यांति बहुश्रुताः ॥ ४ ॥
श्रुत्वा धर्मं विजानाति श्रुत्वा त्यजति दुर्मतिं ।
श्रुत्वा ज्ञानमवाप्नोति श्रुत्वा मोक्षं च गच्छति ॥ ५ ॥
श्रुतं यत्नविरागाय न धर्माय न शांतये ।
किं तेन पठितेनापि काकभापतमेव(°भाषित°) तत् ॥६॥
खंडखंडेषु पांडित्यं क्रयक्रीतं च मैथुनं ।
भोजनं च पराधीनं तिस्रः पुंसां विडंबनाः ॥ ७ ॥
पदं पदार्थं पादं वा व्याहरेद्यः सुभाषितं ।
मूर्खो ऽपि [प्रा]ज्ञतां याति नदीभिः सागरो यथा ॥ ८ ॥
नदीतीरेषु ये वृक्षा या च नारी निरंकुशा ।
मंत्रिहीनश्च यो राजा तस्य राज्यं विनश्यति ॥ ९ ॥

सेवितव्यो महावृक्षा(°क्षम्) छाया भवति शीतला ।
यदि दैवात्फलं नास्ति छाया केन निवारितः(°ता)॥१०॥
इति श्रीलघुचाणिके राजनीतिशास्त्रे प्रथमो ऽध्यायः ॥

II. अतिदानाद्बलिर्बद्धो नष्टो मानात्सुयोधनः ।
विनष्टो रावणो लौल्यादति सर्वत्र वर्जयेत् ॥ १ ॥ ° ११ ॥

III. अन्यथा वेदशास्त्राणि ज्ञानपांडित्यमन्यथा ।
अन्यथा तत्पदं शांतं लोकाः क्लिश्यंति चान्यथा ॥१॥°१०॥

IV. शुचिभूमिगतं तोयं यत्र लेपो न विद्यते ।
लेपस्थानं परित्यज्य अन्यत्स्थानं भवेच्छुचि ॥ १ ॥ ° १३ ॥

V. का प्रीतिः सह मार्जारैः का प्रीतिरवनीपतौ ।
गणिकाभिश्च का प्रीतिः का प्रीतिर्भिक्षुकैः सह ॥१॥°९॥

VI. सिंहरूपेण राजानो व्याघ्ररूपेण मंत्रिणः ।
भृत्याश्च गृध्ररूपेण क्षयं यास्यंति वै प्रजाः ॥ १ ॥ ° १२ ॥

VII. किं कुलेन विशालेन विद्याहीनस्य देहिनः ।
अकुलीनो ऽपि विद्वान्यो दैवतैः सह पूज्यते ॥ १ ॥ ° ७ ॥

VIII. धनवानकुलीनो ऽपि कुलीनो धनवर्जितः ।
सुविद्वान् जातवंशो ऽपि निर्धनः परिभूयते ॥ १ ॥ ° ११ ॥

B. begins:

प्रणम्य शिरसा विष्णुं त्रैलोक्याधिपतिं विभुं ।
नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयं ॥ १ ॥
अधीत्येदं तथा शास्त्रं नरो ज्ञास्यति तत्त्वतः ।
धर्मोपदेशविज्ञानकार्याकार्यं शुभाशुभं ॥ २ ॥

तदहं संप्रवक्ष्यामि° ॥ ३ ॥ मूर्खो शिष्योपदेशेन° ४ ॥ दुष्टा भार्या शठं मित्रं° ५ ॥ आपदर्थे धनं रक्षेद्° ६ ॥ त्यजेदेकं कुलस्यार्थे° ७ ॥ चलत्येकेन पादेन° ८ ॥ यस्मिन्देशे न सन्मानो° ९ ॥ पंच यत्र न विद्यंते° १० ॥ धनिकः श्रोत्रियो राजा° ११ ॥ ज्ञातव्याः प्रेषणे भृत्या° १२ ॥ आतुरे व्यसने प्राप्ते° १४(!) ॥ वरयेत् कुलजां प्राज्ञो° १५ ॥ नदीनां च नखिनां च° १६ ॥ विषादप्यमृतं ग्राह्यं° १७ ॥ स्त्रीणां द्विगुण आहारो° १८ ॥

इति श्रीवृद्धचाणिक्ये राजनीतिशास्त्रे प्रथमो ऽध्यायः ॥

अनृतं साहसं माया° १ ॥ भोज्यं भोजनशक्तिश्च° २ ॥ यस्य पुत्रा वशे भृत्या° ३ ॥ ते पुत्रा ये पितुर्भक्ताः° ४ ॥ परोक्षे कार्यहंतारं° ५ ॥

Of editions may be mentioned the *Cāṇakya-śatakam* (110 verses) in Hæberlin's Anthology (pp. 312–22); another (109 vv.) ed. A. Weber (Monatsber. of Roy. Ac., Berlin, 1864); a series of 91 verses peculiar to Nepal MSS., ed. by J. Klatt (Halle, s.d.,? 1873); *Laghucāṇakyam*, with Italian transl., by E. Teza, Pisa 1878; *Vṛiddha-Cāṇakya*, Bombay, 1858. Cp. E. Monseur, *Cāṇakya*; récension de cinq recueils de stances morales (Par. 1887). Most of the verses are included in Böhtlingk's Indische Sprüche.

[?]

3990.

1518a. Foll. 19; size 9½ in. by 5 in.; fair, modern Devanāgarī writing; ten lines in a page.

Cāṇakya's Rājanīti. The larger collection, consisting of 352 *ślokas*. Rather incorrect.

It begins:

प्रणम्य शिरसा विष्णुं त्रैलोक्याधिपतिं प्रभुम् ।
नानाशास्त्रोद्धृतं वक्ष्ये राजनीतिसमुच्चयम् ॥ १ ॥

मूलसूत्रं प्रवक्ष्यामि° २ ॥ पठनादस्य शास्त्रस्य° ३ ॥ तदहं संप्रवक्ष्यामि° ४ ॥ रूपयौवनसंपन्नो° ५ ॥ °

It ends:

आचार(°रो) विनयो विद्या प्रतिष्ठा तीर्थदर्शनम् ।
निष्ठा वृत्तिस्तपो दानं नवधा कुललक्षणम् ॥ ३५१ ॥
बालो ऽपि चोरः स्थविरो ऽपि चोरो
वृद्धो युवा दंडधरो ऽपि चोरः ।
[राजापि चोरः] सचिवो ऽपि चोरा
चोरं विना न प्रभवंति नार्यः ॥ ३५२ ॥
इति श्रीनीतिशास्त्रे चाणक्यं समाप्तं ॥

[H. T. Colebrooke.]

3991.

1121b. Foll. 29; size 12 in. by 4½ in.; careless Devanāgarī writing of 1786 A.D.; 8–10 lines in a page.

Rājanīti, in 16 *adhyāyas*, in mixed Hindī and Sanskrit. *Adhy.* 1–8 are ascribed to *Laghu-Cāṇakya*, 9–16 to *Vṛiddha-Cāṇakya*.

It begins: अथ राजनीति लिष्यते ॥ दोहरा । विघनविनासनभयहरनकरनवुधिपरगासु । °१ ॥ चृषिपुणीति° २ ॥ श्लोक ॥

प्रणम्य शंकरं देवं ब्रह्माणं च जगद्गुरुं ।
विष्णुं प्रणम्य शिरसा वक्ष्ये ऽहं शास्त्रमुत्तमं ॥ ३ ॥
दोहरा । शिवकौसीसुनवाइकै ° ४ ॥ श्लोक । चाणिक्येन स्वयं प्रोक्तं ° ५ ॥ °

Adhy. 8 begins fol. 12*b*: अथ वृद्धचानिक्ये ॥ श्लोक ।
प्रणम्य शिरसा विष्णुं ° as in MS. 1518*a*.

It concludes with three Hindī verses.

[H. T. Colebrooke.]

3992.

3024. Foll. 184; size $13\frac{3}{4}$ in. by $4\frac{3}{4}$ in.; fair, modern Devanāgarī writing; 8–11 (on foll. 65–80, 2 or 3) lines in a page.

Kāmandakīya-Nītisāra, with a commentary, entitled *Upādhyāyanirapekshā*.

The text has been published, with extracts from the commentary, in the Bibliotheca Indica, by *Rājendralāla Mitra* and *Jaganmohan Tarkālaṅkāra*.

The Commentary begins:

चतुर्मुखमुखांभोजवनहंसवधूर्मम ।
मानसे रमतां नित्यं सर्वशुक्ला सरस्वती ॥ १ ॥
अभिप्रेतार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥ २ ॥
चेतश्चक्रे ऽखिलाज्ञानव्याप्तिसामर्थ्यधारिणा ।
नमो विनिर्मितानंतभवध्वंसाय शंभवे ॥ ३ ॥
व्याख्या सुखावबोधार्था स्पष्टा सूक्ता सुसंगता ।
कामंदकिप्रणीतस्य नीतिशास्त्रस्य लिख्यते ॥ ४ ॥

शास्त्रकारः स्वशास्त्रादौ नमस्यति नमस्कारं करोति । किमर्थमिति चेन्नमस्यनमस्कारात्पुण्यमुत्पद्यते । तदुत्पद्यमानं विरोधात्पुण्यं निवर्तयति । तन्निवृत्तौ तु कार्याणां विघ्नादीनामभावं मन्यमानः सकलार्थशास्त्रपारावारदृश्वा कामंदकिराह । यस्य प्रभावाद् ° ।

[J. R. Ballantyne.]

3993.

1025. Foll. 192; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; fair, modern Devanāgarī writing, by three or four different hands; nine lines in a page.

The same work, and commentary.

[H. T. Colebrooke.]

3994.

2769 a. Foll. 112; 4to, size 12 in. by 9 in.; clear, modern Devanāgarī writing; 21 lines in a page.

Nītisāra, with commentary.

[Coll. of Fort William.]

3995.

2539 e. Foll. 22; size $10\frac{1}{4}$ in. by 5 in.; fair Devanāgarī writing of 1547 A.D.; 12 or 13 lines in a page.

Bhartṛihari's Śatakas, viz.: *Vairāgyaśataka* (123 vv.), *Nītiśataka* (106 vv.), and *Śṛiṅgāraśataka* (111 vv.).

Bohlen's edition (Berlin, 1833) of *Bhartṛihari's* centuries being based exclusively on four of the MSS. of the India House, it will suffice to refer to his preface, pp. x. and xi., for a description of them. The present is his MS. B (old number 1987).

Dated: संवत् १६०४ वर्षे राक्षसनामसंवत्सरे चैत्रशुद्धे ११ एकादशी गुरौ स्वपरोपकारार्थे गणेशपंडितेन लिखितमिदं पुस्तकम् ॥

In K. K. Telang's edition of the first two *śatakas* (Bombay, 1874) a useful comparative conspectus is given of the verses in the different editions and MSS. used by him. Numerous other editions of the work have been published in India, both with and without commentaries and vernacular translations. Also an English translation, by B. H. Wortham, in Trübner's Or. Ser., 1886. [Gaikawar.]

3996.

1151 b. Foll. 18; size 9 in. by 5 in.; Bengālī character; eight lines in a page; European paper.

Bhartṛihari's Vairāgyaśataka (104 vv.). This MS. was not known to Bohlen.

[H. T. Colebrooke.]

3997.

2150. Foll. 33, 32, 32 resp.; size 11 in. by 6¼ in.; no date; number of lines varying.

Bhartṛihari's three *śatakas*, with a commentary.

The commentator's name is not mentioned in this MS., but the commentary on the *Nītiśataka* appears to be identical with that assigned to *Maheśvara*, in a MS. described in Rāj. Mitra's Notices, ix., p. 47.

The comment on the three centuries begins as follows:

I. *Vairāgyaśataka* (86 vv.): चूडोत्तंसित चारुचंद्र° ॥ १ ॥ योगिनां चेतःसद्मनि चेतः मन एव सद्मनि गृहे ज्ञानमेव प्रकर्षेण दीपो यस्य एवंभूतो हरः शंकरः विजयते सर्वोत्कर्षेण वर्तते । किं कुर्वन् सन् । अंतः अंतरे स्फूर्जत् प्रस्फुरत् । ° अपारमोहतिमिरस्य प्राग्भारमज्ञानलक्षमुच्चाटयन् दूरीकुर्वन् । पुनः किं कुर्वन् । श्रेयोदशाग्रे श्रेयसां पुण्यानां दशा तस्या अग्रे स्फुरन् प्रकटयन् ।

II. *Nītiśataka* (110 vv.): दिक्कालाद्य° ॥ १ ॥

विघ्नेशं विघ्नहर्तारं गणराजं नमाम्यहं ।
शारदां वरदां नौमि जाड्यापनुत्तये तथा ॥ १ ॥
श्रीगोपालं नमस्कृत्य नत्वा गुरुपरंपराम् ।
भर्तृहरिकृतो ग्रंथस्तस्य व्याख्यां करोम्यहम् ॥ २ ॥

दिगिति दशदिशासु तथा भूतभविष्यवर्तमानत्रिकालेषु अनवच्छिन्नाः । अत एव अनंतः अंतो नास्ति । चिन्मात्रमेव ज्ञानमूर्तिः स्वरूपं यस्य °

It ends: अतस्तेजस्विनः सुखममून् प्राणानपि त्यजंति॥११०॥ इति श्रीभर्तृहरिणा विरचितं टीकायां नीतिशतकं समाप्तम् ॥ [इति महेश्वरकृता नीतिशतकटीका समाप्ता ॥ R. M.].

III. *Śriṅgāraśataka* (100 vv.): शंभुस्वयंभुहरयो° ॥ १ ॥ परं तु नाम्ना सम्यग्विचारितं चेत्परिणामे वैराग्यमेवास्ति । निंदास्तुतिः स्तुतिर्निंदा वा द्विप्रकारो ऽस्ति । अत्र तावत्स्तुतिनिंदाप्रकारः । °

Cf. R. Garbe, Tübingen MSS. (2nd coll.), no. 62.

This is MS. A of Bohlen's edition (praef., p. x.), old number 1791. [Gaikawar.]

3998.

1419 b. Foll. 15; size 11¾ in. by 4¼ in.; indifferent, modern Bengālī handwriting; 11 or 12 lines in a page.

Bhartṛihari's Śriṅgāraśataka (100 vv.), with the same commentary.

The latter commences: अथ शृङ्गारशतं नाम्ना परं तु सम्यग्विचारितं चेत्परिणामे °

This is MS. C of Bohlen, old number 1549. [H. T. Colebrooke.]

3999.

1203 a. Foll. 20; size 12 in. by 4½ in.; fair Devanāgarī writing of 1798 A.D.; 7–10 lines in a page.

Bhartṛihari's Śriṅgāraśataka (101 vv.), with the same commentary, commencing as in the preceding MS.

This is MS. D of Bohlen, old number 1378. [H. T. Colebrooke.]

4000.

1854. Foll. 25, 19 & 24; size 11 in. by 5¼ in.; clear, modern Devanāgarī writing; 7–11 lines in a page.

Bhartṛihari's three *Śatakas*, with a rhymed paraphrase (*ṭīkā*) in Marāṭhī.

Noticed by Bohlen under the old number 140.

I. *Nītiśataka* (99 vv.): यां चिंतयामि ° ॥ १ ॥ मी जीस चिंतित असे नरुचे तिला मी । माने तिला अपर तो पर अन्यगामी । संतुष्ट मद्विषइं आनयघु च पाहीं । धिक तीस त्यास मदनास इला मला हीं ॥ १ ॥

II. *Śriṅgāraśataka* (100 vv.): चूडोत्तंसित °॥ १ ॥ मौलि स्थान मनोज्ञ चंद्रकलिका°

III. *Vairāgyaśataka* (116 vv.): [चूडोत्तंसित°॥१॥] अथ तृष्णापद्धतिप्रारंभः॥ भ्रांतं देशमनेकदुर्गविषमं° २ ॥ ॥ शिणो निष्फळों महाविषमदुर्गदेशांतरां । °

[Dr. John Taylor.]

4001.

2555. Foll. 15; size $13\frac{1}{2}$ in. by $5\frac{3}{4}$ in.; good Devanāgarī writing of 1775 A.D.; 12–14 lines in a page.

Bhartṛihari's Vairāgyaśataka; with a commentary by *Dhanasāra,* pupil of *Siddhasūri* of the *Ūkeśagaccha.*

It begins: दिक्कालाद्य° ॥१॥ तस्मै शांताय तेजसे परब्रह्मणे नमः। किंविशिष्टाय शांताय तेजसे स्वानुभूत्येकमानाय स्वकीयायाः अनुभूतेः अनुभवात् एकमानं यस्य स स्वानुभूत्येकमानस्तस्मै। पुनः किं°। शांताय तेजसे दिक्कालाद्यनवच्छिन्नानंतचिद्ज्ञानमूर्तये। दिक् च कालश्च दिक्कालौ। दिक्कालाभ्यां अनवच्छिन्ना अज्ञाता(!) अनंता चिदानंदस्य मूर्तिर्यस्य स दिक्कालाद्यनवच्छिन्नानंतचिज्ज्ञानमूर्तिस्तस्मै ॥ १ ॥ अथ गुणहीनतास्वरूपमाह। बोद्धारो मत्सरग्रस्ताः° ॥ बोद्धारो ज्ञातारो मत्सरग्रस्ताः विरोधव्याप्ताः प्रभवो नृपाः स्मयदूषिताः गर्वकलंकिताः चान्ये जनाः अज्ञानोपहताः अंगे शरीरे सुभाषितं जीर्णं स्मृतिहीनं एते प्रकाराः महिमानं न प्राप्नुवंति ॥ २ ॥ °

Cf. Rāj. Mitra, Notices, viii., p. 186. This MS. was apparently unknown to Bohlen.

It ends:

> ऊकेशगच्छगगनांगणदीप्तभानोः
> श्रीसिद्धसूरिसुगुरोर्महिमाधिकस्य।
> शिष्येण तस्य धनसारवरेण रम्या
> टीकेयमद्य ननु भर्तृहरौ विधापि(°रव्यधायि) ॥

इति श्रीभर्तृहरस्य(!) तृतीयस्य खंडस्य टीकेयं समाप्ता ॥ लिख्यतं श्रीमत्संप्रदायादादूपंथिषु मध्ये श्रीमदाचार्यश्रीसंपतरामजीतत्पादपूज्यशिष्यश्रीमन्मनोहरदासजी तद्भृत्य अखै(? *i.e.* अक्षय)रामेण जयपुरनाम्नीनगर्यां श्रावणमासे शुक्लपक्षे तिथौ चतुर्दश्यां संवत् १८३२ ॥ [MACKENZIE COLLECTION.]

4002.

1503 d. Foll. 9; size $11\frac{3}{4}$ in. by 4 in.; indifferent, modern Devanāgarī writing; ten lines in a page.

Amaruśataka, a century of erotic stanzas, ascribed to a poet (or a king) *Amaru* (also called *Amaruka* and *Amarū*).

A very incorrect MS., counting 102 verses.

The work has been repeatedly printed in India. It has also been published, with a French translation, by A. L. Apudy (*i.e.* A. L. de Chézy), Paris 1831. There is, moreover, a critical edition, with extracts from the commentaries,[1] and an exhaustive discussion of the different recensions of the work, by R. Simon (Kiel 1893). [H. T. COLEBROOKE.]

4003, 4004.

1392 a & b. Foll. 12+35; size $13\frac{1}{2}$ in. by $3\frac{1}{4}$ in.; careless, modern Bengālī handwriting; 6 and 8 lines in a page.

Amaruśataka; followed by a commentary (*ṭīkā — Kāmadā*), by *Jñānānanda Kalādhara Ravicandra,* in which the text is explained in a double sense (viz. that of sensuous love and dispassion).

The MS. of the text, which is pretty correct, contains only 98 verses, terminating abruptly without colophon.

The commentary, which has been printed at Calcutta (1808), begins in this MS. and the next:

> विद्या वितरति मुक्तिं भुक्तिमविद्याया भुजिष्यामः(भ°)।
> या चरमाचरमा या शक्तिः सा नः शिवं विशतु(*r.* दि°)॥
> तमुभयरसपरिपाठीपरिहरणवाटीमिमां(*r.* तदु°) रम्यां।
> कुरुते ऽमरुशतटीकां [ज्ञानानन्दः कलाधरः श्रीमान्] ॥
> यो ऽसौ भाग्यवता विभक्तवलितज्ञानामृतानन्दधुर्
> यो वात्स्यायनकामतन्त्रविलसत्केलिक्रियाकौशलः।
> व्याचष्टे ऽत्र रसद्वयं कविकुलालङ्कारचूडामणिः
> श्रीलश्रीरविचन्द्र एष पिशुनां मात्सर्यतामुत्सृजन् ॥
> यदि स्यात्परमानन्दे कामानन्दे च वासना।
> तदा संसेव्यतां धीराष्टीकेयं कामदा सदा ॥

Colophon: इत्यमरुशतकटीका समाप्ता ॥

This MS. of the commentary is rather incorrect. [H. T. COLEBROOKE.]

---

[1] The extracts from commentaries given under the following numbers were made before the appearance of this edition, and are here retained for comparison.

4005.

711b. Foll. 27; size 16 in. by 5¼ in.; good, modern Bengālī handwriting; nine lines in a page.

Amaruśatakaṭīkā (*Kāmadā*), the same commentary (without the text), but here (wrongly) ascribed to *Vidyāvinoda Sukṛitin* (*Ravicandra*); and counting 95 verses of the text. A more correct MS.

In the second line of the 2nd introductory verse, where the MS. reads: कुरुते ऽमरुशतटीकां विद्याविनोदः सुकृती श्रीमान् । the two words underlined, giving the author's name, have been subsequently written in (in somewhat paler ink), though perhaps by the same hand. Most likely the MS. was copied from the same original as the preceding one, which omits the author's surname in the 2nd verse, and the scribe filled up the lacuna with a name of his own invention, but unfortunately not according with the metre. Whether this is also the case as regards the colophon is not quite clear. It runs thus: पूर्वग्रामिकुलकलानिधिश्रीविद्याविनोदाचार्यभट्टाचार्यकृतामरुशतकटीका समाप्ता ॥

Then follows an imperfect list of the authorities used by the commentator, for which, as completed, see Simon, p. 24.

[H. T. Colebrooke.]

4006.

711a. Foll. 66; size 16 in. by 5¼ in.; fair, modern Bengālī handwriting (apparently different from that of the preceding MS.); nine lines in a page.

Amaruśatakaṭīkā(-traya), three commentaries on the *Amaruśataka*, written one after the other for each verse, viz.: —

I. An anonymous commentary (on 106 vv. of the text).

It begins: काश्मीरदेशनिवासिनः शतमीमन्तिनीललितगतिविलासवल्गुस्मितापाङ्गावलोकनक्रभङ्ग्यादिभिरपहृतहृदयस्य इन्द्रियैरविचारितविषयविषयान्धकूपनिवेशितस्य अमरुनामधेयधरणीपतेर्ज्ञानोपदेशार्थं परमकारुणिको भगवान् शङ्कराचार्यः कदाचिद् दिग्विजयव्याजेन तत्समितिमुपगतो यथावदुपकल्पितोपचितिरुपविष्टः सभ्यैः शृङ्गाररसवर्णनार्थमभ्यर्थितस्तथा कृतवान् । तत्र कुमारव्रतचारिणः शृङ्गाररसवर्णनमिति तेषामुपहासमसहमानः स्वकृतग्रन्थमयपाथोभिशंसनाय परसंहननप्रवेशविद्ययायनीपतेरस्यैव वपुराविवेश। अनन्तरमपि राजा स्ववदननिर्गततदमलनिगूढार्थमभिशृण्वन्नेव परिवन्दिताशेषकषायाखिलजगद्वन्धविध्वंसनपरायणानां विद्यामधिगत एवाविद्याविस्मृतपरमतत्त्वसंमृतेर्विरराम तदाकर्णनजनितवैराग्येण तत्समितिसेविनो ऽपि परमशान्तिमवापुरिति शान्तरसमत्र व्याख्यास्यामः । ०

It ends: उरुद्वयमिति श्लोकेन सामान्यसृष्टेरनन्तरं विशेषसृष्टौ कन्दर्पमाययोः प्राधान्येनोपयोगित्वात् तदुभयस्मरणं सामान्यसृष्टिः स्वर्गपातालसृष्टिमात्रं विशेषसृष्टिः । तथा च । विश्वसर्गो विसर्ग इति श्रीभागवतम् ॥ १०६ ॥

II. A commentary, the author of which is not mentioned, but which (as Simon points out) seems to be identical with that of *Rāmarudra Nyāyavāgīśa Bhaṭṭācārya*, described in the Notices, vii., p. 135.

It begins: अथ ग्रन्थारम्भे विघ्नविघाताय ग्रन्थकृद्भगवतोस्मरणलक्षणमङ्गलमाचरन् राजानमाशीर्वादेन योजयति ज्याकृष्टेति । ०

It ends: ॥ १०५ ॥ ऊढयौवनात् कामदेवभूपतेरभिषेकसामग्रीत्वेन वर्णयति । उरु द्वयमिति मनोजनृपतेरभिषेचनाय अभिषेकाय मृगदृशो मृगलोचनाया उरुद्वयं कदलस्य काण्डौ मध्यं अतुलं वेदिरस्याः(!) स्तनयुगं लावण्य°कुम्भौ अभिषेके च कदलीकाण्डरोपणवेदिनिर्माणयोग्य इत्यर्थः ॥ इत्यमरुशतकटीका समाप्ता ॥

III. The commentary of *Jnānānanda Kalādhara Ravicandra* (called, however, *Kavicandra* in the MS.); here adapted to a different recension from that followed by the above two MSS.

It begins:

विद्या वितरति मुक्तिं भुक्तिमविद्या तु या(!) भुजिष्यामः ।
चरमाचरमार्थी शक्तिः सारः(सा वः) शिवं दिशतु ॥
तदुभयरसपरिपाटीकामिकां रम्यां(!) ।
अमरुशतकस्य टीकां ज्ञानानन्दः कलाधरः कुरुते ॥

यः श्रीभागवताविभक्तिवलितज्ञानामृतानन्दधुर्यो° श्रील-श्रीकविचन्द्र एष पिशुनामात्सर्यमुत्सार्यतां ॥ °

It is only carried on as far as verse 90 (आयाते दयिते°) of this recension.

[H. T. Colebrooke.]

4007.

2580a. Foll. 29; folio, size $11\frac{3}{4}$ in. by $8\frac{1}{4}$ in.; modern Telugu handwriting; 32–36 lines in a page.

Amarūśataka (or *Amarūkam*, as it is called on the fly-leaf); with a commentary, called *Śṛiṅgāra(rasa)dīpikā*, by *Vemabhūpa*, son of *Komaṭīndra*.

The commentary begins with 11 *ślokas*, which, owing to their being preceded by the first verse of the text, are numbered 2–12:

गणपतिमतिविघ्नं(°विघ्नं) भक्तसंघातविघ्नं
भजत भुजगशेषव्याप्ततेजोविशेषं ।
अहितकलितचंडं तं प्रतापप्रचंडं
सुरगणनुतपादं शोर्षपीयूषपादं ॥ १ ॥[1]

अन्योन्यमेलनवशात्प्रथमं प्रवृद्धं
मध्ये मनाग्व्यवहितं च कुतो न(ऽपि ed.) हेतोः ।
प्राप्तं दशामथ मनोरथबोध(लोभ ed.)योग्यां
पायाच्चिरं रतिमनोभवयोः सुखं नः ॥ २ ॥

आसीच्चतुर्थान्वयचक्रवर्ती
वेमक्षितीशो जन[ल]भ्रगंडः ।
एकादशेति प्रतिभाति शंका
येनावताराः परमस्य पुंसः ॥ ३ ॥ (om. ed.)

राज्यं वेमः सुचिरमकरोत्प्राच्यहेमाद्रिदानो(!)[2]
भूमीदेवैर्भुवमुरुभुजो भुक्तशेषामभुंक्त ।
श्रीशैलाग्रात्प्रभवति पथि प्राप्तपातालगंगा-
सोपानानि प्रथमपदवीमारुरुक्षुश्चकार ॥ ४ ॥

[1] Different in ed. [2] °प्राज्य°दानो ed.

माचक्षोणिपतिर्महेंद्रमहिमा वेमक्षितीशाग्रणी[1]
रामाद्यैः[2] सदृशो बभूव सुगुणैस्तस्य त्रयो नंदनाः ।
कीर्त्या जाग्रति रेड्डिपोतनृपतिः[3] श्रीकोमटींद्रस्ततो
नागक्ष्मापतिरित्युदात्तवपुषो[4] धर्मार्थकामा इति(इव) ॥ ५ ॥

वेमाधिपो माचविभुश्च नंदनौ
श्रीकोमटींद्रस्य गुणैकसंश्रयौ ।
भूलोकमेकोदरजन्मवांछया
भूयो ऽवतीर्णाविव रामलक्ष्मणौ ॥ ६ ॥

स वेमभूपः सकलासु विद्या-
स्वतिप्रगल्भो जगलभ्रगंडः ।
कदाचिदास्थानगतः कवीनां
काव्यामृतास्वादपरः प्रसंगात्[5] ॥ ७ ॥

अमरुकविना[6] रचितां शृंगाररसात्मिकां शतश्लोकीं ।
श्रुत्वा विकसितचेतास्तदभिप्रायं प्रकाशतां नेतुं ॥ ८ ॥

मूलश्लोकान् समाहृत्य प्रक्षिप्तान् परिहृत्य च ।
विधत्ते विदुषामिष्टां टीकां शृंगारकात्मिकां[7] ॥ ९ ॥

अवतारो ऽर्थसंबंधो[8] ऽभिप्रायो भावलक्षणं ।
नायुक्तास्तदवस्थाश्च[9] नायकश्च ततो रसः ॥ १० ॥

अंगानि कैशिकीवृत्ता(r. वृत्ते)रलंकारस्ततः क्रमात् ।
इत्येतानि प्रवक्ष्यंते यथासंभवमंजसा ॥ ११ ॥

अत्रादौ कविस्तावदविघ्नपरिसमाप्त्यर्थमिष्टदेवतास्मरणद्वारेणाशिषं प्रयुंक्ते ।

ज्याकृष्टिबद्धकटकामुखपाणिपृष्ठ-
प्रेंखन्नखांशुचयसंवलितो मृडान्याः ।
त्वां यातु मंजरितपल्लवकर्णपूर-
लोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥ १ ॥

मृडान्याः दुर्गायाः कटाक्षो ऽपांगदर्शनं त्वां पात्विति क्रियासंबंधः । कीदृशः कटाक्षः । ज्या° संवलितः । ज्याकृष्टये बद्धः कटकामुखपाणिः कटकामुखो नाम धनुराकर्षणहस्तविशेषः । तर्जनीमध्यमामध्ये प्रेंखांगुष्ठे[10] न विद्यते यस्मिन्ननामिकायोगात् स हस्त[:] कटकामुखः तस्य पृष्ठे पश्चाद्भागे प्रेंखंतश्चलंतः नखानामंशवः तेषां चयः समूहस्तेन संवलितः मिश्रः । °

[1] °ग्रजो ed. [2] हेमाद्रेः ed. [3] रेड्डिपोत° ed.
[4] °त्युपात्तवपुषो ed. [5] °स्वादनतत्परो ऽभूत् ed.
[6] अमरुककविना ed. [7] °दीपिकां ed. [8] ऽथ संबंधो ed.
[9] नायिका तदवस्थाश्च. [10] पुंखांगुष्ठे ed.

This MS. has 100 verses, the order of which varies somewhat from the printed texts: thus Hæb. 32 being inserted here between vv. 3 and 4; and Hæb. 80 between 4 and 5; whilst some differ entirely. The last 10 begin as follows: 91. अदृष्टप्रसरात्प्रियस्य पदवीमुद्वीक्ष्य° (Hæb. 74); 92. देशैरन्तरिता शतैश्च सरितामुर्वीभृतां° (Hæb. 93); 93. खिन्नं केन मुखं दिवाकरकरैः°; 94. कठिनहृदये मुंच भ्रांति° (H. 47); 95. भ्रूभेदो गुणितत्परं नयनयोर° (H. 92); 96. चरणपतनं साम्नालापा मनोहरचाटवः°; 97. कांते तल्पमुपागते°; 98. निःश्वासा वदनं दहंति हृदयं निर्मूलमुन्मूल्यते°; 99. नांतःप्रवेशमरुणद्विमुखी न चासीत्°;

प्रियकृतपटस्तेयक्रीडाविलोभन(*r.* विलंबन)विह्वला
किमपि करुणालापा तन्वीमुदीक्ष्य ससंभ्रमं ।
अपि विगलिते स्कंधावारे गते सुरताहवे
त्रिभुवनमहाधन्वी स्थाने न्यवर्तत(व्य° ed.) मन्मथः ॥१००॥

The commentary ends without colophon: तत्र पटस्तेयक्रीडासंभोगावसाने कृते निवेदितव्यागते सुरताहव इत्युक्तत्वात् । सुरतस्य आहवत्वनिरूपः ॥

The fly-leaf has the following title: "*Amarūkam*, a rhetorical book, composed by *Śaṅkarācārya* after he had transmigrated himself into the body of the king of Amarooga." Cf. Burnell, Tanjore MSS., 163*b*, where the commentator is called *Vimabhūpāla;* and Taylor, Cat. Rais., pp. 86, 89, where he is called *Diva Bhūpalan,* and *Deva Bhupāla.* This commentary was printed at Madras in 1871.

[MACKENZIE COLLECTION.]

4008.

175b. Foll. 18; size 12 in. by 4½ in.; good Devanāgarī writing of 1798 A.D.; 5–10 lines in a page.

Caurapañcāśikā, a series of 50 erotic verses, generally ascribed to the Kaśmīr poet *Bilhaṇa;* with a commentary, by *Gaṇapati,* son of *Rāmopādhyāya.*

Text and commentary were published, by P. v. Bohlen—in his edition of *Bhartṛihari* (Berlin, 1833)—from a transcript made (by Lassen) from this MS. An edition of the Kaśmīr recension (discovered by Bühler) has been published by Dr. W. Solf (1886).

This commentator assigns the poem to a poet *Caura.* On the (doubtless fictitious) circumstances which are said to have occasioned the composition of these verses, see Colebrooke, M. E., ii., p. 95 (2nd ed., p. 86); Bohlen's Introd., p. xxvi.; Aufrecht, Cat. Bodl., no. 245; Bühler, Det. Rep., p. 48; *Vikramāṅkacarita,* Introd., p. 6; and this Cat., no. 4011.

The commentary begins:

विघ्नेश्वरं नमस्कृत्य रामोपाध्यायनंदनः ।
गणपतिस्तनुते(गणपस्त° Bo) टीकां खंडकाव्यस्य वै स्फुटां ॥

Colophon of text: इति श्रीचौरमहाकविना रचिता श्लोकपंचाशिका समाप्ता ॥ [H. T. COLEBROOKE.]

4009.

1577E. Foll. 23; size 9 in. by 4¼ in.; modern Devanāgarī writing; 7–11 lines in a page.

Caurapañcāśikā, with *Gaṇapati's* commentary. [B. H. HODGSON.]

4010.

3240. Foll. 4; size 14½ in. by 6 in.; modern Bengālī handwriting; 8 or 9 lines in a page.

Caurapañcāśikā, without commentary.

This version of the text differs considerably from that adopted by *Gaṇapati,* both in the general arrangement and in the readings of particular verses. As far as the arrangement goes, *Gaṇapati's* verses will be found in the following order in this text: 1–6, 10–12, 7–9, 13, 14, 16, 15, 17, 19, 18, 20–31, 34, 32, 33, 35–50. [?]

4011.

1184 a. Foll. 55; size 13¼ in. by 5 in.; excellent Bengālī handwriting of 1806 A.D.; eight lines in a page.

Caurapañcāśikā, in a somewhat different recension; with a commentary, called *Kāvyasaṃdīpa* (*kālikāpakshavyākhyāna*), composed, in 1798 A.D., by *Rāma Tarkavāgīśa Bhaṭṭācārya,* son of *Nandarāma,* and grandson of *Janārdana,* a Brāhman of the neighbourhood of (the tīrtha) Siddheśvarī. [A.]

According to the commentator's view, as set forth in the introduction and epilogue, the verses were uttered, as an invocation to the goddess *Kālī,* by prince *Sundara,* son of *Guṇasāgara* (of Caurapallī in Rāḍhā), when standing on his trial before king *Vīrasiṃha,* and awaiting his sentence of death, for having entered into a clandestine union with the king's daughter *Vidyā;* whereupon the king is inclined by the goddess to mercy, and gives the prince his daughter in marriage. Cf. above, no. 4008.

Some of the original stanzas being quoted in *Bhāratacandra's* Bengālī poem *Vidyāsundara,* this fact is supposed to have given rise to the ascription of the 50 stanzas to a poet *Sundara.* Cf. Rāj. Mitra, Notices, i., p. 250.

The commentary begins (with the figures supplied):

विद्याविद्यातमिश्रप्रतिहतचितदृक्तारका ताररूपा
  तारासाराहिहारा हरिहरविधिसज्ञानधारानगम्या ।
श्यामा काम्या सुरम्यासुरसुरसकलानन्दकन्दा सुनन्दा
  साद्या काद्याभिवाद्या वरददरहरा सा तु पायाच्चिरं नः ॥ १ ॥
कौमारोपमभूरिभूसुरवरा कौमारहट्टस्थली
  भव्या भव्यकवीन्द्रकाव्यलहरीहृल्लासपूर्णाङ्करी ।
सल्लासमवावरी(?) दरदरा यत्रास्ति सिद्धेश्वरी[1]
  तत्र श्रीलजनार्दनो द्विजवरो ऽप्यासीच्च तस्यात्मजः ॥ २ ॥

[1] B omits this *pāda.*

श्रीलश्रीनन्दरामः प्रथितपृथुयशाः काञ्जिवंशाब्जहंसस्[1]
  तत्पुत्रो रामनामा रचयति रुचिरं सौन्दरश्लोकतत्त्वं ।
सन्तः संतोषयन्तो निदधति नितरां शोधयन्तो हि नव्यं
  श्रीमच्छिष्यप्रमोदं विपठिपुसुपमं काव्यसंदीपसंज्ञं ॥ ३ ॥
ख्यातश्रीगुणसागराख्यनृपतेः पुत्रप्रतिष्ठो[2] ऽभवन्
  नाम्ना श्रीयुतसुन्दरो नरवरो वीर्यातिधैर्यान्वितः ।
श्रीकालीपदपूजकः क्षितितले ख्यातः क्षमापालकः
  कान्त्या कामजितो जितारिनिकरो विद्यापतिः श्रीपतिः ॥ ४ ॥
गाम्भीर्यस्थैर्यधैर्यं चटुतरचरितं रूपलावण्यविद्या
  विद्याया वेददास्यं त्वभिनववयसो [ऽ]दूरवस्था विदग्ध्यं(!) ।
श्रुत्वा सद्वक्त्रवक्त्रादिति(संवक्त्॰ B) नृपतिसुतः सुस्थ एवाप्यसुस्थो
  मुग्धो [ऽ]मुग्धो [ऽ]प्यजग्धः शरशयितसुहृच्चौर्यचिन्तापरो
[ऽभूत् ॥ ५ ॥
विद्यानवद्या नृपवीरसिंहकन्या वदान्या बुधमान्यधन्या ।
सा संहृता भूपजसुन्दरेण चौरेण गेहे पितुरप्यनूढा ॥ ६ ॥
विद्यागर्भे प्रभूते रहसि सखिजनो लज्जया दष्टजिह्वो
  धिक् धिक् त्वां हीति चित्रं किमिति हिमवलो(?॰तो) कुम्भमा-
इत्याभाष्यानुपूर्वं तव दुहितुरिदं श्रावयामास भूपं [लम्ब्य कण्ठे ।
  श्रुत्वा खर्वातिगर्वः[3] स तु भटमदिशच्चौरमानेतुमार्त्तः ॥ ७ ॥
दूतैरानीतमाशु क्षितिपतिसविधे सुन्दरं सुन्दराङ्गं
  पश्यन् भूपः सकोपस्त्वरुणितनयनो ऽपत्रपानम्रवक्त्रः ।
दूतान् प्राहेति सो ऽयं विलुलितवदनो बध्यतां छिद्यतां रे
  श्रुत्वैवं राजपुत्रः पिहितपदगिरा प्रास्तवीत्स्वेष्टदेवीं ॥ ८ ॥

यद्यप्यखिलशास्त्रसंकुलपारावारसमुत्थिततत्त्वपीयूषनिपीत-मण्डितमण्डलकृतकाव्यतत्त्वमस्ति तथाप्यभिनवमिति मत्वा दयावन्तः सन्तः संशोधयन्तो गृह्णन्तीत्यभिगम्य मया व्याख्यायते ॥ अद्यापीति ॥ अपीति स्मरणे । तत् किं । श्रीमत्कालीपदपूजकः सो ऽहं । मम कुतो भयं मैव मामवतीत्याहोपुरुषिकां कृत्वा राजकुमारः कृतान्ततुल्यदुर्दान्तराजकिंकरसंकुलानीतो ऽपि निरातङ्काशङ्कः श्लिष्टवचसा राजानं तुदन् परदेवतां चिन्तयन् स्तवीति अद्यापीत्यादिपञ्चाशच्छ्लोकेन । तस्यायमाद्यश्लोकः । ॰

The text here commented upon offers differences in reading as well as in arrangement from the preceding two versions, coinciding sometimes with the one and sometimes with

[1] ॰ वंशाहजहंसस् B; ? read काञ्चि॰.

[2] ख्यातः श्री॰ B; पुत्रः प्रतिष्ठो A, B.

[3] खर्वातिखर्वः B.

the other. Three of the verses in this recension (vv. 30, 39, 41) are quite different from the corresponding verses (vv. 30, 40, 43) of the other versions, and v. 48 may be considered as a set-off for v. 6 of the other versions not found in this. It ends:

पञ्चाशत्संख्यकैः पद्यैश्चौरराजकृतैश्च सा ।
तुष्टा त्रिभुवनेशानी राज्ञो जिह्वां समाविशत् ॥
दीनानुकम्पिनी दुर्गा दुर्गसागरतारिणी ।
भक्तानुकम्पिनी माता उवाच वचनं सती ॥
राजजिह्वां समास्थाय वाणीरूपाभवत्स्वयं ।
उवाच नृपतिर्भूयो विद्यापतिरयं त्वयि ॥
तच्छ्रुत्वा सुन्दरो राजा बाहुमुत्तोल्य चाम्बरे ।
धूलिगुण्ठितसर्वाङ्गो गलत्केशो महामनाः ॥
राजन् धर्मस्वरूपो ऽसि सत्यवादी जितेन्द्रियः ।
उक्तेनानेन वाक्येन धर्मभाग्भव भूमिप ॥
पुरा(पुना) राजा चौरवाक्यं श्रुत्वा किं किं हि भण्यतां[1] ।
ततश्चौरश्च[2] विद्यायाः पतिर्भूपतिरित्यपि ॥
यदुक्तं॥ उदयति यदि भानुः पश्चिमे दिग्विभागे
प्रचलति यदि मेरुः शीततां याति वह्निः ।
विकसति यदि पद्मं पर्वताग्रे वने वा[3]
न चलति खलु वाक्यं सज्जनानां कदाचित् ॥
ज्ञात्वा चौरस्य वाक्यं विकसितवदनो ऽभून्नदासी नरेन्द्रो
नानाविद्यातिदृष्टिः सदसि स रिपुजिच्चौरमङ्के निधाय ।
उक्तः कस्त्वं नृपेण प्रकथय मतिमन् कस्य पुत्रो ऽसि वत्स
को वा देशः कुलं च मम पुरगमनं क्षम्यतां ताडनं यत्[4] ॥
श्रुत्वा चौरः कथयति ॥
गुणसागरस्य पुत्रो ऽहं राज्ञो राजन् कृपानिधे ।
देशश्च चौरपल्ली मे[5] राढायां पूजितो(°ते B) नृपैः ॥
देवतागुरुविप्राणां प्रसादात्ते ऽगमं पुरं ।
तव प्रसादान्मुक्तो ऽहं बन्धनाद्धो महानृप ॥
राजा प्रज्ञाय सर्वं शुभदिनमकरोच्चौरराजाय विद्यां
कन्यां पद्मायताक्षीं शशधरवदनां संप्रदाय प्रभुः सः ।
हस्ते राजा च चौरो जलजनिनयनाभूद्धि[6] विद्या सुमध्या
सर्वं कालीप्रसादान्निजपुरगमनं चौरराजस्य तस्याः ॥

[1] हिरण्यतां B. [2] चौराच्च B.
[3] विकसित(°तं) यदि पद्मं पर्वतानां शिखाग्रे B.
[4] ताडयनयत् B. [5] चौरपल्लीये B. [6] भूक्षि B; °नां भूद्धि A.

इति श्रीचौरसुन्दरकृतपञ्चाशच्छ्लोकस्य कालिकापक्षव्याख्यानं संपूर्णं ॥

भव्ये सभ्ये प्रपञ्चे स्मरहरमहिलास्तोत्रपद्ये सुकाव्ये
सौन्दर्ये धैर्यवर्या यदि यदसदृशं प्रोक्तमत्र प्रमादात् ।
क्षन्त्वा तत्क्षान्तिमद्भिर्धरणिधरधरैर्नैतरादप्यचिन्नैर्[1]
बुध्या[2] संशोधनीयं ननु खलु महसा प्राञ्जलिप्रार्थनीयं ॥
अनन्तनेत्रासुजराजपूर्णे शके स्मराहे सितपक्ष ऊर्जे ।
निधाय चित्तं द्विजरामनामा चकार सौन्दर्यसुकाव्यतत्त्वं ॥

तस्यार्थः । ° श्रीरामनामा द्विजः सौन्दर्यसुकाव्यतत्त्वं सुन्दररचितसुकाव्यस्य तत्त्वं याथार्थ्यं चकार ° । अनन्तं गगणं शून्यमिति यावत् । नेत्रं द्वयं । असुजं सप्त । राजा एकः । एतैन पूर्णो यः स तथा तस्मिन् । स्मराहे त्रयोदश्यां ऊर्जे सितपक्षे । तत्र प्रमाणं । पक्षः सहाये मासार्धे पार्श्वे साध्यकिरीटयोः । वले पतत्रे केशादेः परतो निकरस्तके इति भूरिप्रयोगः । कार्त्तिकस्य शुक्लपक्षे । ऊर्जस्यायं ऊर्जे इति पक्षविशेषणं । [१७२० B] ॥ श्रीकालीकल्पवल्ली° ॥ समाप्तश्चायं ग्रन्थः ११२९ ॥ इति श्रीरामतर्कवागीशभट्टाचार्यविरचिता चौरपञ्चाशतटीका समाप्ता ॥

शके कीदृशि । अनन्तने [H. T. Colebrooke.]

4012.

2881. Foll. 30; folio, size 11⅜ in. by 8¼ in.; modern Bengālī handwriting; 24–27 lines in a page.

Caurapañcāśikā, with the same commentary. [B.] [Dr. Leyden.]

4013.

2118a. Foll. 22 (and an additional leaf between 9 and 10); size 8½ in. by 3⅛ in.; good, small Devanāgarī writing of 1681 A.D.; seven lines in a page.

Bhāminīvilāsa, 'the dalliance of a fair woman,' a series of verses in 4 cantos (*vilāsa*), by *Jagannātha Paṇḍitarāja*, of the *Akhilāndhra-Veṅgināṭikula*.

[1] Marg. note: धरो धारणधैर्ययोरिति व्याडिः । A.
[2] बुद्धा B.

I., 101 vv.; II., 101 vv.; III., 19 vv.; IV., 31 vv. The inserted leaf contains I., 92–101; II., 1–5, omitted on fol. 9*b*.

Variously printed in India. Also the text, with a French translation, by A. Bergaigne (Paris 1872); and, with an English translation, by *Sheshādri Iyar* (Bombay 1894).

Cf. Aufrecht, Cat. Bodl., no. 236; Cat. Catt., sub *Jagannātha*.

Dated: संवत् १७३८ वर्षे आश्विनकृष्ण ५ तिथौ लिखितमिदं पंचनदान्वयदामोदरभट्टात्मजहरिशंकरेण ॥

[GAIKAWAR.]

4014.

1811. Foll. 14; size $12\frac{1}{4}$ in. by 4 in.; clear Devanāgarī writing of 1770 A.D.; 11–13 lines in a page.

Bhāminīvilāsa.

This MS. begins:

माधुर्यपरमसीमा सारस्वतजलधिसंभूता ।
पिनतानन्यसुखदां वसुधायां मम सुधा कविता ॥ १ ॥
दिगंते ०

I., 128 vv.; II., 181 vv.; III., 19 vv.; IV., 32 vv.

Colophon: इति श्रीमदखिलांध्रवेंगिनारिकुलावतंसपंडितरजजगन्नाथनिर्मिते भामिनीविलासे शांतश्चतुर्थो विलासः समाप्तः ॥

[DR. JOHN TAYLOR.]

4015.

2883 a. Foll. 18; size $9\frac{1}{2}$ in. by 5 in.; European paper; Telugu character; fifteen lines in a page.

Bhāminīvilāsa.

I., 102 vv.; II., 184 vv.; III., 19 vv.; IV., 46 vv.

[MACKENZIE COLLECTION.]

4016.

1396. Foll. 163 (the first 12 of which are wanting); size $13\frac{1}{2}$ in. by 5 in.; fair, modern Devanāgarī writing; 8–14 lines in a page.

Jagannātha's Bhāminīvilāsa; with a commentary, called *Vilāsapradīpa* (of four *prakāśas*), composed, in 1802 A.D., by *Maṇirāma-śarman*, son of *Rāmacandra*, grandson of *Jayarāma-sūri*, great-grandson of *Bhaṭṭa Gaṅgārāma*, and elder brother of *Hari*.

Text and commentary begin with I., v. 22 (अपनीतपरिमलांतरकथे ०).

I., *prāstāvikavilāsa*, 126 vv.; II., *śriṅgāravarṇanavilāsa*, 182 vv.; III., *karuṇāvilāsa*, 19 vv.; IV., *śāntavilāsa*, 46 vv.

For cantos I. and II. of the text with the same commentary, see Aufrecht, Cat. Bodl., no. 236. The reference to the same commentator's(?) *Muktāvalīprakāśa* in the comment on I. 35 is as follows: दर्शिता चेयं रीतिर्विघ्नविघातायेत्येतद्व्याख्यानावसरे मुक्तावलीप्रकाशे ।

The commentary concludes with the following verses (the 1st of which also occurs, with some variations, at the end of canto I.):

तातः श्रीरामचन्द्रः सकलबुधवरश्रेणिसंगीतकीर्तिर्
माता ऽऽनन्दीति याता व्यवहृतिमनुजो यस्य सुज्ञो हरिः सः ।
तेन प्रोद्दर्शिते ऽस्मिन्गुणिमणिमणिरामाभिधेन प्रकाशः
पूर्णो लासप्रदीपे सुखयतु विबुधानेष तुर्यश्च धुर्यः ॥ १ ॥
सद्वर्षे ऽष्टशराष्टचन्द्रकलिते चैत्रे पवित्रे पुनर्
मासे चाथ वलक्षपक्षललिते सौम्ये दशम्यामयं ।
पूर्णः प्रादुरभूद्गिरीन्द्रतनयावक्षोजनिर्यत्सुधा-
स्वादप्रोद्भवदच्छबुद्धिरचितो लासप्रदीपाभिधः ॥ २ ॥
क्वाहं मन्दमतिः क्व चार्थगहनाः सत्सूक्तयो ऽस्याखिलाः
श्रीमत्पण्डितराजराजिमुकुटालंकारचूडामणेः ।
एवं सत्यपि यन्ममार्थरचनाचातुर्यमत्राद्भुतं
तज्जाने जननि त्वदीयकरुणावीरुत्फलं पेशलम् ॥ ३ ॥ ० ४ ॥
यदिह किमपि मे स्याच्चापलं भाषितेषु
प्रविदितरसशास्त्रास्तत्क्षमध्वं सुधीन्द्राः ।
अपटुबटुकृतानां चेष्टितानां प्रकाशो
न भवति किमु लोके यद्गुरूणां क्षमार्हः ॥ ५ ॥

A leaf is wanting at the end containing the last three syllables of the next verse (and any more verses there may have been) as well as the colophon, which in the other cantos runs thus: इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणकविताकान्तार-कण्ठीरवतारोपाह्वभट्टगङ्गारामशर्माङ्गजजयरामशर्मसूरिसूनुराम-चन्द्रविबुध(or शर्म)सुतविद्वन्मणिरामशर्मरचितायां भामिनीवि-लासव्याख्यायां विलासप्रदीपाख्यायां° प्रकाशः समाप्तः ॥

[H. T. Colebrooke.]

4017.

2425. Foll. 70; size 9 in. by 4 in.; fair, modern Devanāgarī writing; 8 or 9 lines in a page.

Āryāsaptaśatī, a collection of miscellaneous poetry, by *Govardhanācārya*.

See Colebrooke, Misc. Ess., ii., 74; Wilson, Pref. to 1st ed. of Sansk. Dict., p. xxxi. It has been repeatedly published in India.

Between foll. 43 and 44 there is a leaf from an astronomical work, called *Dyucārodaya*, by *Śrīpa* (*Śrīpati* or *Śrīla*) *Bhaṭṭa Tulasi*. It contains the last two verses of the *madhyamādhikāra*, and vv. 1–11 of the *spṛishṭādhikāra*; the latter beginning: गजाद्र्यो१८कें मृदुतुंगमुक्तं°

[Gaikawar.]

4018.

959. Foll. 256; size $10\frac{1}{2}$ in. by $4\frac{1}{4}$ in.; clear, modern Devanāgarī writing; 6–11 lines in a page.

Āryāsaptaśatī, with a commentary, called *Vyaṅgyārthadīpana*, composed, in Saṃvat 1702 (A.D. 1645), by *Ananta Paṇḍita*—son of *Timājī* (*Tryambaka*) *Paṇḍita*, grandson of *Bālo Paṇḍita*, and great-grandson of *Nīlakaṇṭha Paṇḍita*—a native of Puṇyastambha on the banks of the Godāvarī; but residing, at the time, at Benares.

The commentary begins: सर्वे साधुजनाः सदायत-हृदा सत्संप्रदायादलं°

Text and commentary were published at Benares in 1867; and in the *Kāvyamālā*, i. (Bombay 1886).

[H. T. Colebrooke.]

4019.

2220. Foll. 149; size $8\frac{1}{4}$ in. by 3 in.; legibly written in Devanāgarī, in 1685 A.D.; ten lines in a page.

Rasikacandrikā, a commentary on *Govardhana's Āryāsaptaśatī*, by *Gokulacandra*, eldest son of *Bālakṛishṇa Bhaṭṭa*, and grandson of *Mahādeva Bhaṭṭa*.

It begins:

कलयाम्यनेकदंतं विदंतमंतःस्फुटैकदंतमपि ।
विभुजं चतुर्भुजं यं जगंति गायंति मोदकैकभुजं ॥ १ ॥

श्रीमत्पितृचरणानामिदं पद्यं ॥

पीत्वा कर्णपुटेन यत्कलरवानाभीरवामभ्रुवः
कांतोपांतनितांतनिर्गमधिया प्रौढा नवोढायिताः ।
मुग्धानामपि सांप्रतं वितनुते दूतीव दूतिं(?दूत्यं) मुदा
श्रेयःसंततिमातनोतु मुरली सेयं मुरारेर्मुहुः ॥ २ ॥

सामान्यसुरतकथनं रसिकमनःप्रीतये भवति ।
राधाकृष्णविलसितं कविवरकथितं पुनः किमु नः ॥ ३ ॥

सामान्ययोः कयोरपि यूनोः सुरतकथनं । अथवा सामान्येन केनचित्कविना यत्सुरतकथनं रसिकानां मनःप्रीतये भवत्येव । इदं काव्यं तु शृंगाररसात्मकं । यत्र यत्रासाधारणः शृंगारस्तत्र तत्र राधाकृष्णात्मक एवेति राधाकृष्णविलसितमिदं कविवरो गोवर्धनाचार्यः यतः शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धनस्पर्धी कोऽपि न विश्रुत इति जयदेवोक्तः(°क्तं)। तेन कथितं पुनः किमुतेत्यर्थः। सकलशृंगाररसानुभवैकवेदिनो गोवर्धनाचार्यस्यैमामार्या-सप्तशतीं कथमहं तैलंगत्वादेकवनितारसैकदेशवेदी व्याख्यास्या-मीति चिंतयाप्यलं। क्वचिन्नीलद्युतिदेवताप्रसादेन क्वचिद्गुरूपदेशेन क्वचित्पितृचरणकृपया क्वचिन्नानाविधकाव्यावलोकनानुसारेण क्वचिल्लौकिकचातुर्येण क्वचित् शृंगाररसानुभवेनापि वक्तुं शक्यत एव श्रीमदात्रेयवंशावतंसश्रीमहादेवभट्टात्मजसमस्तविद्यानिधान-श्रीबालकृष्णभट्टज्येष्ठपुत्रेण कविकेसरीतिप्राप्तपदवीकेन ॥

शृंगाररससारज्ञगोवर्धनकृतेरियं ।
कृता गोकुलचंद्रेण टीका रसिकचंद्रिका ॥ १ ॥

अबुधा बहुधा विदूषणं गणयंतु प्रसभं न मे भयं ।
सुधियः शुचिभावभाविताः कविताः शोभयितार एव [यत् ॥ २ ॥
समयं गमयंति चक्रवाका
हृदि राकारजनीशमाक्षिपंतः ।
कुमुदानि मुदा स्तुवंति यत्नं
न हि कांते ऽपि समस्तपक्षपातः ॥ ३ ॥
कवितावनितासमानतामिह तात्पर्यविदो वदंति न ।
वनिता युवचित्तहारिणी कविता सर्वमनोविनोदिनी॥४॥

मदनमथनस्यापि चंद्रशेखरस्य शृंगारेण कामाधीनत्वात् प्रथमं तावत्पार्वतीपाणिग्रहणरूपं मंगलमारभते । पाणिग्रह इति ॥

It ends:

नैव व्याकृतिरुत्तमा न बहुशः कोपो न वालं कृपा
रुद्रस्येव ममार्धचंद्ररुचिराभिख्यातिविख्यातिनः ।
आर्येयं स्फुरिता नितांतसरसा प्राग्जन्मसंस्कारतो
व्याख्याता जगतां तनोतु नितरामंतःसतां मंगलं ॥ १ ॥

इति श्रीमदात्रेयवंशावतंसश्रीबालकृष्णभट्टतनूजगोकुलचंद्रविरचिता रसिकचंद्रिकाभिधाना गोवर्धनसप्तशतीटीका समाप्ता॥ संवत् १७४२ वर्षे पौषमासे कृष्णपक्षे १ गुरौ लिखितमिदं पुस्तकम् ॥

[Gaikawar.]

4020.

907. Foll. 91; size $15\frac{1}{4}$ in. by $5\frac{1}{4}$ in.; fair, modern Bengālī handwriting; nine lines in a page.

Satpadyaratnākara, a collection of miscellaneous verses, by *Govindadāsa.*

It begins (with the numbers added):

प्रणम्य गोविन्दपदारविन्दं गोविन्ददासो विदुषां नियोगात् ।
नानाकवीनामनवद्यपद्यैः सत्पद्यरत्नाकरमातनोति ॥ १ ॥
यं सांख्याः प्रकृतिं जगुर्यमपरे पातञ्जलाः पूरुषं
काणादाश्च यमीशमाक्षचरणा यं कर्म मीमांसकाः ।
यं ब्रह्माद्वयमेकमागमविदः शैवाः शिवं वैष्णवा
यं कृष्णं भगवन्तमत्र विमला(निगमा)स्तस्मै परस्मै नमः॥२॥
यस्यालीयत गन्धसीम्नि जलधिः पृष्ठे जगन्मण्डलं
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी ।
क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलम्बासुरो
ध्याने विश्वमभावधार्मिककुलं(?) कस्मैचिदस्मै नमः ॥ ३ ॥
वेदानुद्धरते जगन्ति वहते ० ॥ ४ ॥
पायाद्विश्रममन्दमन्दरगिरिप्रक्षुभ्यदुग्धोदधि ० ॥ ५ ॥
यस्य श्रीः परिचारिका चरणयोः ० ॥ ६ ॥
सेयं द्यौस्तदिदं शशाङ्कदिनकृच्चिह्नं ० ॥ ७ ॥

अथ मत्स्यावतारस्य ।

पातु त्रीणि जगन्ति पार्श्वकषणप्रक्षुभ्यदिङ्मण्डलो
नैकाब्धिस्तिमितोदरः स भगवान् क्रीडाझषः केशवः ।
त्वङ्गत्त्रिष्टुररोमराजिखचितब्रह्माण्डभाण्डावधेर्
यस्मात्कालकुतूहलेन कथमप्यङ्गेषु जीर्णायितं ॥

अथ कूर्मावतारस्य । ० अथ वराहावतारस्य । ० etc., अथ श्रीरामस्य । ० अथ विश्वामित्रेणानीतं रामं दृष्ट्वा जनकः ।

योग्यो ऽयं दुहितुर्वरः किल कुले वैवस्वतीये महान्
श्लाघ्यः साधुसमादरो यदि भवेद्रामो धनुर्भञ्जकः ।
पूर्वं भग्नमहोद्यमाः कति कति क्षोणीभुजो लज्जिता
नो जाने किमु दुःखदः किमथवा हर्षाय रामागमः ॥ ०

Fol. 3*b*: आरज्जि नारज्जि किमेतदेवं ० ॥ प्रतिप्रतीकं जनकात्मजाया ० ॥ अदत्त साम तु चकोरनेत्रा ० ॥ पद्यत्रयं कविजगदीशस्य ॥ The same poet is referred to on fol. 5*b*; but no other name has been met with on foll. 1–40.

It ends:

धेनुः सूते ऽपत्यमेकं लोकस्योपकृतौ स्थितौ ।
शूकरी बह्वपत्यानि तानि दुःखाय केवलं ॥
भावं सितानां रसपूरितानां
वहन्ति नित्यं जगतीह गावः ।
रसं न जानन्ति तथापि तासां
चित्रं चरित्रं किमिदं विधातुः ॥

इति श्रीगोविन्ददासविरचितः सत्पद्यरत्नाकरः समाप्तः ॥

See Rāj. Mitra, Notices, iii., p. 147 (ending differently).

[H. T. Colebrooke.]

4021.

2458b. Foll. 36; size $9\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; good Devanāgarī writing of ab. 1600 A.D.; 9–11 lines in a page; fol. 21*a* left blank; foll. 12 and 18 somewhat damaged and pasted over with transparent paper.

Sārasaṃgraha, a collection of descriptive poetry, compiled by *Śambhudāsa Paṇḍita.*

It begins (cf. *Mālatīm.*, v. 1; *Amaruś.* 2):

सानंदं नंदिहस्ताहतमुरजरवाहूतकौमारबर्हि-
त्रासान्नासाग्ररंध्रं विशति फणिपतौ भोगसंकोचभाजि ।
गंडोड्डीनालिमालामुखरितककुभस्तांडवे शूलपाणेर्
वैनायक्यश्चिरं वो वदनविधुतयः पांतु चीत्कारवंत्यः॥१॥

क्षिप्तो हस्तावलग्नः प्रसभमभिहतो व्याददानोंऽशुकांतं
गृह्णन्केशेष्वपास्तश्चरणनिपतितो नेक्षितः संभ्रमेण ।
आलिंगन्यो ऽवधूतस्त्रिपुरयुवतिभिः साश्रुनेत्रोत्पलाभिः
कामीवार्धापराधः(?) स दहतु दुरितं शांभवो वः
[शराग्निः ॥ २ ॥

तपस्वी कां गतो ऽवस्थामिति स्मेराननोत्सुकौ ।
गिरिजायाः कुचौ वंदे भवभूतिसिताननौ ॥ ३ ॥

उत्तिष्ठंत्या रतांते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विलुलितकबराभारमंसे वहंत्या[:]।
भूयस्तत्कालकांतिद्विगुणितसुरतप्रीतिना शौरिणा वः
शय्यामालिंग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु॥४॥

इति मंगलाचरणं ॥ अथ नायिकावर्णनं ॥

अनुच्छिष्टो देवैरपरिदलितो राहुदशनैः
कलंकेनास्पृष्टो न खलु परिभूतो दिनकृता ।
कुहूभिर्नो लुप्तो न च युवतिवक्त्रेण विजितः
कलानाथः सो ऽयं कनकलतिकायामुदयते ॥ ५ ॥

किमिंदुः किं पद्मं किमु मुकुरबिंबं किमु मुखं
किमब्जे किं मीनौ किमु मदनबाणौ किमु दृशौ ।
खगौ वा गुच्छौ वा कनककलशौ वा किमु कुचौ
तडिद्वा तारा वा कनकलतिका वा किमबला ॥ ६ ॥

इति नायिकावर्णनं ॥ अथ हारवर्णनं ॥ ०

ग्रामं गुणिगणसहितं काश्यप्याः पश्चिमे तटे प्रथितं ।
परमानपुरे नाम्ना तस्मिन्वासी विप्रस्ते(?°स्तस्थे) च॥१॥

उदिच्येषु(औदी°) च श्रेष्ठो हरि(वल्लभाया)दासत्वेन
[प्रथितोऽसौ ।
तस्य [च] सुतस्य सुतेन लिखितोऽयं सारसंग्रहः शुद्धः॥२॥

चैत्रे मासे सिते पक्षे दशम्यां भौमवासरे ।
वर्षे च शवषष्टाख्ये लिखितो ऽयं द्विजेन तु ॥ ३ ॥

Iti romāvalīvarṇanam jṛimbhā veṇī, fol. 2*b*; *vayaḥsandhiḥ*, fol. 3; *kaver uktiḥ*, fol. 5*b*; *nāyikām prati nāyakavākyam*, fol. 7; (*viparīta*) *suratavarṇanam*, fol. 7*b*; *abhisārikāv.*, fol. 8*b*; *nāyakacintanam, nāyakavākyaṃ sakhāyam prati, nāyakam prati mitravākyam*, fol. 9*b*; *nāyikāvākyaṃ nāyakam prati, nāyikāvākyaṃ sapatnīḥ prati*, fol. 10; *nāyaka-videśagamanasamaye nāyikāyā avasthā*, fol. 10*b*; *dampatyoḥ parasparam pattralekhanam, virahiṇyavasthā*, fol. 11; °इति° शृंगारवर्णनं, fol. 13 (up to here, 157 vv.).

Apahnuti, ib.; *vāyuvarṇanam*, fol. 13*b*; *praśnottaraṃ sūryāstasamayaḥ, ṛituvarṇanam*, fol. 14*b*; *candrodaya*, fol. 15*b*; *rājavarṇanam*, fol. 25*b* (up to here 103 *ślokas*).

Nītivarṇanam anyoktayaś ca (192 *ślokas*).

It ends (cf. final *śl.* of *Mālatīm.*):

संतः संतु निरंतरं सुकृतिनो विध्वस्तपापोदया
राजानः परिपालयंतु वसुधां धर्मे स्थिताः सर्वदा ।
काले संततवर्षिणो जलधराः संतु प्रसादात्प्रभोः
मोदंतां पुनरेव बांधवसुहृत्कोशप्रमोदाश्चिरं(!) ॥ १९२ ॥

इति श्रीशंभुदासपंडितविरचिते सारसंग्रहे नीतिवर्णनमन्योक्तयश्च समाप्ताः ॥ [?]

4022.

1649. Foll. 81; size 9¼ in. by 4¼ in.; legibly written, in Devanāgarī, by different hands, about the middle of last century; 11–13 lines in a page.

Nītimañjarī, a collection of ethical maxims, in verse, based on passages collected from, or incidents alluded to, in the *Ṛigveda-saṃhitā*; composed by *Dyā dviveda* of Ānanda, son of *Lakshmīdhara*, grandson of *Atri*, and great-grandson of *Mukunda dviveda*; with a commentary by the same author.

The first four *Ashṭakas*.

It begins:

श्रीमुकुंदद्विवेदस्य नप्त्रा ऽऽनम्यातिमोचितम् ।
सूर्यं विचार्य वेदार्थान् वक्ति द्या नीतिमंजरीम् ॥ १ ॥

द्वौ वेदौ यस्यासौ द्विवेदः श्रिया युक्तो मुकुंदः श्रीमुकुंदः स चासौ द्विवेदश्च स तथा । तस्य नप्त्रा प्रपौत्रः । द्यानामा चतुर्थे (?°थीं) नीतिमंजरीं वक्ति ब्रवीति । नपाच्छब्दो नप्तृपर्यायो यास्केन चतुर्थो व्याख्यातः । नपादित्यननंतरायाः प्रजाया नामेति (8, 5) ।

गौरव तनूस्तस्याः पयः पयस आज्यं आज्याद्गिनश्चतुर्थो यथा । एवं द्याह्वयो मुकुंदद्विवेदाच्चतुर्थो भवति । कुतः ।

श्रीमुकुंदाद्विजातो [ऽ]त्रिरचेर्लक्ष्मीधरो महान् ।
तस्य लक्ष्मीर्महादेवी द्याद्विवेदमजीजनत् ॥

इति नप्तृत्वं । किं कृत्वा । वेदार्थान् विचार्य इति ससंहितान् ऋगर्थान् अन्यान् ब्राह्मणसूत्रगतार्थान् विचार्य नीतिमंजरीं वक्ति । एवं कर्तव्यमेवं न कर्तव्यमित्यात्मको यो धर्मः सा नीतिः तस्याः मंजरी । नीतिमंजरी । इमां ज्ञात्वा धर्मे रतिरधर्मे विरतिर्भवति । ऋगर्थं च सुखेनावगच्छति । एतदर्थं वक्ति । पुनः किं कृत्वा । सूर्यं सर्वप्रेरकमानम्य । ० । कीदृशं सूर्यं अत्रिमोचितं । सूर्यः पूर्वं स्वर्भानुना असुरेण ग्रस्त आसीत् । तमन्य ऋषयो मोचयितुमशक्ताः । ततो ऽत्रिभिर्मोचितः । तथा ब्राह्मणे । स्वर्भानुर्हासुर आदित्यं तमसाविध्यत्तस्यात्रयः तमो ऽपजिघांसत इति । अस्मिन्नर्थे ऋक् । यं वै सूर्यं स्वर्भानुस्तमसा ऽविध्यदासुरः । अत्रयस्तमन्वविंदन्न ह्यन्ये ऽशक्नुवन् । ० एवं सूर्यमत्रिभिर्मोचितमिति सिद्धं ॥

मम त्वं कवषस्येव प्रसन्ना भव शारदे ।
विभयामि द्विजक्रोधाद्धोता देवव्यथेरिव(!) ॥ २ ॥

ग्रंथकृत्प्रथमश्लोकेनेष्टं सूर्यं नमस्कृत्य द्वितीयेनैकाभीष्टां सरस्वतीं ययाचे । ०

Ashṭaka I. ends (fol. 38): द्विवेदं श्रीलक्ष्मीध[र]सूनुना सत्रयज्वना द्याद्विवेदेन विरचिते नीतिमंजरीभाष्ये प्रथमाष्टके नीतिवाक्यानि समाप्तानि ॥

Ashṭaka II. begins:

सरस्वतीमहं वंदे सभाष्या नीतिमंजरी ।
द्याद्विवेदस्य चाद्यस्य मुखे(मुखे) स्थित्वा कृता मया ॥१॥
प्रथमे सेतिहासान्यो दर्शयित्वा सुभाषितान् ।
द्वितीये ऽष्टक आहाय तत्त्वविद् द्याह्वय ऋचां ॥ २ ॥

स्त्रीषु विश्वासो न कार्य इत्याह ॥

विश्वासो नैव कर्तव्यो वल्लभाया अपि स्त्रियाः ।
महिष्याः प्राप विश्वासाद्धासीपुत्रं कलिंगतः ॥ ३ ॥

Ashṭaka III. begins (fol. 52):

द्वितीये नीतिवाक्यानि ऋग्दृष्टांतान् प्रदर्श्य च ।
तृतीये ऽष्टक आहाय द्विवेदो द्याह्वयो महान् ॥ १ ॥

उत्तमाधमयोः कार्ययोरुत्तमाधमौ दूताविन्यर्थे आह ।

उत्तमे चाधमे कार्ये दूतः स्यादुत्तमोऽधमः ।
देवदत्तो बभूवाग्निर्दूतीह सरमा पणीन् ॥ २ ॥ ०

Ashṭaka IV. begins (fol. 64):

सरस्वतीमहं वंदे सभाष्या नीतिमंजरी ।
द्याद्विवेदस्य चाद्यस्य मुखे स्थित्वा कृता यथा ॥ १ ॥
आख्यानपूर्विकान्धर्मान् व्याख्याय व्याकृतिक्षमः ।
तृतीये ऽथ चतुर्थे द्या मडोडकुलजो ऽवदत् ॥ २ ॥

It ends: इति द्याद्विवेदविरचिते नीतिमंजरीभाष्ये वेदार्थप्रकाशे चतुर्थाष्टके नीतिवाक्यानि व्याख्यातानि ॥

According to a statement contained in some MSS., the author was a native of Ānanda (? in Gujarāt), and completed his work on the first day of the bright half of the month Māgha in Saṃvat 1550 = A.D. 1494. Cp. *Haraprasād*, Notices, x., p. 283; Peterson, Ulwar Cat., Extr., no. 6; also Prof. Kielhorn's account of the work, Ind. Ant., v., p. 116; and that of A. B. Keith, Journ. R. As. S., 1900, pp. 127 ff.

[H. T. COLEBROOKE.]

4023.

966 a, b. Foll. 34 & 40 resp.; size 8⅝ in. by 4 in. and 8 in. by 3¼ in. resp.; indifferent Devanāgarī writing of the middle of the 17th century; 9–15 lines in a page; different hands.

a. The third, fourth and fifth *Ashṭakas* of the same work. The third *Ashṭaka* (8 leaves) by a different hand from the two others, and with a separate paging.

b. The second, fifth, sixth and seventh *Ashṭakas*, each paged separately.

Ashṭaka II. ends (fol. 11*b*): इति श्रीमद्द्याद्विवेदिकृते नीतिमंजर्याख्ये भाष्ये प्रथमाष्टकः (द्वितीय written underneath by Colebrooke) समाप्तः ॥

Ashṭaka V. begins:

तुरीये सेतिहासान्यो दर्शयित्वा सुभाषितान् ।
महोडद्भेकुलज आहाय द्याद्विवेदिकः ॥ १ ॥

गुरुं संतोषयेदित्यर्थे आह ।

गुरुं संतोषयेद्भक्त्या विद्याविनयतत्परं ।
प्रस्तोकाय ददौ पायुः स्तुत्वा तुष्टो ऽस्त्रमंडलं ॥ २ ॥

It ends: इति श्रीमद्याह्निवेदिकृते नीतिमंजर्याख्ये भाष्ये द्वितीयाष्टकः (with पञ्चम written underneath by Colebrooke) समाप्तः ।

Ashṭaka VI. begins:

व्याख्याय पंचमे श्लोकानितिहासपुरःसरान् ।
मुकुंदकुलजो द्याह्नः षष्ठे ऽथ व्याचिकीर्षति ॥

अधर्मे मतिं न कुर्यादित्यर्थमाह ॥

तृणं वज्रायते ऽधर्मे यदा मतिर्भवेन्नृणां ।
फेनेनापि दृढं शक्रश्चिच्छेद नमुचेः शिरः ॥

Ashṭaka VII. begins:

द्याह्वयः श्रुतितत्त्वज्ञः षष्ठे ऽष्टके वृहन्मतिः ।
दर्शयित्वेतिहासान्यः सप्तमे ऽदर्शयद्यथा ॥

पैशुन्यं न कुर्यादित्याह ॥

परेषां क्लेशदं कुर्यान्न पैशुन्यं सुहृत्प्रियं ।
त्रिशिरसं जघानेंद्रः पैशुन्यान्मातुलप्रियात् ॥

[H. T. COLEBROOKE.]

4024.

876. Foll. 229; size 10½ in. by 4½ in.; fair Devanāgarī writing of the earlier part of the 17th century; eleven lines in a page.

Śārṅgadharapaddhati, a poetical anthology, by *Śārṅgadhara*, son of *Dāmodara*, grandson of *Rāghavadeva*; brother of *Lakshmīdhara* and *Kṛishṇa*, and nephew of *Gopāla* and *Devadāsa*. Complete in 163 sections.

Colophon: इति शार्ङ्गधरविरचितायां पद्धत्यां शांतरसे विदेहमुक्तिकथनकालवंचनादिपरिच्छेदः ॥

The work has been published by P. Peterson (Bombay 1888). Cf. also Aufrecht's extracts from the work in the Journal of the Germ. Or. Society, vol. XXVII., pp. 1–120; and Cat. Bodl., nos. 215, 216. [H. T. COLEBROOKE.]

4025.

2023. Foll. 147; size 9½ in. by 6 in.; fair, modern Devanāgarī writing; 15–21 lines in a page.

The same work.

Colophon: इति ॰ पद्धत्यां शांतिरसालंकारमुक्तिमोपान-कथनपरिछेदः ।

This section is preceded by the *Videhamukti-kathanam*.

[DR. JOHN TAYLOR.]

4026.

2048. Foll. 92, of which one (fol. 72) is missing; size 11½ in. by 5 in.; good Devanāgarī writing of about 1600 A.D.; nine lines in a page.

The same work. Incomplete.

The MS. breaks off abruptly in *śl.* 4 of the 63rd section (*ratnānyoktayaḥ*).

[GAIKAWAR.]

4027.

125. Foll. 473, of which are missing foll. 1–10 (supplied on four leaves by a more modern hand), 52, 61, 76, 84, 176, 181, 193, 209, 216, 249, 256, 277, 280–327, 332, 380, 388, 404, 440, 449, 456, 457, 464, 468; the last leaf having also been supplied by a more modern hand; 8vo, size 9¼ in. by 5 in.; fair Devanāgarī writing of the latter part of last century.

Śārṅgadharapaddhati; omitting the introduction, and breaking off at the end of the 160th section (*yogimahimā*).

[H. T. COLEBROOKE.]

4028.

1784. Foll. 24; folio, size 12½ in. by 7¼ in.; fair Devanāgarī writing of Saṃvat 1909 (A.D. 1852); 24 lines in a page.

Sections 40 (*sūryānyokti*) to 71 (*saṃkīrṇānyoktiparicchedu*) of the same work.

[J. R. BALLANTYNE.]

4029.

1384a. Foll. 55; size 14¾ in. by 5 in.; excellent, modern Bengālī handwriting; 7–9 lines in a page.

The same work; from the beginning to the end of the 8th verse of the 44th section (*haṃsānyoktayaḥ*).

[H. T. Colebrooke.]

4030.

1667a. Foll. 10; size 9 in. by 4 in.; clear Devanāgarī writing of about 1780 A.D.; twelve lines in a page.

A fragment of the *Śārṅgadharapaddhati*; viz. the 80th section, called *Vīracintāmaṇi*, or *Dhanurveda* (Pet.'s ed., pp. 263 seqq.), and treating of the science of war.

It begins: ईश्वरोक्ताद्धनुर्वेदाद् व्यासस्यापि सुभाषितात्।° Ś., vv. 1714–1941.

Colophon: समाप्तो ऽयं धनुर्वेदस्य परिछेदो वीरचिंतामणिर्नाम ॥ लिखापितं श्रीघनस्य(!) ममि॰ ॥ लि॰ कायस्थमाथुरमेचरिया भगवतीदास ॥

The leaves are marked धनुर्वेद.

[H. T. Colebrooke.]

4031.

2098c. Foll. 13; size 10 in. by 4 in.; legibly written, in Devanāgarī about 1700 A.D.; nine lines in a page.

The same section of the *Śārṅgadharapaddhati*.

Colophon: इति वीरचिंतामणौ धनुर्वेदपरिछेदः श्रीगौडविष्णुदाशः कविवरशदृशः तस्य पुत्रो मुरारि तस्या सुनु(!) द्विजेन कृतलिपनमिदं स्वार्थं मुदा पुस्तकं ॥ १ ॥ लिपितं देवस्वरेणैव मंत्रबाणावलीं तथा । ज्ञातव्या सर्वसिद्धीश्च भवत्येव न संशयः ॥

[Gaikawar.]

4032.

1203b. Foll. 61; size 12¼ in. by 4½ in.; careless, modern Devanāgarī writing; ten lines in a page.

Sūktiratnāvalī, an anthology, compiled by *Vaidyanātha*, of the *Tatsat* family, son of *Rāmabhaṭṭa Sūri*.

It consists of two parts, the first and larger of which follows very much the same plan as the *Śārṅgadharapaddhati*, to which it seems indeed largely indebted for its materials. The MS. is, however, extremely incorrect, so as to be of little use; especially as no authors' names are given with the verses.

It begins (somewhat corrected):

गंगोद्भासितमौलिश्चंद्रकलाकलितशेखरः सततं ।
अंगीकृतगलगरलो जयति जयंतीपतिर्जगति ॥
तत्सद्वंशकरीरेण रामचंद्रात्मजन्मना ।
तन्यते वैद्यनाथेन सूक्तिरत्नावली शुभा ॥
शाकाः(? शलाकाः) सूक्तिरत्नानां कृपाशाङ्गंभास्यया [(? वक्त्र°दाः) ।
ततः समुद्धृता(संगुज्यते) सेयं सूक्तिरत्नावली मया ॥

अथ नमस्कृतयः ॥ १ ॥ चलत्कर्णानिलोद्धूत° (Ś. 57) ॥ २ ॥ नियतिकृतनियमरहितां ह्रादैकमयीमनन्यपरतंत्रां । नवरसरुचिरां निर्मितिमावती(?) भारती कवर्जयति(?) ॥ ३ ॥ अथ शिवः ॥ वंदे देवं तलधिशरधिं देवेतावभौमं(?)° ॥ ४ ॥ वामांगीकृत° (Ś. 62) ॥ ५ ॥ पिनाकफणि° (Ś. 63) ॥ ६ ॥ °८ ॥ इति गौरी ॥ °१० ॥ इति कृष्णः ॥ ° – – – (fol. 6b) अथ विशिष्टकविप्रशंसा ॥ व्यासगिरां निर्यासं सारं विश्वस्य भारतं वंदे° (*Āryās.* 31) ॥ ६७ ॥ कवींद्रं नौमि° (Ś. 172) ॥ ६८ ॥ °८१ ॥ अथ कुकविनिंदा ॥ अप्रगल्भाः° (Ś. 191) ॥ ८२ ॥ °८५ ॥ अथ पंडितप्रशंसा ॥ अधिगत° (Ś. 197) । °

Part I. ends with the *nīti*, verses 904–993, the last of which is मित्रं स्वच्छतया° (Ś. 1554), followed by the colophon (fol. 55b): इति श्रीमद्रामभट्टसूरिवरात्मजतत्सद्वैद्यनाथगुंफितायां सूक्तिरत्नावल्यां पूर्वार्धं समाप्तम् ॥

Part II. begins: संदष्टाधरपल्लवं सचकितं° (Ś. 3668) ॥ संपदो जलतरंगविलोला° (*Subhāsh.*, ed. Pet., 3316) ॥

अतिदुर्मतौ सकलकर्मणा वर्जिते
कुटिलालये कपटपूरिते मयि ।
करुणानिधे पतितपावनं त्वया
करणीयमात्मसदृशं न मत्समं ॥
संकतो ऽपि शय[नादपि] गेहात्
ग्रामतो ऽपि नयनादपि दूरं ।
एष गच्छति हरिर्मधुपुर्यां
पामरेण विधिना किमकारि ॥
सुस्वादुयुक्तानि सुकोमलानि
पत्नीकराग्रांगुलिपीडितानि ।
किं किं ददामीति सुभाषितानि
स्मरामि राजन् गृहभोजनानि ॥
अशनावसरे कलिप्रिया
कुरुते रोगकथा रतांतरे ।
विधिना सुखवृक्षच्छेदिनी
प्रमदा नाम कुठारिका कृता ॥ ०

Seven more verses are followed by an extract (of 108 verses) from the *Mahābhārata*, viz. v. 981 seqq., where *Vidura* discourses before *Dhṛitarāshṭra* on moral conduct and future happiness; after which the (apparently incomplete) MS. ends with three verses:

कामिनीनयनकज्जलपंकादुत्थितो मदनमत्तवराहः ।
कामिमानसवनांतरचारी मूलमुत्खनति मानलतायाः ॥
वांछा सज्जनसंगमे ० (*Subh.* 2094) ॥
यं शैवाः समुपासते शिव इति ब्रह्मेति वेदांतिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैन्यशासनपराः[1] कर्मेति मीमांसकाः
सो ऽयं वो विदधातु वांछितफलं त्रैलोक्यनाथो हरिः ॥

The last verse is given as the 3rd introductory stanza of *Dāmodara's* version of the *Mahānāṭaka* (Cat. Bodl., no. 291); but not in that of *Madhusūdana*. It also occurs as v. 80 of the *Durghaṭakāvya* (cf. no. 3926), and at the end of *Bilvamaṅgala's Sumaṅgalastotra* (cf. no. 3907).

The MS. then concludes with the colophon, written by another hand. [H. T. Colebrooke.]

[1] जैन० *Aufr.*, *Durgh.*

4033.

1518 b. Foll. 23; size 11 in. by 4½ in.; large, clear Devanāgarī writing; 7 or 8 lines in a page.

Subhāshitāvalī, a collection of 222 sententious couplets, compiled by *Sumati(?)*.

This is a different work from the anthology of the same title by *Vallabhadeva*.

It begins: विद्वान् ॥

विद्वत्त्वं च नृपत्वं च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा गुणी(!) सर्वत्र पूज्यते ॥ १ ॥
[Vall. 3426, Bö. 6109.

यद्यपि भवति विरूपो वस्त्रालंकारवेषपरिहीनः ।
सज्जनसभाप्रविष्टो विभाति विद्याधिको मनुजः ॥ २ ॥
अपूर्वः शब्दकोशो ऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमाप्नोति क्षयमाप्नोति संवृतः ॥ ३ ॥
गुरुः ॥ क्रुद्धो गुरुर्वदति यानि वचांसि शिष्ये
मध्याह्नसूर्य इव तानि दहंति तस्य ।
तान्येव कालपरिणामसुखावहानि
पश्चाद्भवंति कुसुमाकरशीतलानि ॥ ४ ॥
अन्यानि शास्त्राणि विनोदमात्रं
प्राप्तेषु कालेषु न तैश्च किंचित् ।
चिकित्सितं ज्योतिषमंत्रवादं
पदे पदे प्रत्ययमावहंति ॥ ५ ॥
विद्याप्राप्तिः ॥
अलसो मंदबुद्धिश्च सुखितो व्याधिपीडितः ।
निद्रालुः कामुकश्चैव षडेते शास्त्रघातकाः॥६॥ B. 642.
वेश्यानामिव विद्यानां बहवो मुखचुंबिनः ।
हृदयग्राहिणस्तासां भवंति विरला जनाः ॥ ७ ॥
नालस्योपहतेन नान्यमनसा नाचार्यविद्वेषिणा
न भ्रूभंगकटाक्षविस्मयकरीं सीमंतिनीं ध्यायता ।
नानुद्योगवता न च प्रवसता मानं च नोत्कर्षता
लोके ख्यातिकरः सतामविकलो विद्यागुणः प्राप्यते॥८॥
मूर्खद्वारं ।
मूर्खत्वं हि सखे ममापि रुचितं यस्मिंस्तदष्टौ गुणा
निश्चिंतो बहुभोजनेप्यनुरतो रात्रौ दिवा सुप्यते ।
कार्याकार्यविचारणांधबधिरो मानापमानौ समौ
कृत्वा सर्वजनस्य मूर्ध्नि पदं मूर्खः सुखं जीवति ॥ ९ ॥
[cf. Bö. 4910.

वरं पर्वतदुर्गेषु॰ । न मूर्खजनसंसर्गः॰॥ १०॥ Bö. 5975.

उपदेशो हि मूर्खाणां॰ ॥ ११ ॥ ib. 1287.

वरं गर्भस्रावो वरं मृत्युर्नैवाभिगमनं॰
द्रविणबलयुक्तो ऽपि तनयः ॥ १२ ॥ ib. 5960.

पण्डितनिन्दा ॥

प्रस्तावे यः सभामध्ये भाषते न सुभाषितं ।
विदुषस्तस्य विद्वत्त्वं पलालफलसंनिभं ॥ १३ ॥

पापठीति सकलं[सु marg.]वाङ्मयं॰
न च बोबुधीति सः ॥ १४ ॥ ib. 4053.

किं कवेस्तेन काव्येन किं क्रोडेन(!) धनुष्मतां ।
परस्य हृदयं(!) लग्नं न घूर्णयति यच्छिरः ॥ १५ ॥
[ib. 1732.

बुभुक्षितैर्व्याकरणं॰ ।
न छंदसा केन समुद्धृतं॰ ॥ १६ ॥ ib. 4484.

वचनद्वारं ॥

हे जिह्वे॰ लोके हि मधुरं प्रियं ॥ १७ ॥ ib. 7412.

प्रियवाक्यप्रदानेन॰ ib. 4352.

हेतुयुक्तं च तथ्यं च सत्यं साधु जनप्रियं ।
या हि वक्तुं न जानाति तां जिह्वां किं न रक्षति ॥ १९ ॥

वचस्तस्य प्रयोक्तव्यं प्रयोक्ते(यत्रोक्ते) लभ्यते फलं ।
स्वादुर्भवति चात्यन्तं रागः शुक्लपटे यथा ॥ २० ॥ ib. 5905.

बुद्धिः॥ उदीरितो ऽर्थः॰ वहंति ताडिताः । ॰ ॥ २१ ॥ ib. 1236.

सन्तः॥ क्षारो वारिनिधिः कलंककलुषश्चंद्रो रविस्तीक्ष्णगुर्
जीमूतश्चपलाश्रयो ऽर्थिपटलादृश्यश्च स्वर्णाचलः ।
शून्यं व्योम सुधा[1] द्विजिह्वविधुरास्ते कामधेनुः पशुः
काष्ठं कल्पतरुर्दृषत्सुरमणिस्तात्केन साम्यं सतां ॥ २२ ॥

Here another hand has added in the margin the stanza: निंदंतु नीतिनिपुणा॰ ib. 3723.

It ends: संतोषः ॥

सर्पाः पिबंति पवनं॰॥२०॥ Bö. 6903, Vall. 318.

नानाप्रस्तावसंयुक्ता नानाशास्त्रसमुद्धृता ।
सुपूर्विका सुमतिना लिखिता भाषितावली ॥ २१ ॥

इति श्रीसुभाषितावली समाप्ता संवत् १७०७ शाके १५७२ समये पौषवदिसप्तम्यां लिखितं काश्यां विश्वनाथसमीपे सुंदरमिश्र । संधिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावं संश्रयं च षाड्गुण्यं चिंतये सदा ॥

[H. T. Colebrooke.]

[1] ? स्वधा MS.

4034.

823 a. Foll. 38; size $12\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; modern Bengālī handwriting; six lines in a page.

Padyāvalī, an anthology of 389 (387) verses in praise of *Kṛishṇa*, and of persons, places and objects connected with his life at Mathurā and Gokula; compiled (by *Rūpa Gosvāmin*) from various authors.

It is quoted in *Rūpa Gosvāmin's Bhaktirasāmṛitasindhu* (1541 A.D.), cf. p. 813*b*.

For a commentary on the work, ascribing it to *Rūpa*, see Notices, x., p. 25. Cf. also s.v. *śrī-Rūpadeva* in the subjoined list of authorities.

It begins:

पद्यावली विरचिता रसिकैर्मुकुन्द-
संबन्धबन्धुरपदा प्रमदोर्मिसिन्धुः ।
रम्या समस्ततमसां दमनी क्रमेण
संगृह्यते कृतिकदम्बककौतुकाय ॥ १ ॥

प्रारम्भमङ्गलाचरणानि(॰णं T., ॰णमाह Not.) ।

नमो नलिननेत्राय वेणुवाद्यविनोदिने ।
राधाधरसुधापानशालिने वनमालिने ॥ १[2] ॥ कस्यचित् ॥

भुक्तिप्रह्वविलोकनप्रणयिणी नीलोत्पलस्पर्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीते हितप्राप्तये ।
लावण्यैकमहा(सुधाT.)निधी रसिकतां राधा दृशोस्तन्वती
युष्माकं कुरुतां भवार्तिशमनं नेत्रे तनुर्वा हरेः ॥ २ ॥
[शारङ्गस्य ।

ये गोवर्धनमूलकर्दमवसव्यापु(॰ जु)ष्टबर्हाङ्गदा
ये वृन्दावनकुक्षिपु व्रजवधूलीलोपधानानि च ।
ये चाभ्यङ्गसुगन्धयः कुवलयापीडस्य दानाम्भसा
ते वो मङ्गलमादिशन्तु सततं कंसद्विषो बाहवः ॥ ३ ॥
[शुभाङ्कस्य ॥

सायं व्यावर्तमानाखिलसुरभिकुलाह्वानसंकेतनामा-
न्याभीरीवृन्दचेतोहठहरणकलासिद्धमन्त्राक्षराणि ।

[2] Our MS. counts from here vv. 2–6, when the mistake is rectified by that number being repeated after the next verse.

सौभाग्यं वः समन्ताद्दधतु मधुभिदः केलिगोपालमूर्तेः
सानन्दाकृष्टवृन्दावनरसिकमृगश्रेणयो वेणुनादाः ॥ ४ ॥

अथ श्रीकृष्णमहिमा ॥ [हरस्य ॥

अम्भोधिः स्थलतां स्थलं जलधितां धूलीलवः शैलतां
शैलो मृत्कणतां तृणं कुलिशतां वज्रं तृणक्षीणतां ।
वह्निः शीतलतां हिमं दहनतामायाति यस्येच्छया
लीलादुर्ललिताद्भुतव्यसनिने कृष्णाय तस्मै (तुभ्यं T.)
[नमः ॥ ५ ॥ कस्यचित् ॥

वात्सल्यादभयप्रदानसमयादार्तार्तिनिर्वापणाद्
औदार्यादघशोषणादगणितश्रेयःपदप्रापणात् ।
सेव्यः श्रीपतिरेव सर्वजगतामेते यतः साक्षिणः
प्रह्लादश्च विभीषणश्च करिराट् पाञ्चाल्यहल्या ध्रुवः॥६॥

अथ भजनमाहात्म्यं ॥ [कस्यचित् ॥

व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का
कुब्जायाः किमु नाम रूपमधिकं किं वा[1] सुदाम्नो धनं ।
को वंशो विदुरस्य यादवपतेरुग्रस्य किं पौरुषं
भक्त्या तुष्यति केवलं न तु गुणैर्भक्तिप्रियो माधवः ॥ ७ ॥
[कस्यचिद्दाक्षिणात्यस्य (दाक्षिणात्यस्य T.) ॥

अनुचितमुचितं वा कर्म को ऽयं विभागो
भगवति परमास्तां भक्तियोगो द्रढीयान् ।
किरति विषमहीन्द्रः सान्द्रपीयूषमिन्दुर्
द्वयमपि स महेशो निर्विशेषं बिभर्ति ॥ ८ ॥ विष्णुपुरी-
[श्रीपादानां ॥

यदि मधुमथन त्वदङ्घ्रिसेवां
हृदि विदधाति जहाति वा विवेकी ।
तदखिलमपि दुष्कृतं त्रिलोके
कृतमकृतं न कृतं कृतं च सर्वं ॥ ९ ॥ तेषामेव ॥

We subjoin a list of the authorities quoted —also given, with some variations, in R. Roth's Cat. of Tübingen MSS. (R.), pp. 12, 13; but here completed, and corrected after collation of the two MSS. (A = I.O.; T. = Tüb.)—with references to the verses as numbered in the present MS., the compiler's own verses being given under the signature '*Samāhartṛi*':—

Aṅgada, 225; *Aparājita*, 375; *Abhinanda*, 147; *Amaru*, 220, 226, 228, 234, 315; *Avilamba-sarasvatī*, 387; *Āgama*, 114 (T.; *keshāṃcit* A), 132; *Ānanda*, 361, (*-ācārya*) 20; *Īśvarapurī-śrīpādānām*, 62, 75, (*śrīmad-Īśvara-padapurīpādānām*) 17; *Umāpati-dhara*, 146, 374, 375, (*-vadha*) 257; *Autkalya* (*Autkala* T.), 54, 63 (A; *kasyacit* T.), 213 (T.; not assigned to any author in A), 216 (T.; not assigned in A); *Kaṅka*, 211 (T.; not assigned in A), 212 (T.; *kasyacit*, A); *Karācārya*, s. *Śrīkara*; *Karṇapūra* (A, R.; *Karṇapūrṇa* T.), 303; *Kavicandra*, 160 (*Kaviratna* T.), 163 (*Kaviratna* T.), 186; *Kaviratna*, 39, 40, 76, 77; *Kavirājamiśra*, 84, 196; *Kaviśekhara*, 119 (T.; *Bhuvana* A), cf. *Sañjaya*; *Kavi-sārvabhauma*, 130; *Kumāra*, 320; *śrī-Keśava* (*śrī-Keśavachattrin* T.), 151; *Keśavabhaṭṭa* (*-ācārya* T.), 344; *Kshemendra*, 357; *Gajapati-Purushottamadeva*, s. *Purushottamadeva*; *śrī-Garbhakavīndrāṇām*, 83; *śrī-Gopālabhaṭṭa*, 37 (T.; *samāhartuḥ* A); *śrī-Govardhanamiśrāṇām*, 251 (A; *Govindamiśrāṇām* T.), 253; *Govardhanācārya*, 187, 239, 301, 376; *Govinda* (A, T.), 87; *Govindabhaṭṭa*, 181, 302; *Govindamiśrāṇām*, 123; *Gauḍīya*, 94 (T.; *kasyacit* A); *Cakrapāṇi*, 280; *Ciraṃjīva*, 155; *Jagadānandarāya*, 269; *Jagannātha-sena*, 64 (T.; *Dhanañjayasena* A), 65 (A; *kasyacit* T.), 368; *Jayanta*, 161; *Jīvadāsa-vāhinīpati* (*-vānīpati* A; cf. *Vāhinīpati*), 287; *Tairabhukta*, 317, 340; *Tairabhuktakavi*, 304, 331, 341 (T.; not assigned in A); *Trivikrama*, 356; *Daśaratha*, 345; *Dākshiṇātya*, 7 (A; *D. kaścit* A), 49, 50 (A; om. by T.), 70, 113 (T.; *keshāṃcit* A), 298; *Dākshiṇātya-śrī-Vaishṇavasya*, 52 (A; *Dākshiṇātyasya* T.); *Dāmodara*, 300; *Divākara*, 130; *Dīpaka*, 128 (A; *Maṅgala* T.), 137; *Daityāri-paṇḍita*, 189, 250; *Dhanañjayasena*, 64 (A; *Jagannāthasena* T.), 66 (T.; *kasyacit* A); *Dhanya*, 324; *Nāthoka*, 259; *bhaṭṭa-Nārāyaṇa*, 292; *Nīla* (? *Līla* A), 377; *Pañcatantrakṛit* (कालिन्द्याः पुलिने प्रदोपमरुतो रम्याः शशाङ्कांशवः°), 378; *Purushottamadeva*, 47, 217, 218, 221, 154 (T.; *Gajapati-*

[1] तत्किं T.

Purushottamadevasya A), 159 (T.; *Jagapati-Purushottamadevasya* A); *Pushkarākhya* (A; *Pushkarāksha*, T.), 174; *śrīmat-Prabhūnām*, 230; *Bāṇa*, s. *Vāṇa*; *śrī(-śrī)-Bhagavat*, 21, 30, 31, 71, 74 (A; *kasyacit* T.), 92 (T.; not assigned in A), 93, 326, 339; *Bhavabhūti*, 327 (orig. *Bhūpati* T.), 328; *Bhavānanda*, 29 (T.; *kasyacit* A), 88; *Bhīmabhaṭṭa*, 358; *Bhuvana*, 119 (A; *Kaviśekhara* T.); *Bhūpati*, s. *Bhavabhūti*; *Maṅgalu*, 128 (T.; *Dīpaka* A); *Manohara*, 272, 273; *Mayūra*, 144; *Mādhava*, 80 (T.; *kasyacit* A); *Mādhava-cakravartin*, 285; *śrī-Mādhava Sarasvatī-śrīpādānām*, 57; *śrī-Mādhavapurī-śrīpādānām*, 78, 95; (*śrī-*)*Mādhavendrapurī-śrīpādānām*, 284, 332; *śrī-Māradākāra* (R.), s. *Śāradākāra*; *Mukundabhaṭṭācārya*, 134, 167, 274; *Moṭaka* (T.) or *Moḍhaka* (A), 347; *Yādavendrapurī-śrīpādānām*, 41, 75[2]; *Yogeśvara*, 150, 388; *śrī-Raghunātha*, 209, 334; *śrī-Raghunāthadāsa*, 129; (*śrī-*)*Raghupatyupādhyāya*, 299 (*śrī-Raghūpādhyāya* A), 81, 86, 97 (*śrī-Raghūpādhyāya* A), 124; *Rāmacandradāsa*, 295, 349, 353 (T.; not assigned in A); *śrī-Rāmānandarāya*, 12; *Rāmānuja*, 115 (T.; *kasyacit* A); *Rudra*, 214, 215 (T.; not assigned in A), 240, 311(?), 321, 329, 336, 367; *śrī-Rūpadeva* (A; *samāhartuḥ* T.), 198; *śrī-Lakshmaṇasenadeva*, 199, 203 (*Lakshmaṇasenu* A), 258; (*śrī-*)*Lakshmīdharāṇām*, 15, 28, 32, 33; *Vanamālin*, 135; *Vasudeva* (? *Sudeva* T.), 145 [**धीरा धरित्रिभवभारम-वेहि°**]; *Vāṅga*, 136 (T.; *kasyacit* A), 178, 179, 190, 223, 224; *Vāṇa* (T.; *Vāraṇa* A), 365 [**चित्राय त्वयि चिन्तिते तनुभुवा चक्रे°**]; *Vāṇīvilāsa*, 316; *Vāraṇa*, s. *Vāṇa*; *Vāsava* (thus A, R.; *Vāsara* T.), 245; *Vāhinīpati*, 318 (cf. *Jīvadāsa-V.*); *Viśvanātha*, 216; *Vishṇupurī-śrīpādānām*, 8, 9; *Vīrasarasvatī* (T.; not assigned in A), 371; *śrī-Vaishṇava*, 35, 36 (cf. *Dākshiṇātya-ś.*); *śrī-bhagavad-Vyāsapādānām*, 23, 24, 38 (*śrīmad-Vy.* A; *śrī-Vy.* T.), 51; *Śaṅkara*, 44 (T.; not assigned in A), 68, 322, 359; *Śacīpati*, 364; *Śambhu*, 363; *Śaraṇa*, 166, 232, 260, 263, 312, 313; *Śāntika*, 160; *Śāraṅga*, 3 (*Sāraṅga* A; not assigned in T.), 335; *Śārudākāra* (*Sāradākāra* A, T.; *Māradākāra* R.), 45; *Śivamauninām* (? *Śiromaulīnām*, orig. *Śiram.* or *Śivam.*, T.), 109; *Śubha*, 382; *Śubhāṅka*, 4 (*Śubhāṅkura* A), 249 (do., corr. *Śubhāṅkarasya* A), 265 [T. has another verse (148) by *Śubhāṅka* after 145: **एते लक्ष्मण जानकीविरहितं मां°**]; *Śrīkarācāryāṇām*, 85; *Śrīdharasvāmi-pādānām*, 20, 27, 42; *Śrīmat* (! A, T.), 14; *Shashṭhīdāsa*, 323, 350, 370; *Shāṇmāsika*, 338 (? *-māshika* A), 191; *Sañjaya-kaviśekhara*, 165, 168, 266, 325; *Samāhartṛi*, 37 (A; *śrī-Gopālabhaṭṭānām* T.), 59 (T.; *kasyacit* A), 60 (not assigned in A), 61, 104, 105, 117, 121, 122, 125, 126, 142, 195 (T.; *kasyacit* A), 198 (T.; *śrī-Rūpadeva* A), 205, 206, 219, 222, 227, 233, 236 (T.; not assigned in A), 261 (T.; not assigned in A), 267, 268, 276, 277, 278, 284, 288, 289, 290, 293, 305, 307–310 (311[2]–313[2] om. T.), 385; *Sarvajña*, 11, 56; *Sarvabhaṭṭa*, 108; *Sarvavidyāvinoda* (*-bhaṭṭācārya*), 102, 152, 157, 170, 171, 182, 192, 244; [*Sarvāṅka* R.; his mistake for *Sarvajña*]; *Sarvānanda*, 55, 149, 346; *Sāradākāra*, s. *Ś.*); *śrī-Sārvabhaumabhaṭṭācārya*, 72, 73, 89, 90, 98, 99, 131 (cf. *Kavi-sārvabhauma*); *Sāhnika*, s. *Sāhnoka*; *Sudeva*, s. *Vasudeva*; *Subandhu* (T.; *Suśaṅku* A), 264; *Surottamācārya*, 82; *Sūryadāsa*, 270; *Sauhnoka* (? *Sāhnoka* T.; *Sāhnika* R.), 262; *śrī-Hanumat*, 110; *Hara*, 5, 238, 381 (*Raha* or *Vaha*, A), 202; *Hari*, 333, 379; *Haridāsa*, 101; *Haribhaṭṭa*, 330, 337; *Harihara*, 184, 282. The remaining verses are ascribed to anonymous writers, either under *kasyacit*, or under *keshāṃcit*. Not assigned to any author in either MS. are: 96 (**श्रुतयः पलालकल्पाः किमिह वयं सांप्रतं चिनुमः । °**), 193 (**चित्रोत्कीर्णादपि विषधराद्भीतिभाजो रजन्यां °**), 248 (**मकरीविरचनभङ्ग्या राधाकुच-**

कलसमर्दनव्यसनी । ०), 348[2] (वियोगिनीनामपि पद्धतिं यो न योगिनो गन्तुमपि क्षमन्ते । ०).

The MS. counts 389 quoted verses; but several mistakes occur in the numeration, viz.: nos. 252, 314, 319, 354, 355 are omitted; and nos. 75, 124, 267, 311, 348, 375 are double (or two verses being given under one number), the actual number of verses thus being 390; whilst the Tübingen MS. (which is, on the whole, more correct) counts 382 verses, though here, too, five numbers are double, and one is omitted, thus making actually 386 verses.

It ends:

यदुवंशावतंसाय वृन्दावनविहारिणे ।
संसारसागरोत्तारतरणे हरये नमः ॥ ३८७ ॥ अविलस-
[सरस्वत्याः ॥
भ्राम्यद्भासुरमन्दराद्रिशिखरव्याघट्टनाद्विस्फुरत्-
केयूराः पुरुहूतकुञ्जरकरप्राग्भावसंवर्धिनः ।
दैत्येन्द्रप्रमदाकपोलविलसत्पुत्राङ्कुरच्छेदिनो
दोर्दण्डाः कलिकालकल्मषमुषः कंसद्विषः पान्तु वः ॥
[३८८ ॥ योगेश्वरस्य ॥
जयदेवबिल्वमङ्गलमुखैः कृता येऽत्र सन्ति संदर्भाः ।
तेषां पद्यानि विना समाहृतानीतराण्यत्र ॥ ३८९ ॥
लसदुज्ज्वलरससुमना गोकुलकुलपालिनीवलितः ।
मदभीप्सितमभिदद्यात्तरुणतमालकल्पपादपः (! A., T.)
[कोऽपि ॥ *
समाप्ता चेयं पद्यावली । रामनाथविदुषो श्रीहरिः ॥
कालाम्भोनिधिकालचन्द्रगणिते शाके च सिंहे रवौ
पञ्चम्यां शशिजे शुभेऽह्नि समये पक्षे सिते स्वातिपु ।
नत्वा श्रीगुरुपादपद्मयुगलं व्यालेखि पद्यावली
श्रीलश्रीयुतश्यामसुन्दरप्रभोर्गोस्वामिनः पुस्तिका ॥ १६ ॥ १६ ॥

The date (Śaka 1646, A.D. 1724) must have belonged to a former MS.

[H. T. COLEBROOKE.]

---

* Instead of this *śloka*, the Notices read:

श्रीमन्मदनगोपालचरणद्वंद्वसंनिधौ ।
पद्यावली विरचिता केनचिद् द्विजबन्धुना ॥

3. ROMANCES, POPULAR TALES AND OTHER COMPOSITIONS, IN PROSE AND VERSE.

4035.

1740 a. Foll. 155; size 9¼ in. by 4 in.; fairly good Devanāgarī writing of 1790 A.D.; ten lines in a page.

Aniruddhacarita-campū, a romance, in nine chapters (*ucchvāsa*), on the marriage of *Aniruddha* and *Ushā*; by *Devarāja*, son of *Raghupati*, and grandson of *Gaurīkānta Godāvarīpati*.

It begins:

शार्ङ्गज्याकिणरुचिरश्रियो महातम
ते ऽव्यासुर्मुरमथनस्य बाहवो वः ।
पंचानामपि सुरभूरुहाममाध्यं
चत्वारो विदधति ये जनस्य कृत्यम् ॥ १ ॥
जयंत्यजस्रं श्रुतिवामलोचना-
शिरस्सुमुक्तावलिविभ्रमावहाः ।
अनारतं नारदवल्लकीगुणैर्
उपासिताः कैटभवैरिकीर्तयः ॥ २ ॥ ०
ब्राह्मं तेजः स्वीकृताकारसंपद्
वाचो देव्याः स्वैरसंचारभूमिः ।
आसीत्तेषु (शाण्डिल्यकुले adds MS.) ज्ञानगांभीर्यसीमा
गौरीकांतो विश्वविश्रांतकीर्तिः ॥ १० ॥
गोदावरीपतिरुदारगुणौघरत्नम्
तस्मादभूद् रघुपतिः श्रुतशीलसिंधुः ।
अंकं जहज्जगति यस्य यशःशशांकम्
त्रैविक्रमं क्रमणकौतुकमातनोति ॥ ११ ॥
ततः सुतो ऽजायत देवराजः
समाश्रितः श्रीशिवलालपादान् ।
नानारसोत्तारगरीयसीयं
तेनानिरुद्धस्य कथा निबद्धा ॥ १२ ॥
विशुद्धिभूम्ना सुभगं करिष्णुर्
वहंति कीर्तीः किल केशवस्य ।
तस्यार्यगृह्यस्य कवेर्वचांसि
संतः समाकर्ण्य कृतार्थयंतु ॥ १३ ॥

अस्ति खलु जलधिनिकषोपलोल्लिखितविश्वकर्मनिर्माणनैपुणस्वर्णरेखेव शोभमानाभिनवनीरदकुहरदृश्यमानचंचला(°ल)चारुकांतिर्वसुंधराविलासिनीवालया(?°वलय or देवालय)श्यामायमाना नभोविभागभासुरहिरण्मयमरालमालानुकारिणी मुकुंदोत्संसंगिश्रीसनाभिशोभा शातकुंभमयी द्वारवती नाम नगरी।°

I. *pradyumnapariṇaya*, ends fol. 13*b*; II. *svapnadarśana*, fol. 27*b*; III. *mṛigayāvinoda*, fol. 42*b*; IV. *aniruddhaharaṇa*, fol. 65*b*; V. *śarabandha*, fol. 90*b*; VI. *nāradasaṃlāpa*, fol. 108*b*; VII. *śoṇitapuraprayāṇa*, fol. 122*b*; VIII. *govindavijaya*, fol. 146; IX. *aniruddhapariṇaya*.

It ends:

कविमौलिमणेर्जयंति वाचो
मुनिवर्यस्य पराशरप्रसूतेः ।
अनुगामितया चिराय यासां
भुवि धास्यंति मदुक्तयः प्रतिष्ठाम् ॥ १२९ ॥

°संवत् १८४७ मितिश्रावणमासे कृष्णपक्षे द्वितीयायां २ चंद्रवासरे ॥

For another MS. of this work see Rāj. Mitra, Notices, i., p. 39. [H. T. COLEBROOKE.]

4036.

290 d. Foll. 64 (the first of which is wanting); size 10 in. by 4¼ in.; fair Devanāgarī writing of 1613 A.D.; eleven lines in a page.

Ānandakanda-campū (?), or *Campūkāvya*, as it is simply called in the colophons; a composition, in eight chapters (*āśvāsa*), by *Samarapuṅgava Dīkshita*.

The former title, which does not occur in the colophons, but is assigned to the work by another hand, may have been taken from the introduction now lost in this MS.

The first complete *śloka* (11) runs as follows:

महाकविसरस्वतीमधुरकाव्यनिर्वर्तने
प्रसन्नपदलिप्सया परमुखानि नावेक्षते ।
अलंकृतिधियौ मणेरधिगमाय किं गाहते
भुवं त्रिदशधाम वा भुजगराजसीमन्तिनी ॥ ११ ॥

The work treats of legends of *Śaiva* ascetics, male and female, practising austerities, and obtaining their reward in the manifestation of the deity and the bestowal of favours upon the votaries. But, as in most *kāvyas* of this order, the accessories of laboured composition have entirely overgrown the little incident there is in it, and make it difficult to follow any development in the narrative part of it.

I., fol. 9*a*; II., fol. 15*b*; III., fol. 22*a*; IV., fol. 29*a*; V., fol. 37*b*; VI., fol. 46*a*; VII., fol. 53*a*; VIII., fol. 64 (fol. 57 misplaced after 61).

It ends:

आर्यैश्चक्रसरोवगाहनियमैरश्रांतयात्राक्रमैर्
अस्तोकद्विजसौहितीविरचनैरावश्यकैरध्वरैः ।
विद्याव्याकरणैश्च शिष्यसदसे विश्वेशमाराधयन्
काश्यामास्त कलत्रसूनुसुखिनः कल्याणवृद्धये ॥

इति श्रीसमरपुंगवदीक्षितकृतौ चंबुकाव्ये ऽष्टम आश्वासः ॥ संवत् १६७० समये अग्रहनसुदी ऐपादशीवारसनीवासरे(!) ॥

[H. T. COLEBROOKE.]

4037.

492. Foll. 269 (of which fol. 110 is double, and fol. 98 is wrongly bound between foll. 87 and 88); size 13 in. by 6 in.; excellent Bengālī handwriting of 1805 A.D.; 8–10 lines in a page.

Ānandavṛindāvana-campūkāvya, a romance in verse and prose, in 22 *stavaka*, on the early childhood and youth of *Kṛishṇa*, by *Kavi-Karṇapūra* (son of *Śivānanda Sena*). It begins:

वन्दे कृष्णपदारविन्दयुगलं यस्मिन् कुरङ्गीदृशां
वक्षोजप्रणयीकृते विलसति स्निग्धो ऽङ्गरागः स्वतः ।
काश्मीरं तलशोणिमोपरितनः कस्तूरिका नीलिमा
श्रीखण्डं नखचन्द्रकान्तिलहरीनिर्व्याजमातन्वते ॥१॥ °४॥

गुरुं नः श्रीनाथाभिधमवनिदेवान्वयविधुं
नुमो भूपारत्नं भुव इव विभोरस्य दयितं ।
यदास्यादुन्मीलन्निरवकरवृन्दावनरहः-
कथास्वादं लब्ध्वा जगति न जनः क्वापि रमते ॥५॥ °७॥

मातर्वाणितवानिशं करुणया लब्धप्रमोदा वयं° ॥ ८ ॥ ° १४ ॥
आनन्दवृन्दावननामधेयां चम्पूमिमां कृष्णचरित्रचित्रां ।
मनोविनोदये रसग्रहाणां चक्रे स्वमोदाय च कर्णपूरः ॥ १५ ॥

Cf. Notices, x., p. 76; new ser., i., p. 29.

Stavaka I. is devoted to the description of *Vṛindāvana,* and called *bhagavatsthānatattvavallīvistāra;* II.–VII. are comprised under the general appellation *bālya*(or *kaumāra-*)*līlālatāvistāra;* VIII.–XXII. called *kaiśoralīlālatāvistāra.*

It ends:

चैतन्यकृष्णकरुणोदितवाग्विभूतिस्
तन्मात्रजीवनधनस्य जनस्य पुत्रः ।
श्रीनाथपादकमलस्मृतिशुद्धबुद्धिस्
चम्पूमिमां रचितवान् कविकर्णपूरः ॥

इत्यानन्दवृन्दावने कैशोरलीलालताविस्तारे दोलोत्सवो नाम द्वाविंशः स्तवकः ॥

The MS. is in the handwriting of *Rāmahari Rudradāsa.* [H. T. COLEBROOKE.]

4038.

645. Foll. 282; Bengālī character; size and writing as in last MS.; twelve lines in a page.

Ānandavṛindāvanaṭīkā, also called *Sukhavartinī,* a commentary on the preceding work, composed by *Vṛindāvana Cakravartin*(?), whilst residing on the banks of the Rādhāsaras.

It begins:

वत्सास्वाद्य मुहुः स्वया रसनया प्राप्य सत्काव्यतां
देयं भक्तजनेषु भाविषु सुरैर्दुष्प्राप्यमेतत्त्वया ।
इत्याज्ञापयतेव येन निदधे श्रीकर्णपूरानने
बाल्ये स्वाङ्घ्रिदलामृतं गतिरसौ चैतन्यचन्द्रो ऽस्तु नः ॥
[१ ॥ ° २ ॥
नन्दोत्सवादिरासान्तां होलीदोलादिकाधिकां ।
श्रीकृष्णलीलां जग्रन्थ कर्णपूरो महाकविः ॥ ३ ॥

Cf. Notices, x., p. 78.

It ends: तन्मात्रजीवनधनस्य श्रीशिवानन्दसेनस्य ॥ इत्यानन्दवृन्दावनटीकायां सुखवर्तिन्यां द्वाविंशतिस्तवकसंगमनं ॥ °

राधासरस्तीरकुटीरवर्तिनः
प्राप्तव्यवृन्दावनचक्रवर्तिनः ।
आनन्दचम्पूविवृतिप्रवर्तिनः
सन्तो गतिर्मे सुमहानिवर्तिनः ॥

Rāmahari Rudradāsa likewise wrote this MS. in 1805 A.D. [H. T. COLEBROOKE.]

4039.

2624. Foll. 62; folio, size 12 in. by 7½ in.; modern, cursive Telugu writing, by different hands; 20–44 lines in a page.

Kākutsthavijaya-campū, the story of the exploits of *Rāma,* the descendant of *Kakutstha,* in eight cantos, in prose and verse, by *Vallīsahāya Kavi,* pupil of *Nārāyaṇācārya*(?).

It begins (with the numbers added): रघुवीरविजयं (? रघुवीरो विजयतु) ॥ श्रीदक्षिणामूर्तये नमः ॥ श्रीनारायणार्यपदपंकजयोरयमंजलिः ॥

भव्यतरदानसंपत्संपहानिकपूर्वहकापेशं ।
गलयतु स प्रत्यूहानागलदंतायलं महा[न्] किमपि ॥ १ ॥
वस्त्वस्तु तद्वटद्रुमशाखाशतमूलशिखरचरमेकं ।
निद्रागुणविद्रावणमुद्राकरमस्मदंतरे किमपि ॥ २ ॥ ° ४ ॥
तमःपटललुंटाक[र]नःपुंजसमुज्ज्वलं ।
नारायणार्यरत्नं तच्छ्रेयसे भूयसे ऽस्तु नः ॥ ५ ॥
रघुवीरगुणश्लाघारसकौतुकिनामियं ।
काकुत्स्थविजयाभिख्या कृतिरेषा वितन्यते ॥ ६ ॥ °

The sixth canto is wanting between foll. 48 and 49.

It ends:

काकुत्स्थविजयसंज्ञं काव्यं वल्लीसहायकविरचितं ।
पर्याप्तमतुलभाग्यादुल्लासेनाष्टमेन च सहैव ॥
वामभागप्रभापूरधृतशंपाशतद्युतेः ।
कालदर्पभिदः प्रीत्यै कस्यचित् (?कस्य°) स्यादियं कृतिः ॥

इति श्रीमद्गाधूलवंशपारावारपारिजातेन कवितारसधाराविस्रावणद्रोणीभवच्चरणनारायणविपश्चिद्ध(°च्च)रणसेवकल्लात्रशतानृतमेन (?°वृतेन) वल्लीसहायकविना विरचितः काकुत्स्थविजयाख्यश्चंपूप्रबंधः पर्याप्तः ॥

[MACKENZIE COLLECTION.]

4040.

408. Foll. 82; size 12½ in. by 4 in.; fairly written in the Bengālī character; seven lines in a page; modern.

Kumārabhārgavīya, the story of *Kumāra*, the god of war, told in ornate prose and verse, in twelve chapters, by *Bhānudatta*, son of *Gaṇapati*.

The introduction gives the following pedigree (son of son): *Ratneśvara* — *Sureśvara* (disciple of *Śaṅkarācārya*) author of *Śārīraka-mīmāṃsābhāshyavārttika* — *Viśvanātha* — *Ravinātha* — *Bhavanātha* — *Mahādeva* — *Gaṇapati* — *Bhānudatta*.

It begins (with the numbers supplied):

भूयादेष सतां हिताय भगवान् कोलावतारो हरिः
सिन्धोः क्लेशमपास्य यस्य दशनप्रान्ते नटन्त्या भुवः ।
ताराहारति वारिदस्तिलकति स्वर्वाहिनी माल्यति
क्रीडादर्पणति क्षपापतिरहर्देवश्च ताटंकति ॥ १ ॥

विम्बं चण्डरुचो विधाय परशुं दण्डीकृताहीश्वरं
रामे खेलति खेटकाय कनकक्षौणीधरं पश्यति ।
दीर्घश्वासघुषां(०जुषां) विशाणवपुषां विम्लानवक्त्रद्विषां
वाष्पक्षालितचक्षुषां दिविषदां सेवाञ्जलिः पातु नः ॥ २ ॥

भूतेशस्य कुमुद्वतीपतिकलां कोदण्डमासादयन्
शिञ्जां सञ्जनयन् भुजङ्गमपतिं शूलं शरं योजयन् ।
कैलासे दरहासमत्रिसुतया व्यालोलमालोकितः
पायादायतपुण्डरीकनयनो बालः कुठारायुधः ॥ ३ ॥ ०१३॥

पूर्वकवेरपि कवितां शृण्वानो मम गिरं शृणुयात् ।
द्राक्षामपि भुञ्जानो जगति जनो वागमृतं पिवति(पिपासति)
[॥ १४ ॥
शरजन्मकर्मसुकं(!) गौरीहितकारि चेष्टितं यस्य ।
भवसूनोस्तु कथां भानुसत्कविः कुरुते(!) ॥ १५ ॥

गुरुप्रकाशो जगदम्बिकाया रत्नेश्वरो रत्नमिवाविरासीत् ।
परिस्फुरन्यः क्षितिमण्डलानामन्तस्तमस्तीव्रमपाचकार ॥ १६ ॥

चञ्चद्गीतिविचित्रवीतिबहुलस्फीतिक्वणत्कङ्कणां
नृत्यन्तीं वसनाङ्गने भगवतीमालोकितुं भारतीं ।
नाभौ पद्मसमुद्भवो हृदि हरिर्नीले(?) भवानीपतिश्
चक्रे यस्य चिराय दर्शितसमुल्लासानिवासोद्भवं ॥ १७ ॥

सुरेश्वरः सुराचार्य इव तस्यात्मजोऽभवत् ।
यः पोतं वार्त्तिकं चक्रे वेदान्तक्षीरनीरधौ ॥ १८ ॥

वाल्य एवाभवद्यस्य विश्वख्यातो गुणोदयः ।
पञ्चमः कोकिलस्येव मदनस्येव सौरभं ॥ १९ ॥

पुत्रस्तस्य प्रथितचरितः श्रीत्रपावित्र्यसिन्धुर्(श्रीत०)
दुःखार्तानां सदयहृदयो विश्वनाथोऽवतीर्णः ।
वाचां देव्याः सुरतगणितं मौलिरत्नं प्रदीपो
यस्यागारे समजनि तमःक्षालितासु क्षपासु ॥ २० ॥ ०२१ ॥

अजनि दलितदोषः कृष्णभूचक्रतोषो
रविरिव [र]विनाथस्तस्य पुत्रः पवित्रः ।
विकचकमलकान्तैर्भारती लोचनांतैर्
यदुपरि परितुष्टा पुष्पवृष्टिं चकार ॥ २२ ॥ ० २३ ॥

बहुविधगुणधामा श्रीत्रसौजन्यसीमा
समजनि भवनाथो भूषणं भूतधात्र्याः ।
प्रसरति वहिरन्तः पूरयित्वा मुरारेः
स्मितचयवचनापच्छद्मना यस्य कीर्तिः ॥ २४ ॥

स्वामी त्रिभुवनवन्द्यः श्रीवत्सं लाञ्छनं कृतवान् ।
इति किं पतिव्रतासौ भवनाथलक्ष्म[तु] मेदिनी विदधे ॥२५॥

वेदद्वैदविधिर्महोन्नतिनिधिः पावित्र्यवाचां निधिस्
तस्मात् पुण्यवशादजायत महादेवो गुणस्यावधिः ।
नृत्यन्तः शशिनं विधाय तिलकं यत्कीर्तिवामभ्रुवो(!)
मुक्ता मौक्तिकघर्घरी वितनुते भावावतारश्रियं॥ २६ ॥ ०२७ ॥

पाद्यप्रौढमतिर्नये कृतरतिर्वंशे शिरोऽलंकृतिः
प्रीतौ कैरविणीपतिर्गणपतिस्तस्यात्मजोऽराजत ।
दृष्ट्वा यस्य यशोभियापसरतो यज्ञोपवीतं पथि
प्रभ्रष्टं रजनीपतेः सुरसरिद्व्याजादिवोन्मीलति ॥ २८ ॥

एकं यन्निरवद्यशीघ्रकवितासौभाग्यमालोकयन्
एकामङ्गुलिमातनोति भगवान् शङ्के सरोजासनः ।
तस्यात्रावयतस्तुषारकिरणक्रोडे कलङ्कच्छलाद्
एषा काचन काचकान्तिरुचिरच्छाया समुज्जृम्भते ॥ २९ ॥

गणनाथकृतां पुस्तीं(!) वीणां नारदनिर्मितां ।
रोमाञ्चन्ती गिरां देवी करोति करपद्मयोः ॥ ३० ॥ ०

Another stanza, after which prose.

Fol. 5: तथैकदा सतातेन यमदग्निना(ज०)ऽनन्तगुणेन चतुरेण संचारेण धरित्रीं पवित्रीकुर्वता चरणकलाभ्यां दक्षिणा दिगलञ्चक्रे ततश्च मदालससुरनगरनागरीकरकमलविकीर्यमाणसिन्दूररजो-राजीभिरिव विराजमाने वियति ककुप्कामिनीवः(०व) कणित-

कनककलसकान्तिमनुवहति भगवति विवस्वति मधुमधुरनिस्वने सारसमिथुने समुल्लसति दक्षिणमरुति चानुकूले स्वावासस्थलहेतोरुत्तमां दिशं भूषयितुं शुभप्रस्थानं कृतवान्भगवान् । अथ भगवानीसिव(!)भुजवीचिलालितगणेशमूर्तिमनवरतशर्मदां नर्मदां पुरस्कृत्य विन्ध्याटवीमिव महाकालभवनमनोहरां जयिनीमुज्जयिनीमवलोक्य गृहाराममिव नीलकण्ठमृगेक्षणानन्दितजनवृन्दं काञ्चीपुरमिव विलसत्सौधकोटीतीर्थमनोहरं द्रौपदीदृष्टिपातमिवार्जुनवर्ज्यमानं खलमिव नवाङ्कुरसमृद्धिं दधानं पोतवणिजमिव संपदं दधत् नरपतिप्राङ्गनमिव विपुलभवनाभिरामं कमलमिव स्फुटतरमधुरमन्दारभूषणं कार्त्तिकेयशुभशरीरजसौरं शक्रनगरमिव साधुकल्पतरुमकरन्दसन्दोहदुर्दिनं नरपतिपत्तनमिव कलशीतलागमशेहरं(?) युवतिकुलमिव भव्यामलकधारां दधत् हरजटाजूटमिव कपिलाभानुपक्वं अयोध्यामिव बहुशोभाम्रनविनोदशोभमानमुन्याश्रममिव °

Ch. II. begins, fol. 7*b*: अथ तस्मिन्नेव क्षेत्रे पवित्रे कियन्तस्तपस्विसार्थास्तं भगवन्तं संघटयासम्भूवुः । ततस्तैः समेतो नन्दिगणपरिवृतः पन्थानमतिवाहयासभूव सः । ततः स च तपस्विसार्थास्तपस्विनामधिपतिं कलावन्तं जमदग्निमित्यवादीत् ।°

III., fol. 15*a*: अथ क्रमेण कल्यपज्ञवेदीं गौरीकन्यास्वरूपेण(!) धरणीभूतो महोत्सवदीधितिमेनामलञ्चक्रे । °

IV., fol. 23*a*: अथ प्रादुर्भूतयौवनीमेनामवलोक्य विहस्य रहस्यवेश्मनि काचिदाजन्मसहचरी किंचिदिति बभाषे । °

V., fol. 31*b*:

शायकैर्बहुलखेददायकैस्तां प्रहृत्य सरसीरुहेक्षणां ।
मन्मथो मधुसखस्तपस्विनामन्धकारिगृहमाययौ ततः ॥
मदनो मदनो नः सतां विशिखैर्धैर्यविदारणोन्मुखैः ।
मुखुलीकृतलोचनाम्बुजं प्रजहार द्विजराजशेखरं ॥

VI., fol. 39*a*: अथ दर्शितमहोन्नतिः कुवलयालंकृतिर्महीभृदपि स्वपर्वभिरशेषैरुदञ्चितेन विरिञ्चिना सुरैः कृतकन्यकाप्रार्थनः कनककेतकीगर्भमञ्जरीमञ्जुदेहदीधितिमङ्घ्रियुगलनमस्काराय समागतां अन्तःप्रेममृदुना करतलेनामृश्य मुकुलितविलोचनयुगलस्थिरं चेतः प्रमोदयामास । °

VII., fol. 47*b*: अथ महोत्सवचरितमवलोकयितुमानन्दविकसिततारका तस्याः °

VIII., fol. 53*b*: पितुः [◡ – –] प्रमदेन गोत्रिणां मनो मनोराजशतेन(?) नाकिनां । रिपोर्व्यपोढव्यथया महोन्नतं सरोजनेत्रा समधत्त दोहदं ॥

IX., fol. 58: अथ शुभे मुहूर्ते निखिलज्ञाता पिता पदे पतन्त्या प्रतिपक्षलक्ष्म्या पतितमिव कुसु[म]कलापं रतिपतिसमुपनीतमिव चरणप्रोक्षननियमनं नखनिष्पातकिरणं दधानं किसलयसौभाग्यानां प्रतिनृपतिश्रियां करुणरसानां च गमनपथमिवोर्ध्वरेखां दधानं °

X., fol. 62*b*:

करेण कोदण्डलतां विधृत्य मातुर्नमस्कृत्य पदारविन्दं ।
इति स नाथं वसुधाधिनाथं जेतुं भवानीतनयः प्रतस्थे ॥

XI., fol. 66*b*: अत्रान्तरे कपोलमण्डलदोलायमानकुण्डलः किरीटकोटिकिरणकलापकिर्मीरितसभामण्डपस्तरुणमिहिरनिदसन्निभरचनास्ववपूतास्वरस्तुरगमारुह्य गच्छन्तमनुगच्छन् वैतानिकस्तमस्तौषीत् ।

XII., fol. 73*b*:

दिक्षु दिक्षु क्षिपन् चक्षुरम्भोरुहसहोदरं ।
पदातिसुभगश्चक्रे सुरसेनावलोकनं ॥

अथ भाङ्कारयन्तु भेरीः प्रताडयन्तु पटहान् तरलीकुर्वन्तु तुरगान्मदयन्तु मतङ्गान् चमत्कारयन्तु चापवल्लीः शीलयन्तु शरान् श्रयन्तु शक्तीः खेलयन्तु खड्गान् दीपयन्तु दहनबाणादीत्युभयोः सेनयोः समभूवन् सामन्तानां ध्वनयः । °

It ends:

पुलकाङ्कुरशोभमानमूर्तिः सुरकान्ताकुलगीयमानकीर्तिः ।
राजा। तथैव भ्रमणं नाटयति नायिका मलज्ञमयनतमुखी विवाहं निर्वर्त्य सोत्साहं यथार्हमभ्यर्च्य सर्वान्विसर्ज्य चक्रवर्ती भूत्वा तया सह राज्यं चक्रे॥

भैर०। राजानं प्रति। किं ते भूयः प्रियमुपकरोमि।

राजा। नुहयसा राणलद्वारा सा(?)।

राज्ञी। सकलमवगत्य। परिणीदा महाराएण कप्पूरमंजमिरि(°जरी) नुम्हाणं चचरवाममुद्दरमहप्पिसं(?)। योगिनं प्रति संस्कृतमाश्रित्य।

स्वामिंस्त्वच्चरणारविंदवशत[:] शृंगारमंजीवना
लब्धा पंचशरप्रिया ननु मया कर्पूरमंजर्यसौ।

तल्लाभेन च चक्रवर्तिपदवी लोके समासादिता किं किं नेह करोति हंत महतां संदर्शनं प्राणिषु॥

कप्पू॥ इति निःक्रांताः सर्वे। चतुर्थं जवनिकांतरं श्रीरस्तु॥

Edited, with a *prākritavivṛiti,* by Paṇḍit Vāmanācārya, in the 'Pandit,' vol. vii. (1872); also separately, and, with *Vāsudeva's Prakāśa,* by Paṇḍit Durgāprasāda and K. P. Paraba (*Kāvyamālā,* iv., 1887).

Cf. Aufrecht, Cat. Bodl., no. 313; Weber, Cat. Berl., nos. 1557–8; Rāj. Mitra, Notices, i., p. 46—where the author is called *Rajanīvallabha* (rather *Rajanīvallabhaśekhara,* which, however, is only the term by which the author himself explains his own name).

[H. T. Colebrooke.]

4163.

3153. Foll. 31; size $13\frac{3}{4}$ in. by $4\frac{1}{4}$ in.; fair, modern Devanāgarī writing; seven lines in a page.

Karpūramañjarī.

It ends as in the *Kāvyamālā*.

[Dr. R. Hoernle.]

4164.

699 c. Foll. 29; size $9\frac{1}{2}$ in. by 4 in.; rather careless, modern Devanāgarī writing; ten lines in a page.

Viddhaśālabhañjikā nāṭikā, a comedy, in 4 acts, by *Rājaśekhara.*

It begins: कुलगुरुखलानां केलिदीक्षा प्रदाने°

Cf. Aufrecht, Cat. Bodl., no. 284; H. H. Wilson, Hindu Theatre, ii., p. 354.

Editions of the work have been published by Jīvānanda Vidyāsāgara (Calc. 1883), and, with *Nārāyaṇa's* commentary (Calc. 1873; and, by B. R. Apte, Poona 1886).

[H. T. Colebrooke.]

4165.

602. Foll. 49; size $9\frac{3}{4}$ in. by 3 in.; indifferent Devanāgarī writing, of 1514 A.D.; ten lines in a page.

Mudrārākshasa nāṭaka, a political play, in 7 acts, by *Viśākhadatta*, or *Viśākhadeva* (as he is here called in the prologue), son of (*mahārājapadabhāk*) *Pṛithu*, and grandson of *Sāmanta Vaṭeśvaradatta.*

It begins: धन्या केयं स्थिता ते शिरसि शशिकला°

Foll. 1–12 show many corrections, executed in a rather slovenly manner.

Copyist's signature: संवत् १५७१ समये चित्रभानुनामसंवत्सर आश्विनशुद्ध अमावास्यायां १५ सोमवासरे लिखितं मुद्राराक्षसं नाम नाटकं कृष्णेन [स्व]पठनार्थं परोपकारार्थं च॥

There are several Indian editions, esp. those by Tārānātha Tarkavācaspati (Calc. 1869); Jīvānanda Vidyāsāgara (ib. 1881); K. T. Telang (Bombay 1884). It has been translated into English, by H. H. Wilson (Hindu Theatre, 1827); into French, by V. Henry (Paris 1888); into German, by L. Fritze (Leipzig 1887); into Italian, by A. Marazzi (Milano 1874).

[H. T. Colebrooke.]

4166.

1238 d. Foll. 42; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; fairly written, in Devanāgarī, about 1750 A.D., by four or five different hands; 11–14 lines in a page.

The same work. [H. T. Colebrooke.]

4167.

1148 a. Foll. 56; size 9 in. by 4 in.; fair, modern Devanāgarī writing; ten lines in a page.

The same play. [H. T. Colebrooke.]

4168.

1853. Foll. 45; size $11\frac{1}{2}$ in. by 4 in.; good, modern Devanāgarī writing (European paper); ten lines in a page.

Mudrārākshasa, by *Viśākhadatta*, son of *mahārāja* (prologue; *mahārājapadabhāj*, colophon) *Pṛithu.* [Dr. John Taylor.]

4169.

2574 e. Foll. 15; folio, size $12\frac{1}{2}$ in. by $8\frac{1}{2}$ in.; fair, small, modern Devanāgarī handwriting; about 50 lines in a page.

Mudrārākshasa, by *Viśākhadatta.*

It begins: केयं कन्या(!) स्थिता ते शिरसि शशिकला°

[Mackenzie Collection.]

4170.

827a. Foll. 109; size 12⅞ in. by 5 in.; good, clear, modern Bengālī handwriting; seven lines in a page.

Mudrādīpikā, a commentary on the *Mudrārākshasa*, by *Graheśvara*, son of *Siddheśvara*, son of *Rāmaśarman*, son (?) of *Śrīdeva*, son of *Jayāditya*, son of *Śrīvatsa*, son of *Cakrapāṇi*, of *Tīrabhukti*.

The commentator explains the text both from the dramatic-poetic point of view and as a manual of political ethics (*nīti-śāstra*).

It begins: कथ्यते तदा सोत्साहाः शिष्यादयोऽत्र झटिति प्रवर्तन्ते तेन ग्रन्थस्याविच्छेदे विच्छिन्नसंप्रदायेनोपजीवनप्रवाहो भवतीति सर्वमपि संधाय विशाखदत्तः प्रथमत एव तत्सर्वमभिदधाति स्म धन्या केयमिति। विभोर्महादेवस्य शाठ्यं शठस्य भावः वञ्चना तदनुकूलं वचनं वा वो युष्मानव्यात् त्रायतां। अत्र रक्षणे आशिर्लिङि रूपं। वञ्चनापि निष्प्रतियोगिका न भवति। किं च। महतां नीचवञ्चनेऽपि न महत्त्वं। तथा च। स्वसदृशे स्वाधिके वा सा शोभनेति भगवत्येव तत्प्रतियोगिनी दर्शयितुमर्हेति। तदर्धशारीरत्वादिति तामाह देव्या इति देव्या हृत(*r.* हृते) इत्यनेन प्रकारेण सुरसरितं गङ्गां निह्नोतुं तिरोधातुं गोप्तुं वा इच्छोरिच्छतः। यद्वा देव्या इति पञ्चमी देवीत इत्यर्थः। यद्यपि भगवान् स्वतन्त्रो निर्दोषश्च तत्त्वतः परस्त्रीविमुखो भगीरथदीर्घतपसा लोकानुग्रहकामाय च भगवतीं शिरसा बभार तथापि तत्त्वतः शुद्धस्यापि परशङ्काविषयाचारस्य तादृशाचरणेऽपि दुराचार इति परेभ्यो भेतव्यमिति शिक्षयन्निव भगवत्यामपि संकोपनं दर्शितवानित्याह केयं धन्येति वाक्यवाक्यैकदेशो यमलवः(?)। अतो भगवत्या वाक्यं प्रश्नमुत्तरं च भगवत[:।] इयं धन्या का तव शिरसि स्थिताऽस्तीत्यध्याहार्यं। इयमपूर्वनारी या भगवतः शिरसि स्थिता ईदृशं सौभाग्यं न कापि धन्या अपि नार्या दृष्टपूर्वं श्रुतपूर्वं वा। अथवा धन्यापदं सोपहासपरं अधन्येत्यर्थः। अस्या अयं दुराचारो यद्भगवतः शिरसि स्थितिः। ईदृशोऽतिक्रमो नार्या अनुचिता भर्तुरेव शिरसि स्थितिः। यद्वा भगवती परमसुभगापि स्वामिनि दुराचारत्वेन शङ्कितेऽपि कार्यमिदमनार्यमिति छलतोऽवगमयति स्म न कण्ठतः। प्रभो दोषोंवो द्वारे स्फुटीकर्तव्ये भृत्यस्यानधिकारात्। यद्वा सर्वमेव धनाधीनमिति योषिदपि धनवतीति परमेश्वरेणापि शिरसि ध्रिय इत्युपदेशः। अथवा स्त्रीस्वरूपसंपर्यायोऽयं धन्याशब्दः। धन्या योषित् प्रलोभिकेति कोषदर्शनात्। भगवतोऽपीयं संशयाना मयि निश्चितदोषा या मां पृच्छति। तादृशमुत्तरं करवाणि यदुभयत्रापि अर्थं बोधकमित्याशयेन मुग्धमपि निश्चितमेवोत्तरं कृतं। शशिकलेति। अत्र पदे अर्थद्वयं प्रतीयते। शशिनः कला शशिकलानाम्नीति काचित्। अत्र द्वितीयमर्थं पुरस्कृत्य पुनर्भगवती पृच्छति। अस्या एतदेव किंनु नाम। °

Act I. ends fol. 27*b* इति महोपाध्यायश्रीग्रहेश्वरकृतायां मुद्रादीपिकायां प्रथमोऽङ्कः॥ II., fol. 41*a*; III., fol. 59*b*; IV., fol. 70*b*; V., fol. 87*a*; VI. fol. 99*a*.

It ends:

अशुद्धं शुद्धं वा वचनरचनं हाटकसमं
  द्वयाः क्षेपं वह्नौ बुधजनमये युक्त इह हि।
अयं शुद्धं कान्तं परमधिकमन्यत्तु भजते
  स्वदोषत्यागेन प्रकटनमलंकारविधिषु॥

साधूनामप्यसाधोरुचितपदविधौ दक्षतामादधाने(°नो)
  नीत्या देव्या भवच्याः(°त्या) परिगतहृदयः सर्वकर्मिकदृष्ट्या।
कारुण्याद्दृष्टचेता निजहितपरताहानिताप्युज्झितश्रीः(!)
  श्रीमान्देवो महेशः प्रभवतु कृतिनामष्टसिद्धीश्वराय॥

देशे श्रीतीरभुक्तौ स [सु]विमलमतिश्चक्रपाणिर्गुणाढ्यः
  श्रीवत्सस्तत्सुतोऽभून्नयविनयमयस्तत्र(°न्त्र)विद्यः कवीन्द्रः।
तत्पुत्रः ख्यातकीर्तिः कविवरगणितः श्रीजयादित्यधीरः
  श्रीदेवस्तत्सुतोऽभून्नदुचित[त]नयः पण्डितो रामशर्मा॥

सिद्धेश्वरस्तत्तनयोऽप्यतोऽभूद् द्विजेन्द्रवर्गे गणितप्रतिष्ठः।
तत्सूनुरानम्रशिरा गुरुभ्यो ग्रहेश्वरः सन्नयमार्गसेवी॥
तेनेयं रचितोच्चैर्यत्नान्मुद्राख्यनाटके टीका।

इति महोपाध्यायश्रीग्रहेश्वररचितायां सप्तमोऽङ्कः॥ ख्यातः पृथ्व्यां पृथुतरयशा दुर्लभो नाम विप्रः॥

Whilst various readings are mentioned pretty frequently, no other commentator has been found referred to, the only authorities quoted (besides a *Purāṇa* and several *Koshas*) being *Nayalocana* [सन्ध्यादयो गुणा उपायाश्च भेदादयः। अथवा। मन्त्रसंगोपनं दानं चरस्य परिपूरणं। सन्यामसुद्धनं(!) राज्ञामुपायः परिकीर्तितः॥] fol. 9*b*, and *Nāṭakadarpaṇa* [कञ्चुकीति। अन्तःपुरचरो वृद्धो विप्रो गुणगणान्वितः। धर्मवित कार्यकुशलः कञ्चुकीत्यभिधीयते॥]

[H. T. Colebrooke.]

4171.

1835. Foll. 43; size $12\frac{1}{2}$ in. by 5 in.; clear Devanāgarī writing, on European paper (watermark 1809); eleven lines in a page.

Veṇīsaṃhāra, a drama, in six acts, by *Bhaṭṭa Nārāyaṇa*, surnamed *Mṛigarājalakshman* (and *Nirvāṇa-Nārāyaṇa*).

This is the MS. A on which J. Grill's edition (Leipzig 1871) is chiefly based. The work has also been repeatedly printed in India (cf. Grill, introd., p. xxvii.), especially by Tārānātha Tarkavācaspati (3rd ed. 1886), N. B. Godabole (Poona 1895), and K. P. Paraba (Bombay 1898). It has also been translated into English, by S. M. Tagore (Calc. 1880).

[Dr. John Taylor.]

4172.

1316 a. Foll. 44; size $12\frac{1}{2}$ in. by $4\frac{3}{4}$ in.; modern Devanāgarī writing; ten lines in a page.

Veṇīsaṃhāra.

A very incorrect MS. (old no. 1290) collated by Lenz, whose notes were made use of by Grill for his edition (cf. his introd., p. xxviii., MS. L).

Colophon: मृगराजलक्ष्मनारायणभट्टविरचितं वेणीसंहारं नाम नाटकं समाप्तं ॥

[H. T. Colebrooke.]

4173.

1503 b. Foll. 30; size $11\frac{3}{4}$ in. by 4 in.; legibly written, in Devanāgarī, in the latter part of the 18th century; thirteen lines in a page.

Veṇīsaṃhāra-ṭīkā, by *Jagaddhara*, son of *Ratnadhara* and *Damayantikā*.

It begins:

कंठस्थाहिमणीविभूषिततनूराजज्जटापल्लवो
हृष्यन्मौलिसुधाकरैककुसुमस्तत्पंचशाखश्रयः ।
स्यासार्मे(? स्याणोर्मे) फलदस्तु नित्यमधिकं गौरीमुखेंदुद्रवत्-
पीयूषद्रवपानदोहदवशात् कल्पद्रुमत्वं वहन् ॥ १ ॥
गुरूपदेशमासाद्य विभाव्य निपुणं हृदा ।
श्रीजगद्धरधीरेण टिप्पणी क्रियते शुभा ॥ २ ॥

इह तावन्निर्विघ्नं प्रारिप्सितसिद्धिमनुबुध्य कविः स्वेष्टदेवताकीर्तनरूपमंगलं नांदीमुखेनाह निषिद्धैरिति°

It ends:

यदि भवति मदीयग्रंथमध्ये प्रसादः (प्रमादः)
क्वचिदपि समहिस्ता(? मम हस्तः) शोधनीयो महद्भिः ।
स्खलति गमनकारी प्रायशो नात्र चित्रं
भवति च गुरुहस्तालंबनोऽपि प्रकारः ॥
असूत यं रत्नधरो गुणीशो नानागुणाढ्या दमयंतिकापि ।
जगद्धरं तस्य कृतौ व्यरंसीत् षष्ठो ऽयमंको वरटिप्पने ऽत्र ॥

इति महामहोपाध्यायधर्माधिकारिश्रीजगद्धरकृतौ वेणीसंहारटीकायां षष्ठोंकः समाप्तः ॥

For other MSS. of this commentary see Weber, Cat. Berl., no. 554; Aufrecht, Cat. Bodl., no. 309. Cf. also Grill, *Veṇīsaṃhāra*, introd., p. xxxvi.

[H. T. Colebrooke.]

4174.

1605 a. Foll. 27; size $9\frac{1}{2}$ in. by 4 in.; fair, modern Devanāgarī writing; nine lines in a page.

Ushārāgodayā nāṭikā, a drama, in 4 acts, by *Rudracandra Deva*, or *Rudradeva*; founded on the love-story of *Ushā*, daughter of the *daitya Bāṇa*, and *Aniruddha*, grandson of *Kṛishṇa*, as related in *Harivaṃśa*, adhy. 176 seqq. Rather incorrect.

It begins:

प्रणयकलहकोपात्पाटलिम्नि प्रजाते
मुखशशिनि परार्धे पांडुरत्वे च सद्यः ।
प्रकटितनिजदेहद्वंद्वसीमाविभेदं
वपुरथ शिवयोस्तद्भूतये तावदास्तां (शश्वदास्तां R.M.) ॥

नांद्यंते सूत्रधारः। अलमतिप्रसुतेन(०मृतेन)। नेपथ्याभिमुखमवलोक्य। आर्ये इतस्तावत् ॥

उपसृत्य नटी। इयम्हि आणवेदु अज्जउत्तो॥

सूत्रधारः। आर्ये उषारागोदया नाम नाटिका नाटयितव्यास्ति। तत्त्वरस्व नेपथ्यग्रहणाय यावदेषो ऽहमपि दत्तावधाना अपि सामाजिका इत्यर्थये ॥

नटी। जं अज्जउत्तो आणवेदित्ति निष्क्रान्ता॥

सूत्रधारः। सर्वतो ऽवलोक्य। भगवद्गुणानुरागादतिनवबंधप्रसंगाच्च परिभावयंत्ववहिताः कृतिमेतां रुद्रदेवस्य।०

Cf. Rāj. Mitra, Notices, i., p. 64; iii., p. 192 (with analysis).

It ends: नारदः॥ परस्पररामप्राप्तिया(०प्त्या) च किमतः परमर्थनीयं। तथापीदमस्तु भरतवाचा।

पृथ्वी समस्तरसशस्यवती सदास्तु
यंतु क्षयं रिपुगणाः किल सज्जनानां।
लक्ष्मीविलासमतुलं लभता हि(०तां हि or ०ताद्धि) लोकः
काव्यप्रबंधरचनाचतुरो जनो ऽस्तु ॥

इति निष्क्रान्ताः सर्वे॥ चतुर्थोऽङ्कः॥ इति श्रीप्रतापनारायणश्रीरुद्रचंद्रदेवविरचिता उषारागोदयनामनाटिका समाप्ता॥०

In the other two MSS. above referred to the author is styled श्रीकूर्मगिरिवरेश्वरश्रीमत्प्रतापचारितारितमोभास्करश्रीमद्रुद्रचन्द्रदेवः ॥

[H. T. COLEBROOKE.]

4175.

1627 c. Foll. 39; size 8¾ in. by 3¾ in.; legibly written, in Devanāgarī, in 1800 A.D.; 10–12 lines in a page.

Kaṃsavadha, a play, in seven acts—on the destruction of *Kaṃsa,* king of Mathurā—composed, by *Śesha Kṛishṇa,* son of *Nṛisiṃha,* at the instance of *Giridhārin,* surnamed *Govardhanadhārin,* son of (*Akbar's* minister) *Rājan Ṭoḍaramalla.* [A.]

It begins:

प्रारंभः शुभकर्मणस्त्रिभुवनक्लेशाभिचारागमः
कान्ताकर्षणकर्मकार्मणविधिः कामाद्वितीयश्रुतिः।
हुंकारो मदनस्य निर्वृतिवधूमंजीरसिंजाध्वनिः
श्रेयःसंपदमातनोतु भवतः कंसारिवंशीरवः ॥१॥०

सूत्रधारः॥ आर्ये अयमेव तावदखिलब्रह्माण्डमंडपमहानटः (०मंडपउपमहानटः B)। सृष्टिस्थितिप्रलयनाटिकासूत्रधारः। सूत्रात्मा विश्वसाक्षी भगवानिंदुशेखरः। तत्पादपद्मपरिचर्यापर्याप्तप्राज्यसाम्राज्यधुरंधरो गोवर्धनधारिराजश्च ॥

नटी॥ को उण एसो गोवद्धणधारीति भणिअदि ॥

सूत्रधारः॥ तदाकर्ण्यतां।०

तस्यास्ति टंडनकुलामलमंडनस्य
श्रीतोडर(A B)क्षितिपतेस्तनयो नयज्ञः।
नानाकलाकुलगृहं स विदग्धगोष्ठीम्
एको ऽधितिष्ठति गुरुर्गिरिधारिनामा ॥१३॥

तेन चाहं सबहुमानमाहूय समाज्ञेनादिष्टो ऽस्मि।०

पृथ्वीमंडलमौलिमंडनमणिः श्रीमन्नृसिंहात्मजः
कृत्वा कृष्णकविः कुतूहलवशादस्मासु यद्यर्पितपत्।
नाट्यं कंसवधाभिधानमधुना तस्य प्रयोगोद्यमं
विद्वद्राजसमाजमानसमहानंदाय विदामहे ॥१९॥०

It ends: अपि च। साहित्यामृत० कृष्णानुगाः॥ इति निष्क्रांताः सर्वे॥ सप्तमोंकः॥

आनंदाभिधवत्सराक्षिनयनाष्टाब्जैः शके संमिते १७२२
वैशाखाभिधमासि शंकरतिथौ धारासुते वासरे।
नाट्यं कंसवधं समाप्तिमगमत्कृष्णादिदं पंडितैस्
तैलाभःशिथिलप्रबंधनभयाद्रक्ष्यं महायत्नतः॥

[H. T. COLEBROOKE.]

4176.

1859. Foll. 45; size 11⅞ in. by 5½ in.; fair, modern Devanāgarī writing; eleven lines in a page.

Kaṃsavadha, by *Kṛishṇa Paṇḍita.* [B.]

The first few leaves contain marginal glosses such as the following one on the opening *śloka*: सिंजत्येव सिद्धे ध्वनिपदमर्थांतरे संक्रामितवाच्यं मंजुलातिशयं गमयति। ध्वन अव्यक्ते शब्द इति धातोः। निरतिशयानंदः॥

The Saṃskṛit *chāyā* (not given in MS. A) is here given immediately after each of the (comparatively rare) *Prākṛit* passages.

[DR. JOHN TAYLOR.]

4177.

141b. Foll. 71; size 14 in. by 4½ in.; good, modern Bengālī handwriting; eight lines in a page.

Vidagdhamādhava nāṭaka, a play, in seven acts, illustrative of *Kṛishṇa's* life and amours in *Vṛindāvana*; ascribed to *Rūpagosvāmin*.

The author's name, however, is not mentioned either in this or in the next MS.

It begins: सुधानां चान्द्रीणामपि मधुरिमोन्माददमनो° Cf. Aufrecht, Cat. Bodl., no. 305; H. H. Wilson, Hindu Theatre, ii., p. 393; Rāj. Mitra, Notices, iv., p. 172 (where the work is ascribed to 'one of the followers of *Caitanya* of Nuddea.'

The work has been published (under *Rūpa's* name), with a commentary (including the Saṃskṛit version of *Prākṛit* passages) and a Bengālī translation, by Rāmanārāyana Vidyāratna, Mūrshidabad (Bahrampur) 1880.

The MS. ends: कृष्णः। स्मित्वा। भगवति तथास्तु। तदेहि गोदोहावसरे मामपेक्ष्य चिन्तयिष्यन्तौ पितरावविलम्बं गोकुलं प्रविश्य नन्दयाम इति निष्क्रान्तः॥ इति निष्क्रान्ताः सर्वे॥

इति गौरीतीर्थविहारो नाम सप्तमोऽङ्कः॥ समाप्तमिदं विदग्धमाधवं नाम नाटकं॥ [H. T. COLEBROOKE.]

4178.

2353d. Foll. 78 (of which are wanting foll. 2–6, 73); size 10¼ in. by 4⅜ in.; fairly written, in Devanāgarī, by two or three different hands, about 1650 A.D.; eleven, sometimes ten, lines—the first leaf, apparently somewhat older than the rest, eight lines—in a page.

Vidagdhamādhava.

The last two leaves have somewhat suffered from insects.

Fol. 1*a* has the note: व्यासहरिरामते विभागे। [GAIKAWAR.]

4179.

141a. Foll. 81; size 14 in. by 4½ in.; fairly good Bengālī writing of 1807 A.D.; eight lines in a page.

Lalitamādhava, another play, in ten acts, on the same subject, likewise ascribed to *Rūpagosvāmin*, but without his name being mentioned in this MS.

Cf. H. H. Wilson, As. Res., xvi., 120 (Sel. Works, i., p. 167).

It begins:

सुररिपुसुदृशामुरोजकोकान् मुखकमलानि च खेदयन्नखण्डः।
चिरमखिलसुहृच्चकोरनन्दी दिशतु मुकुन्दयशःशशी मुदं वः॥
अपि च।

अष्टौ प्रोक्ष्य दिगङ्गनाघनरसैः पत्राङ्कुराणां श्रिया
कुर्वन्मञ्जुलताभरस्य च सदारामावलीमण्डनं।
यः पीने हृदि भानुजामतुलभां चन्द्राकृतिं चोज्ज्वलां
रुन्धानः क्रमते तमत्र मुदिरं कृष्णं नमस्कुर्महे॥

नान्द्यन्ते सूत्रधारः। अलमतिविस्तरेण। समन्तादवलोक्य। हन्त भोः सन्ततवृन्दाटवीनिकुञ्जवेदिकानिवासदीक्षारसज्ञस्य स्फुरदुद्दण्डपुण्डरीकमण्डलीमण्डितब्रह्मकुण्डतीरोपान्तस्थलीमहाभौमिकस्य भगवतो गोपीश्वरतया प्रसिद्धस्य चन्द्रार्धमौलेः स्वप्नाविर्भूतमादेशमासाद्य दीपावलीकौतुकारम्भे गोवर्धनाराधनाय श्रीराधाकुण्डरोधसि माधवमन्दिरस्य पुरतः संगतानि वैष्णववृन्दानि स्वप्रबन्धेन ललितमाधवनाम्ना नाटकेनाहमुपस्थातुं पर्युत्सुको ऽस्मि॥ तदभीष्टदैवतमभ्यर्थयिष्ये। °

Act I., *sāyamutsava* (fol. 10*b*); II., *śaṅkhacūḍavadha* (fol. 18*a*); III., *unmattarādhika* (fol. 25*b*); IV., *rādhābhisāra* (fol. 33*b*); V., *candrāvalīlābha* (fol. 41*a*); VI., *lalitopalabdhi* (fol. 49*b*); VII., *navavṛindāvanasaṃgama* (fol. 56*b*); VIII., *navavṛindāvanavihāra* (fol. 63*a*); IX., *citradarśana* (fol. 71*a*); X., *pūrṇamanoratha* (fol. 81*a*).

It ends: इति निष्क्रान्ताः सर्वे॥ पूर्णमनोरथो नाम दशमो ऽङ्कः॥

नाटके समुचितामधीश्वरः स्वैरमप्रकटयन्नुदात्ततां।
अत्र मन्मथमनोहरो हरिर्लीलया ललितभावमाययौ॥

समाप्तमिदं ललितमाधवाख्यं नाटकमिति ॥

पूर्णां कलाचतुःषष्ट्या लक्षणैर्भूषणैरपि ।
भजन्तु श्रुतगान्धर्वं(orig. श्रित°) धीरा ललितमाधवं ॥

The text of this play was published by the samo editor, with notes and a Bongālī translation, at Murshidābād, in 1880.

[H. T. Colebrooke.]

4180.

1668b. Foll. 32; size 9¼ in. by 4¼ in.; fair, modern Devanāgarī writing; ten lines in a page.

Kumāravijaya, a drama, in 5 acts, on mythological events leading up to the victory of *Kumāra* over the *daitya Tāraka*; composed by a Marāṭha poet whose full name seems to be *Cauṇḍājī Pant Ghanaśyāma,* son of *Mahādeva* and *Kāśī,* grandson of *Cauṇḍājī Bālājī,* brother of *Īśa* and *Śākambharī.*

It begins:

नद्या हरन्हरकपर्दजुषोऽंबुजानि
हृद्यानि मातरि सह प्रमथैर्हसंत्यां ।
हृद्याचकास्तु शिशुकेलिधरः स कोऽपि
विद्यावलीकुतुकनाटकसूत्रधारः ॥ १ ॥

किं च । मूको यत्कृपया पयोजलनिधिस्थूलोर्मिगर्वोन्नतों[1]
सर्वस्वासहनामुपैति सरसां सर्वंकषां साहिनीं ।
अप्यंभोजभवो यया जयति सा देवी विधत्तां मदा
भूमीमंडनपंडितेंद्ररसनारंगस्थले तांडवं ॥ २ ॥

अपि च । नीलारक्तशिरोरुहं शशधरस्रोतस्विनीशेखरं
ताटंकोरगराजकुंडलधरं कालाष्टकुंडाकृति ।
लीलाकंकणशंखचूडवलयव्यालीढहस्तांबुजं
कौशेयद्विपचर्मधारि किमपि द्वंद्वं हृदि स्पंदतां ॥ ३ ॥

नांद्यंते सूत्रधारः। नेपथ्याभिमुखमवलोक्य। मारिषेतस्तावत् ॥
प्रविश्य पारिपार्श्वकः। भाव स अम्हि (इअम्हि) ॥
सू°। मारिष परिषदा सादरमाहूय नियुक्तोऽस्मि ॥
पा°। कह विअ ॥
सू°। सभाजनसभाजनसमुचितं किमपि रूपकं निरूप्यतामिति ॥
पा°। अ॰थि तारिसं किं वि ॥
सू°। अस्ति नाम कुमारविजयाभिधानं नाटकं ॥
पा°। को णु त॰स कई ॥
सू°। श्रूयतां समसनतो निवेदयामि ।

यस्येशोऽग्रभवः पिता किल महादेवः स काशीप्रसूः
साधुः श्रेयसि सुंदरी प्रियतमा शाकंभरी च स्वसा ।
सम्राडोक्तिलिपिप्रभुर्गुणनिधिश्चौंडाजिबालाजिसत्-
पौत्रोऽयं विभुरष्टविंशतिमितश्चौंडाजिपंतः कविः ॥ ४ ॥

सू°। मारिष वावदूकोऽप्यहं नालमेव तस्य गुणगणं वर्णयितुं
तथापि किंचिदेव वर्णयामि। श्रूयतां ॥
पा°। अवहिदो म्हि ॥
सू°। स्वच्छंदप्रवहत्सु धारसफरीकल्लोलहल्लोहला-
हंकारोत्करहुंक्रियाकरमहावाग्गुंफकूलंकषः ।
द्वैतध्वांतदिवाकरः किल महाराष्ट्रैकचूडामणिः
संतोषाय कुतूहलाय च घनश्यामो विजेजीयते ॥ ५ ॥

ससंभ्रममाकाशे। आर्याः किं ब्रूथ। सम्यगाह भवान् विजेजीयत इति । यदेष एव प्राकृते च निरर्गलं प्रगल्भते । अन्ये तु कवयः प्रकृतश्लोकरचनस्थले ।

प्रायः संस्कृतमाश्रित्यैवसुक्ता धन्या भवंत्यहो ॥ ७(!) ॥

इति विचिंत्य । आर्या राजशेखरश्च प्रगल्भते । पुनः किं ब्रूथ। स खलु संस्कृतप्राकृतमात्रकविरयं तु सर्वभाषाकविरिति। सशिरःकंपं । आर्यपादा एव तरतमभावपरीक्षणविचक्षणाः । मारिषं प्रति । उक्तं च तेन कविना प्रबंधप्रारंभसमये ।

यत्तत्त्वविधौ पुराणकवयः शक्ता न नित्या गिरो
यं ब्रह्म प्रथयंति शंकरपदं देवो य एवार्हति ।
यन्नामाप्यमृतार्पणैकरसिकं तं नाटकैकावली-
मध्ये नायकयाम्यहं तदिह को धन्यो मदन्यो जनः ॥ ८(!) ॥

सू°। सखेदं चिंतां नाटयित्वा सानंदं। अलमिह महता विचारेण ।

क्रमेण परिणेष्यामि पुत्रिकां मित्रवर्मणः ।
गिरीशां सार्वभौमस्य कन्यकामिव शंकरः ॥ ७(!) ॥

नेप°। हा देवि कथं त्रैलोक्यजनन्यास्तवापि तादृशी दशा संवृत्ता ॥
सू°। आकर्ण्य । कष्टं भोः कष्टं पितुरवज्ञया चितानाग्नौ पतितां सतीदेवीं विज्ञाय दूयमानमानसस्य भृंगिरिटेर्भूमिकामादाय मम भ्राता कनीयानित एवाभिवर्तते तदनंतरकरणीयाय गच्छावः ॥ इति निष्क्रांतौ ॥
प्रस्तावना ॥

[1] Read °गर्वोन्नतिं

ततः प्रविशति भृंगिरिटिः ॥ हा देवीत्यादि पुर्वोक्तं पठन् पुरतो ऽवलोक्य । अये माणिभद्रः समायाति ॥

ततः प्रविशति माणिभद्रः ।

मा०। उपसृत्य । सखे किं खिद्यमान इव दृश्यसे ॥

भृंगि०। किं न विदितं देवीगतं वृत्तं ॥

माणि०। सभयं। सखे कथय२ किं तत् ॥

भृंगि०। निःश्वस्य नखाग्रैर्बाष्पकणान्विकिरन् । हंत निवेदयामि मंदभाग्यः । श्रूयतां ॥

मा०। अवहितोऽस्मि ॥

भृंगि०। दक्षप्रजापतिना महासत्रमारब्धं द्रष्टुं व्रजामीति देवी ननाथ नाथं ॥

मा०। हुं ततः२ ॥

भृं०। ततो न मामाहूतवानाहूतसकलदेवतोऽपि ते पिता तन्मा गाः परिभावयितुमात्मानमिति बहुधाभिदधौ देवः ॥

मा०। ततः२ ॥

भृं०। तत्क्षणं पितृसुखमजानतो भवतो ननु सदृशं खलु गमननिषेधनमिति विपीदंतीं गच्छ गच्छेति रुषाभाषत ॥

मा०। अहो द्व्याः पितरि गरीयसी भक्तिः । ततः२ ॥

भृं०। ततश्च तत्र गत एव मखपदे किमाहूतेव सत्वरमागतासीति पित्रा विप्रकृता नाथवाक्यं च विचिंतयंती देवी सशोकं तस्मिन्नेव कुंडे ।

मा०। अलमलमतः परमभिधानेन । देवेन विदित्वा किं कृतं ॥

भृं०। शोकांधेन देवेन कपर्दमधः संताड्य निर्मितो वीरभद्रो मखपदं च प्रेषितः ॥

मा०। सभयं। यद्वीरभद्र एव गतस्तत्प्रलयकाल एव समुपस्थित इति मन्ये । सखे क्व नु खलु प्रस्थितो ऽसि ॥

भृं०। शोकभारलघूकरणाय देवसंनिधिं परिहृत्य त्वामेव विचेतुमागतः ॥

मा०। विलोक्य। अये देव इत एवाभिवर्तते । य एषः

शैलादिकंठविनिवेशितवामबाहुण्
चंडीशपाणिनिहितेतरबाहुदंडः ।
बाणेन वेत्रकलितेन निवेदिताध्वा
संलक्ष्यते प्रतिकलं दयनीयवेषः ॥ ८ ॥

तदेहि विविक्तस्थलं गच्छावः । इति निष्क्रांतौ ॥

शुद्धविष्कंभः ॥ ततः प्रविशति यथानिर्दिष्टः परमेश्वरः ।

पर०। सविमर्शं।

मा गच्छेति पुरा मया निगदिते रोषाकुलाभूत्प्रिया
निर्याहीति समीरिते प्रणयतः साकूतमालोकयत् ।
आस्तामेतदिदं विचित्रमपटुः कर्तुं क्षितौ या पदं
बाला सैव सखीश्च वाहनमनाकांक्ष्याशु यन्निर्ययौ ॥९॥

क्षणं स्थित्वा ।

धिगिंद्रं धिग्विष्णुं धिगपि धनदं धिक् शतधृतिं
पतंत्यां यत्तस्यां शिखिनि भृशमौदास्यमभजन् ।
तदास्तां मद्रूपस्त्रिपुरदहनैर्वर्धितबलो
मयासौ सप्तार्चिः कथमिव सतीं तां निरदहत् ॥१०॥०

In consequence of *Śiva's* resentment and withdrawal from active interest in celestial affairs, caused by the loss of his beloved wife, the power of the *Daityas* increases and threatens to overwhelm the rule of the gods, when an oracle uttered by *Bṛihaspati* holds out hopes of the final victory of the gods in the event of a girl being born to *Himavat* from *Menā*. A daughter, *Gaurī*, accordingly makes her appearance in heaven, and attracts *Parameśvara's* attention. Mutual love leads to matrimonial alliance, from which *Kumāra* springs, who, in consequence of his heroic achievements, is eventually proclaimed leader of the heavenly armies.

It ends: देवः। सोल्लासं। देवि किमतः परमपि प्रियमस्ति। तथापीदमस्तु भरतवाक्यं।

आपद्मासनमापतंगमखिलाः सत्त्वा लभंतां सुखं
विद्वांसो ऽपि भवंतु सत्कविगिरां गुंफे गुणग्राहिणः ।
बाडव्यं भुवि जायतामपि सदा षट्कर्मनिष्ठारतं
साधूनामधिमानसारणिपरं ज्योतिः परिस्पंदतां ॥ १५ ॥

इति निष्क्रांताः सर्वे ॥ पंचमोंकः ॥ संपूर्णमिदं कुमारविजयाभिधानं नाटकं ॥

[H. T. Colebrooke.]

4181.

584 d. Foll. 14; size $10\frac{3}{4}$ in. by $4\frac{1}{2}$ in.; excellent Devanāgarī writing of about 1500 A.D.; nine lines in a page.

Bhojasaccarita, or *Bhojarājasaccarita*, an encomiastic play, in two acts, composed, entirely in Sanskrit, by *Vedāntavāgīśa Bhaṭṭācārya*, pupil of *Nārāyaṇa munīndra* of Benares.

Bhojarāja, in praise of whose virtues the work was composed, is described as the ruler of Vṛindāvatī, a locality including Vārāṇasī (fol. 9*a*), Haridvāra or Muktidvāra, the former abode of *Vedaghosha ṛishi* (fol. 11*a*,*b*), and Mathurā (fol. 12*b*). He was the son of *Sūrijana* (also called *Sūrajana, Surajana*), who reigned before him, and his first wife *Kamalā*; and his claim to distinction rests on his piety as a *Vaishṇava*, and various other virtues, which are declaimed by two sets of interlocutors in each act.

It begins :

श्रीमच्चक्रधरः सतां सुरतरुर्जीयादयं सर्वदा
सौभाग्यावधि भूमिदेवतिलको गोपालव्यासात्मभूः ।
संख्यावत्प्रथितो [ऽ]सतां मदहरः संतापहारी नृणां
श्रीमद्भोजमहीपतेरुदयदो धर्मो वपुष्मानिव ॥ १ ॥
यद्व्याख्याममलं जनस्य सुखदं पीयूषमास्ते प्रियं
यद्भाले रुचिरा शुभाक्षरततिर्धात्रा विचित्रा कृता ।
यत्पाणौ कमले द्विजार्पणजलैरार्द्रे सति श्रीमति
याच्याकृद्भ्रमरावली मदवती सोऽयं कृती चक्रभृत् ॥ २ ॥

नांद्यंते सूत्रधारः ॥ अलमतिविस्तरेण । इदानीं खलु चतुर्दशभुवनाधीशेन सकलफलदायिना निसर्गसुंदरेण सर्वांतर्यामिणा श्रीमता श्रीकृष्णेन लीलाविग्रहधारिणेति प्रेरितो ऽस्मि ॥ यत्तावत् सूरिजननंदनस्य धर्मात्मनो भोजस्य वृंदावत्यधीशस्य राज्ञः सच्चरितं सभ्येषु सच्चरितेषु सम्यगभिनीय संदर्शयेति ॥ आशासु नयनमुन्मील्य सहर्षं । अहो परमचतुरा अस्मदभिनयं वीक्षितुं निर्मत्सराः सभ्याः संप्राप्ता एव ॥

प्रविश्य नटः ॥ अत्रागतानां सभ्यानां कः स्वार्थः । अस्मन्महिमवृद्धिरेव । तथा हि ।

महिमानं परस्यैव कर्तुमिच्छंत आदृताः ।
निर्मत्सराः शुभाचाराः सभ्या यांति सभांगणं ॥

सूत्रधारः । अलमतिविस्तरेण । विवक्षितमेव कथ्यतां ॥

नटः सोत्साहं ॥ इदमेव विवक्षितं यदावाभ्यां सभ्यानुरंजनं कर्तव्यं तत् केन सांत्वनेनेति ॥

सूत्रधारः । कच्चिन्न जानासि किं । शृणु । इदानीं वेदांतवागीशभट्टाचार्येण निबंधो रचितो ऽस्ति ॥

नटः । स किं साधनं ॥

सूत्रधारः । कः संशयः ॥

नटः सहर्षं ॥ कच्चिन्नाम किंनामायं निबंधः ॥

सूत्रधारः । श्रीमद्भोजसच्चरितनामायं ॥

नटः सविस्मयं ॥ अये एतन्निबंधरचनकारणं वेदांतवागीशभट्टाचार्यस्य किं विमलं ज्ञानं ॥

सूत्रधारः । कः संशयः । तथा हि ।

शात्यादिसंदर्भमुपेत्य पुण्यैः पुराकृतैर्दीनदयं गुरुं यः ।
नारायणं ब्रह्मविदं मुनींद्रं संसेव्य भातीह परात्मविज्ञः ॥
कदापि केनापि कलिः कृतो नो पांडित्यमानेन समं बुधेषु ।
संपश्यता सर्वजनेषु संतं पीतांबरं येन बुधेन सो ऽयं ॥

नटः सविस्मयं ॥ अस्य वेदांतवागीशभट्टाचार्यस्य ब्रह्मविन्मुनींद्रः किं नारायणो गुरुः ॥

सूत्रधारः सानंदं ॥ अये न जानासि किं । शृणु । वाराणस्यां गृहीतलीलावतारो नारायणो मुनींद्रः ॥

नटः । भक्तिभावितं नारायणं पुरः पश्यन्निव सानंदं ॥ किंप्रयोजनो वाराणस्यां गृहीतलीलावतारो नारायणः ॥

सूत्रधारः । तमेव नारायणं ध्यायन् सप्रसादं ॥ कच्चिदंग न जानासि नारायणलीलावतारप्रयोजनं । शृणवति प्रयोजनं । तथा हि ।

काले कलौ गतरणे कृपयन्नयं च
क्रूरं तपश्चरति तत्त्वविदो मुनींद्रान् ।
रक्षन्नृशंसकृतिभिर्विबुधैर्विपन्नां
गोरूपिणीमिव द्रुतां परमात्मविद्यां ॥

नटः । नेपथ्याभिमुखमवलोक्य ॥ भो रंगाचार्यस्य कवेः साक्षान्नारायणो गुरुः स वागीशो यस्य राज्ञो भोजस्य निबंधं कुरुते स भोजनृपतिः कमनीयकीर्तिरेव ॥

सूत्रधारः । सानंदं सभ्यवदनान्यवलोकयन् ॥ अये नटवर किं नावगच्छसि राजालंकार एव भोजराज इति । तथा हि ।

वृंदावतीशो जगति प्रसिद्धः शौर्येण दानेन सनावनेन ।
यशोनिधिः सूरजनो महींद्रस्तदात्मजो राजति भोजराजः ॥

नटः ॥ अये भोजराजस्य सूक्ष्मं सच्चरितं नोत्सुपेतं दुर्बोधं किं विदितं ॥

सूत्रधारः । साभिमानं ॥ नटवर प्रजापालनादि वृंदावत्यधीशस्य भोजराजस्य सम्यग्ज्ञातमेव । तथा हि ।

तथा प्रजाः पालयतीह भोजो यथा प्रजाः पूर्वतनं स्मरंति ।
भोजं महींद्रं खलु चौरभीतेः स्वर्यावेतो धर्ममतिः कृपालुः ॥

नटः । प्रफुल्लनयन ऐंद्रीदिशमवलोक्य ॥ अये वृंदावत्यधीशस्य सत्कीर्तिमुद्गायंतौ पुंस्कोकिलाविवैतौ । तदस्मात्स्थानादपसर्तव्यमावाभ्यामिति वरं । यतः ।

स्वस्मात्समागच्छति सभ्यमुख्ये स्यातुं न शक्यं खलु बोधपूर्णं ।
पूर्वं सभा संगतिनाधिके ऽपि जनेन मानाधिकमत्सरेण ॥

इति निष्क्रांतौ तौ ॥ प्रस्तावना ॥ ततः प्रविशति वाणीपतिः । नयनानंदश्च ॥

वाणीपतिः । अये नयनानंद । इति सानंदं संबोध्य ।

तां वाणीं करवाणि वाणिललितां भोजस्य राज्ञो गुणा
वर्ण्यंते सुधया समा मधुरया यस्यां प्रिया भूभुजां ।
इत्येवं ननु भारती कृतनतिः संप्रार्थिता भूरिशः
प्रादाद्वांछितमस्तु ते वरममुं मातेव वाग्देवता ॥

तथा हि ।

भोजसंगरमवेक्ष्य धन्विनो भीष्मदेवसदृशस्य वेपते ।
सायकै रिपुतनौ प्रवर्षतो मानसं पविसमं मुहुर्मुहुः ॥°

After these two '*vandivarau*' have made their exit (fol. 5*a*), the dialogue is carried on to the end of the first act by three *Vaishṇavas—Karuṇākara, Bhūrilābha,* and *Rāmadāsa.*

Act II. begins (fol. 8*a*): ततो भिन्नदेशस्थितौ निसर्गसुंदरो ऽरविंदलोचनश्च द्विजवरौ प्रविशतः ॥

निसर्गसुंदरस्तावत् । अरविंदलोचन कुतः स्थानात्समागतो भवान् तत्स्थानं स्तुत्यं । यथा ।

सूर्यबिंबं विनिर्यातमिंद्राशायाः प्रगे द्विजाः ।
दृष्ट्वा स्तुवंति तामैंद्रीं हेमाद्रिशिखरद्युतिं ॥°

After these two worthies have taken their departure (fol. 12*b*), the conversation is taken up and carried on to the end by *Cārumitra* and *Kīrtivarman.*

It ends: इति तौ निष्क्रांतौ ।

श्रीमच्चक्रधरव्यासप्रसत्त्युत्फुल्ललोचनः ।
वृंदावतीशभोजो ऽयं जीयात्सूरिजनात्मनः ॥

इति श्रीमन्नारायणसरस्वतीसंपूज्यचरणकमलयुगलवेदांतवागीशभट्टाचार्यकृतौ धर्माध्यक्षव्यासश्रीगोपालनंदनव्यासश्रीचक्रधरालंकृतवृंदावत्यधीश[सुरजननंदनवृंदावत्यधीशश्रीभोजराजसच्चरितनाम्नि श्रीनाटके द्वितीयोंकः] ॥

From सुर° this has been supplied by a later scrawling hand; but the first act has the same colophon.

[H. T. COLEBROOKE.]

4182.

117a. Foll. 30; size 10 in. by $4\frac{3}{4}$ in.; fair Devanāgarī writing, of about 1800 A.D.; thirteen lines in a page.

Dharmavijaya nāṭaka, an allegorical play, in 5 acts, composed—for the purpose of demonstrating the spiritual advantages of a life regulated by religious ordinances—by *Śukla Bhūdeva,* or *Bhūdeva Miśra.*

It begins: प्रकटितनिजरूपः षोडशाराभिरामे°

See A. Weber, Berlin Cat., no. 1561; Rāj. Mitra, Notices, i., p. 37.

The work has been published in the *Grantharatnamālā,* iii. (Bombay 1889).

The MS. ends: विद्याः । तदेहि वत्स सहैव तावत्साधयामः ॥ इति नाट्येन निष्क्रांताः सर्वे ॥ इति श्रीमच्छुक्लभूदेवविरचिते धर्मविजयनाम्नि नाटके नायकनंदनो नाम पंचमोंकः ॥ समाप्तमेव नाटकं ॥

After the colophon the edition adds 3 *ślokas* which evidently merely record the date of a MS. used by the editor, viz.:

आनंदाभिधवर्षे तथासयैः संमिते शके माघे ।
कृष्णनवम्यां पूर्णं नाटकमेतच्च धर्मविजयाख्यम् ॥ १ ॥
लिखितं शंकरभिषजा वैनायकिना पुरे त्रिसंध्याख्ये ।°

This gives the late date Śaka 1776 (A.D. 1854). [H. T. COLEBROOKE.]

4183.

1860. Foll. 53; size $11\frac{3}{4}$ in. by $5\frac{1}{2}$ in.; clear, modern Devanāgarī writing; 9–14 lines in a page.

Bhūdeva's Dharmavijaya, with a commentary, entitled *Arthadīpikā,* by the poet's disciple, *Bhaṭṭa Bhavānīśaṅkara.*

The commentary begins:

श्रीभूदेवगुरूंनत्वा सांबशंभुस्वरूपिणः ।
भवानीशंकरेणास्य क्रियते ह्यर्थदीपिका ॥ १ ॥°

See A. Weber, Berlin Cat., no. 1561.

It ends :

श्रीमद्भूदेवगुरुतो ज्ञातं धर्मश्रुतादिकं ।
इति ज्ञापितमस्माभिर्नैवं नात्र प्रकल्पितं ॥ [बभूवतुः ।
अर्थः शब्दश्च सर्वोऽपि जज्ञात्मानौ(? जि° or जडा°)
ययोस्तथापि चक्राते नाटकं दीपिकां च यत् ॥ १ ॥
सर्वथा व्यवहारस्य निषेद्धुं नार्हता यतः ।
लोको धर्मस्य विजयं बुद्ध्वा धर्मे प्रवर्ततां ॥ २ ॥
न प्रातिपदिकं किंचित् स्याद्ययोः प्रतिपादकं ।
तौ भूदेवभवानीशंकराख्यौ नामकीर्तनात् ॥ ३ ॥
असंबद्धमिमं लोकं कुर्वाते हतकिल्बिषं ।
तौ ब्रह्मकूटस्यावीशौंतरात्माहं तु जीवकः ॥ ४ ॥
इत्येवंचिच्चतुर्थीति संसराद्भिर्विभाव्यतां(!) ।
नवत्वेष्टसुधांश्वब्दे शंभुनैतद्विभावितं(°पितं W.) ॥ ५ ॥
मार्गमस्तककृष्णायां पंचम्यां पुस्तकं मुदा ॥ ६ ॥

इति श्रीमद्भट्टभवानीशंकरविरचितायां धर्मविजयव्याख्यायामर्थदीपिकाख्यायां पंचमोऽङ्कः ॥

Seeing that the Berlin MS. has the same date (Saṃv. 1869 = 1812 A.D.), one might feel inclined, with Weber, to take it to be the date of the composition of the commentary, were it not that Peterson, Rep. iv., no. 710, mentions a MS. of the work dated Saṃv. 1832.

[DR. JOHN TAYLOR.]

4184.

1183b. Foll. 30 ; size 13½ in. by 4⅝ in. ; indifferent Bengālī handwriting of 1805 A.D. ; eight lines in a page.

Kuvalayavatī nāṭikā, a short play on the love of *Mādhava* (*Kṛishṇa*) and *Kuvalayavatī* ; by *Kṛishṇa Kaviśekhara*.

The MS. is rather incorrect, especially in the *Prākṛit* passages.

It begins :

यः सूत्रेति(? संत्राति) जगन्ति यं परिचरन्त्यष्टौ महासिद्धयो
येन स्वप्रपदेऽर्पिता दिविषदो यस्मै हरन्ते बलिं ।
वायुर्वाति बिभर्ति भूर्वितपते सूर्योऽपि विश्वं यतो
यस्मै तत्प्रभयावभाति रमते यस्मिंश्च तस्मै नमः ॥

नान्द्यन्ते सूत्रधारः ॥ अलमतिविस्तरेण । आदिष्टोऽस्मि परिषदा । अस्ति परिचितरघुकारभारतीतीर्थभूतस्य श्रीकृष्णनाम्नः कविशेख[र]स्य कृतिरभिनवा कुवलयवती नाम नाटिका । सा च रमणीयकथाकुतूहलेनास्माभिरद्य कौमुदीमहोत्सवे यथाप्रयोगमवश्यमालोकयितव्या । तत्क्रियतां नेपथ्यपरिग्रह इति । ममापि स्थाने महानत्र परितोषो हृदयस्य यत्सत्यमसुलभो ऽयमेकत्वसंनिपातो गुणातिशयानां । तथा हि ।

चरितमिदंयदायवर्णीचित्रं(? चरितमिदमुदार°)
परिषदतीव गुणस्पृहावतीयं ।
वयमपि मधुरप्रयोगरक्ताः
कृतिरभिजातरसस्थितिः कवेश्च ॥

नेपथ्याभिमुखम् । आर्ये इतस्तावत् ॥ प्रविश्य नटी । अयि (? इअम्हि) आनवेतु अज्जो(!) ॥ सूत्र° । आर्ये कुवलयवतीदर्शनोत्सुका परिषत् । तद्यथावदादिश्यतां पत्रिकाग्रहणाय पात्रवर्गः ।° --- ॥ इति निष्क्रान्तौ ॥ प्रस्तावना ॥

ततः प्रविशति माधवो मधुकरश्च ॥

माधवः । ललितपदेन परिक्रम्य सहर्षं । सखे मधुकर अद्य सर्वतो विशेषितगुणोऽयं रमणीयभूयिष्ठो वनाभोगः । तथा हि ।

ये पूर्वं परिणामपाण्डुरुचयः शाखावशेषा द्रुमास्
ते लाक्षावसना हिमीमभिनवा[1] प्रापुः श्रियं पल्लवैः ।
नीहारग्लपिताश्च या मधुकरैरज्ञातकल्पा लता
हूस्तो(? दृष्टे) कुन्दिनि कुड्मले प्रणयिता तासां परा पश्यते ॥

This poor play, consisting of 4 acts, looks like an imitation of the first part of the *Śakuntalā*. The hero meets *Kuvalayavatī*, accompanied by her two friends, *Navamālikā* and *Campakamālikā* (afterwards joined by *Caturikā*), in Vṛindāvana, and falls in love with her ; but, in spite of every care to keep the *liaison* secret, *Rādhikā* (with her *confidante Ratnamālī*) becomes aware of it and takes offence. In the end, however, she condones the temporary aberration of her lover, and *Kuvalayavatī* and her friends are handed over to her as her handmaids ; and matrimonial harmony is thus once more restored in Vṛindāvana. It would almost seem as if the author, for want of inspiration, had been in haste to bring his piece to a conclusion.

---

[1] Read हीमामभिनवा or इमाम°

On the margin of the last page, the play is called *Kuvalayaratināṭikā*, both in Bengālī and Devanāgarī characters.

[H. T. Colebrooke.]

4185.

1713c. Foll. 15; size 9 in. by 3½ in.; fair Devanāgarī writing, of 1744 A.D.; eleven lines in a page.

Narakadhvaṃsa, a dramatic entertainment, in one act, of the kind called *vyāyoga*, by *Dharma Sūri*, son of *Parvateśvara Sudhī*, who belonged to a Benares family distinguished for the proficiency of its members in philosophical studies.

The subject of the piece is the victory of *Kṛishṇa* over the *Asura Naraka* near Prāgjyotisha; *Purandara* and *Śacī*, with their followers, being introduced as witnesses of the fight, and their dialogue giving a vivid description of all its incidents.

The *Prākrit* passages are throughout followed immediately by the Sanskrit version.

It begins:

कस्तूरीपरिदिग्धमुग्धकमलावक्षोजबुद्ध्या ध्रुवं
नीलाद्रेः शिखरेषु नित्यकुतुकी दैत्यारिरव्यात्स नः ।
प्रत्यंगाभरणेषु दीप्रवपुषः सेवासु देवाः स्फुटां
यस्याशेषसुरात्मतां विदधते चंद्रार्धचूडादयः ॥ १ ॥

नांद्यंते सूत्रधारः । सकौतुकं सर्वतो ऽवलोक्य । अहो प्रमदयति मम हृदयं प्राभातिकी लक्ष्मीः ।

शय्यांबरं शशिनिशोरिव भाति लाक्षा-
तांबूलयोरिव रसैररुणाभ्रलेशैः ।
हारैः प्रसूननिकरैरिव तारकैश्च
चूर्णैः पटीरशकलैरिव चंद्रिकांशैः ॥ २ ॥

अपि च ।

त्रासादासादिताशाविवरभुवि हरेरंधकारामरारौ
तद्योधाः प्राप्तबाधा इव दिशि विहगा विद्रवंति ध्वनंतः ।
भ्रष्टाश्चित्राः पताका इव सलिलधरा हारवत्तारकाश्च
प्रांतप्रालंबिबिंबोऽपरसमरभुवि छत्रवच्छीतरोचीः ॥ ३ ॥

प्राचीमवलोक्य ।

प्राक्छिखरिशिखरशेखरतरुणारुणकिरणमंजरी तरणेः ।
विदधाति रथतुरंगमचूडारुणचारुचामरभ्रांतिं ॥ ४ ॥

पुनर्विलोक्य । उदितः खलु भगवान् भक्तजनश्रेयस्करो भास्करः । नूनमयमधुना कामपि कामुकपरिपाटीमाटीकते । यदिदानीं

नीतक्षपः क्वचिदधःकृतजीवनाया
रागान्वितस्तुहिनबाष्पमुचो नलिन्याः ।
लीनश्रियो विगलितालिगिरो विवस्वान्
पुष्णाति पादपतनेन पुनः प्रहर्षं ॥ ५ ॥

वियद्विलोक्य साश्चर्यं ।

श्यामीभूता सुरपथवनी वासरेष्वातपेन
स्पृष्टा धात्रा निशि विरचितैर्दोहदैर्ध्वांतधूपैः ।
सद्यस्ताराकुसुमरुचिरा मंडलेनास्य भानोः
संप्रत्येषा भवति फलिता पल्लविन्यंशुभिश्च ॥ ६ ॥

तदेनमभितः फलप्राप्तये भगवंतं भानुमंतमुपतिष्ठे ।

नमस्तमःकर्दमदुर्दमांबुधि-
प्रनष्टचेष्टाखिलजंतुसंततिं ।
प्रसार्यमाणैः पटुदीर्घरश्मिभिर्
जगत्त्रयीमुद्धरते विवस्वते ॥ ७ ॥

इति सादरं प्रणमति । वियद्विलोक्य सहर्षं ।

कालाभ्रद्विपपाकलः कतकजक्षोदः कठोरांभसां
केकाम्नायकुहूः कलानिधिमणेः शीर्णोपलोद्घर्षणं ।
कंसारेः प्रतिबोधिका कमलिनीकादंबयोः कुट्टनी
कालः कोऽपि करोति काशसुरभिः कामं मनःकौतुकं ॥ ८ ॥

अपि च ।

चापान् पुंड्रेक्षुरूपान् कमलकुवलयोत्फुल्लमल्लीक्षुरप्रान्
दीप्रांश्चोहूप्तसप्तच्छदमधुमदवद्गंधवाहद्विपेंद्रान् ।
निर्बाधान् हंसयोधाञ्शरकुसुमरजोवैजयंतीर्जयंतीः
सज्जीकुर्वन् समंताद्वदति शरदृतुर्जैत्रयात्रां स्मरस्य ॥ ९ ॥

अपि च ।

सप्तच्छदस्तबकसंभृतसौरभांध-
पुष्पंधयप्रणयमंथरगंधवाहाः ।
व्यातन्वते विमलशालिवनालिकेलि-
लोलद्भुजंगयुवपुंगवमंगलानि ॥ १० ॥

तदहं तावदाश्रिताभिमतफलप्रदायकस्य निखिलनिगमश्रेणीमुक्तावली नायकस्य कमलामुखकमलदिननायकस्य भगवतो जगन्नायकस्य शरत्कालविहितोत्सवसमालोकनातिकौतुकान् सकलकलाकलापकोविदान् पारिषदान् सत्वरमुपगम्य कमपि

रूपकविशेषमभिनीय विज्ञानं सफलीकरिष्यामीति परिक्रम्यावलोक्य च । अयं खलु लवणजलनिधेहल्लोलकल्लोलजालेन कूले समुत्सारितो महेंद्रनीलमणिराशिरिव प्रकाशते नीलसुंदरगिरिः । यदिदानीं

चांपेयसांद्रवनराजिविराजमान-
पार्श्वद्वयस्तुहिनपांडुरतुंगशृंगः ।
निष्यंदमानविततायतहेमपद्म-
भ्राजद्दलक्षमुखताक्ष्र्यधियं तनोति ॥ ११ ॥

पार्श्वतोऽवलोक्य सहर्षं । हंतास्मद्विधेयं भागधेयं । इह हि

जगत्पतेरस्य दयार्द्रमूर्तिभिः
कटाक्षवीक्षाभिरभिक्षणोक्षिते ।
सुशीतलच्छायवटांतिकस्थले
सुखोपविष्टाः स्वयमेव सज्जनाः ॥ १२ ॥

तदिह विलंबः श्रेयसोंतरायः । आर्ये इतस्तावत् ॥

प्रविश्य नटी । अय्य(!) इयम्हि । आर्य एषास्मि । किं करणिज्जमाणवेदु अय्यो । किं करणीयमाज्ञापयत्वार्यः ॥

सू° । आर्ये किमन्यदस्ति करणीयमेतत्सामाजिकमनोरंजनात् ॥

नटी । अज्ज कहं करणिज्जं सामाइअहिअआणुरंजणं । आर्य कथं करणीयं सामाजिकहृदयानुरंजनं ॥

सू° । विख्यातेऽजनि पर्वतेश्वरसुधीः श्रीवारणास्यन्वये
दक्षो दर्शनकारिणां सुमनसामैकात्म्यलीलायितं ।
धर्माख्येन मनीषिणा विरचितस्तत्सूनुना तादृशा(?°शो)
व्यायोगो रसजृंभितोऽस्ति नरकध्वंसाभिधो नूतनः॥१३॥

तदभिनयेन सभासदः संतोषणीयाः ॥

नटी । कहं अह्माण(°णं) अणतिमेत्तरमणिज्जो रूपआहिणवो एदाणं महप्पाणं सळहापदं (? सलाहा°) हविस्सदि ।
कथमस्माकमनतिमात्ररमणीयो रूपकाभिनयो एतेषां महात्मनां श्लाघापदं भविष्यति ।

सू° । महात्मान एव रमणीयगुणलेशवत्तयापि परकृतिं श्लाघंते । तथाहि ।

दोषाकरोऽपि नित्यं सुधाकरत्वेन चंद्रमा लोके ।
श्लाघ्यतरो भवति बुधैर्न तथा खलु पंकजन्मभिस्तु जडैः ॥१४॥

नटी । अय्य चंदम्मि सुहाअरत्तणं विअ अह्माणं रूपआहिणवि (?°म्मि) रमणिज्जो को उणो ।
आर्य चंद्रे सुधाकरत्वमिवास्माकं रूपकाभिनये रमणीयः को गुणः ।

सू° । अस्ति खल्वत्राप्यमृतरसनिष्यंदी सकलतमस्तोमपरिपंथी नरहरेर्नरकासुरनिबर्हणोदाहरणरूपो गुणशिरोमणिः । इत्यमेवैतत् कविना स्वकाव्ये बालभागवतेऽप्युदीरितं ।

विनिंदिताः केन च पंकजन्मना जडेन दोषोपहिता अपि स्वतः ।
ममोक्तयो विष्णुपदस्पृशो बुधैः कला इव प्राप्ततमाः कलानिधेः ॥
[१५ ॥

नटी । णिसग्गवक्कतक्ककक्कसवअणविळासस्स धम्मसूरिणो वअणाइ कहं सुहारसमहुराइ संवुत्ताइ ।
निसर्गवक्रतर्ककर्कशवचनविलासस्य धर्मसूरेर्वचनानि कथं सुधारसमधुराणि संवृत्तानि ।

सू° । तर्के कर्कशता गतापि नितरां वाग्वैभुरी मत्कवेः
माधुर्यं प्रकटीकरोति कविताकालेषु किं याद्भुतं ।
पश्यात्यंतकठोरतामुपगता ग्रीष्मे मयूखावलिः
किं नाविष्कुरुते नवामृतभरं भामानिधेः प्रावृषि॥१६॥

नटी । जुत्तमुत्तमज्जेण । युक्तमुक्तमार्येण ॥

सू° । आर्ये कुतो विलंबने(°नं) ।
धाराधरतमस्तोमैः खिन्नामाशां शचीपतेः ।
हरिः प्रसादयन्नेव नाट्ये त्वरयतीह नः ॥ १७ ॥

नेपथ्ये । भीतिं विपक्षजनताजनितां जहीहि
देवेश मुंच नगरीं नगरीयमस्तां ।
रक्षोबलेन सहसा सह सायकाग्नौ
हव्यं करोमि नरकं नरकंटकं तं ॥ १८ ॥

सू° । सविमर्शं । नूनमयं नरकासुरव्यामेन स्वपुरं परिजिहीर्षुं पुरंदरमाश्वासयतः कृष्णस्य वेषमभिनीतवतो ममानुजस्य कलहंसकंधरस्यालापः श्रूयते । तदयमविलंबितमेव समरोन्मुखो निर्गमिष्यति । पार्श्वतो विलोक्य सहर्षं । अयंहि

अंके निधाय दयितामिह सत्यभामां
प्राप्तां पुरेव समरादिव वीरलक्ष्मीं ।
दीव्यन् रथे महति दारुकचोदिताश्वे
पंचायुधोपरिकरः पुरतोऽभ्युपैति ॥ १९ ॥

तदावामनंतरक[र]णीयाय सज्जीभवावः ॥ इति निष्क्रांतौ ॥

प्रस्तावना ॥ ततः प्रविशति यथानिर्दिष्टः कृष्णः ॥

कृ° । अयि दारुक प्राग्ज्योतिषं प्रति सत्वरं चोदयाश्वान ॥

दारुकः । आयुष्मन् मया निश्चितपूर्वमेव भवतश्चिकीर्षितमेतत्पुरंदरागमनात् ॥°

It ends: पुरंदरः । नूनमयं द्वारकापुरपरिसरे संचरन्मुरहरो हलधरेण प्रत्युद्गम्यते । तद्वयमप्येतदनुज्ञाताः सुरपुरं प्रविशामः ॥ इति नंदनंदनस्पंदनस्पंदनसविधं मरुंदनः समवतरति ॥

पु° । भगवन्नभिवंदते पुरंदरः ॥

कृष्णः । अप्रतिपक्षो भूयाः ॥

पु° । भगवन्ननुगृहीतोऽस्मि ॥

कृ° । इदं तन्मणिकुंडलाभरणयुगलमदित्यै समर्पय ॥

पु॰। सहर्षं। महाप्रसादः। इति सादरं गृह्णाति ॥

कृ॰। पुरंदर किं ते भूयः प्रियमुपकरोमि ॥

पु॰। इतः परं किमु कर्तव्यं।

दुर्वारा समरे मुरेण सहिता सर्वापि रक्षश्चमूर्
गर्वांधो दलितश्च सोऽपि नरकः पूर्वामराणां प्रभुः।
निर्वाणं गमितश्च शोकदहनो गीर्वाणमातुस्ततः
सर्वाण्यस्मदपेक्षितानि भगवन्निर्वाहितानि त्वया ॥८१॥

तथाप्येतदस्तु भरतवाक्यं।

भामत्युल्लसिता रता विवरणे तंत्रे निरूढिं गताः
सच्चिंतामणयः समुज्ज्वलयशोलीलावतीवल्लभाः।
सांख्यन्यायविचारचंचुमतयः प्राभाकरप्रक्रिया
धौरेयस्फुरणा भवंत्ववनिपा विप्राश्च नित्योत्सवाः ॥८२॥
आबिभ्रता श्रियमुरस्यथवा शिरोधाव्
अब्जं च नाभिसुषिरे यदि वा कपर्दे।
पाणौ सुदर्शनवताप्यथवा ललाटे
देवेन केनचिदिदं जगदेतु मोदं ॥ ८३ ॥

इति निष्क्रांताः सर्वे। व्यायोगः समाप्तः ॥ संवत् १८[०]१ आषाढशुद्धद्वितीयायां लिखितं मृत्युंजयेन ॥ श्रीमात्रे नमः ॥

Whilst each leaf is marked नरकध्वंसः नाटकं (or ना॰) व्या॰, on the title-page the work is called नरकासुरध्वंसः।

If, by his reference to a *Bālabhāgavata*, the author (as would seem) refers to his own work, no such work of his is known to exist, unless, indeed, the *Kūrmabhaṭṭa*, to whom such a work is ascribed in Bühler's Cat. of Gujarāt, etc., MSS., ii., 14, is a mistake for *Dharmabhaṭṭa*.

The MS. belonged at one time to one *Nārayaṇa Bhaṭṭa*. [H. T. COLEBROOKE.]

4186.

2353 a. Foll. 19; size $10\frac{3}{4}$ in. by $5\frac{1}{2}$ in.; good Devanāgarī writing, of 1588 A.D.: eleven lines in a page.

Vāsantikā nāṭikā, in 4 acts, by *Rāmacandra*.

The plot is the familiar one of a king (*Haṃsaketu* of Pushpapura) falling in love with a singing girl (*Vāsantikā*), and of a jealous queen (*Haṃsamālā*, daughter of *Kuntaleśvara*) trying to separate them, till at last, *Vāsantikā* is found to be the long-missing daughter of *Malayaketu*, Mahārāja of Kesarapura, on the banks of the Kāverī, who is at the same time the queen's uncle. The princess being compelled by a curse to become a maid-servant till a wonderful jewel (*hāramadhyamaṇi*) of which she has been robbed is recovered, her mother's sister, *Vasumatī*, in the disguise of a female mendicant, named *Rāgataraṅgiṇī*, takes her to the court of Pushpapura. Here at last the jewel turns up again, with a prediction attached to it by the sage *Vāmadeva* to the effect that she shall be wed by *Haṃsaketu*, who at the same time shall become *cakravartin*. Thus the queen at length becomes reconciled to the proposed addition to the king's seraglio.

It begins: श्रीगोपीजनवल्लभाय नमः।

आयाता पुरतः सखीजनगिरा व्रीडावनम्रानना
स्विद्यत्स्वच्छकपोलमीक्षितवती रोमांचितांगं वरं।
व्यावृत्ताननमीक्षितालिवदना व्यावर्तमाना मनाक्
साशंकं शशिमौलिना गिरिसुताश्लिष्टा शिवायास्तु वः॥१॥

नांद्यंते सूत्रधारः। अलमतिप्रस्तुतेन। पुरतोऽवलोक्य। हंत सिद्धार्थोऽस्मि। यतः। समुदिता नानादिगंतरेभ्यो भगवतस्त्रिलोचनस्य यात्रायां यात्रिका लोकास्तद्यावदत्र गच्छामि। परिक्रामति।

नेपथ्ये। हंहो सूत्रधार वयमतिभीष्मग्रीष्ममिहिरकरसंताप-भयात् कतिपयवासरानिहैवातिवाहयिष्यामः। तद-नुग्रहबुद्ध्यास्मासु भवता रामचंद्रकवेः कृतिर्वासंतिका नाम नाटिका प्रयोक्तव्येत्यार्यविदग्धमिश्रा विज्ञापयंति।

सूत्र॰। आकर्ण्य। हंत हृदयानुसारिणा प्रसन्नं दैवेन। उच्चैः। भो भोः सामाजिका एष तावदहं गृहं गत्वा गृहिणी-माहूय संगीतकमनुतिष्ठामि ॥

पुनर्नेपथ्ये। त्वरतां२ भवान् ॥

सूत्र॰। नेपथ्याभिमुखमवलोक्य। आर्ये इतस्तावत् ॥

प्रविश्य नटी। अज्ज एसम्हि। आणवेदु अज्जो ॥

सूत्र॰। आर्ये आज्ञप्तोऽस्मि तावदेतैरार्यविदग्धमिश्रैर्यद्वासंतिका नाम नाटिका नाटयितव्येति ॥

नटी। सविश्वासं। ऊज्ज ण मे अंगाइं पप्फुरंति ॥

सूत्र०। ससंभ्रमं। किमिति२ ॥

नटी। सास्रं। अज्ज अज्ज (आर्य अद्य) कुंडिनपुरादो आअदेण (आगतेन) केणावि कुशीलवेण विहत्थीकिदम्हि (विहस्ता कृतास्मि) ॥

सूत्र०। कथमिव ॥

नटी। जं तुह बहिणिआ मातुस्सिआए (यत्तव भगिनी मातृष्वसा) समं मातुलकुलादो जणअघरं पट्ठिदा (जनकगृहं प्रस्थिता)।

सूत्र०। ततस्ततः ॥

नटी। तदो कुदोवि उवट्ठिदेण महाणीकेण विअट्ठिदा (विघट्टिता) कुतोवि (कुत्रापि) देसंतरे लीणा। रोदिति ॥

सूत्र०। हा कष्टं। अथ तत्रभवती भवत्या मातृष्वसा किंवृत्ता ॥

नटी। अश्रूणि प्रमृज्य। तदो णिवुत्ते तस्सिं सा विद्दो तदो विलोइअ सणिव्वेदा कासाए परिधरिअ तं अणेसिदुं देसंतरे वाह्युडइ ॥

सूत्र०। सनिश्वासं। धिग्दैवं यदेतादृश्यो ऽपि महाकुलसंभवास्तादृशीमवस्थां प्रतिपद्यंते। क्षणं ध्यात्वा। आर्ये अहमप्यनया चिंतया परिप्लुष्टचित्तः शक्नोमि नात्मानं धारयितुं। यतः।

चिंतया भ्रष्टचित्तानां धीरतां वहतामपि।
अनास्था जायते नित्यं संस्तुतेष्वपि वस्तुषु ॥

नेपथ्ये। साधु रे भरतपुत्र साधु सम्यगभिहितं चिंतयेत्यादि पठति ॥

सूत्र०। आकर्ण्यावलोक्य च। आर्ये संप्राप्तस्तावदयं महाराजस्य हंसकेतोरमात्यो वसुमित्रः। तदेहि गच्छावः। इति निष्क्रांतौ ॥ प्रस्तावना ॥

ततः प्रविशति वसुमित्रः।

वसु०। साधु रे साधु सम्यगभिहितं चिंतयेत्यादि पठित्वा चिरं विचिंत्य। सत्यं चिंताविष्टानामीदृश्येव रीतिः। आत्मानं निर्वर्ण्य। आः अहमपीत्थंभूत एवास्मि। यतः।

राजकार्याणि सर्वाणि हित्वा संप्रति शून्यया।
चित्तवृत्त्या मयात्मापि न विशेषाद्विभाव्यते ॥

अथवा प्रभूणामुदयमुपेक्षमाणानां भृत्यानां कुतः श्रेयः। तथाप्येतावच्चिंतनीयं। यत्सप्रश्रयमनुनीतेन महर्षिणा परिव्राजिकाशिष्याया वासंतिकायाः पाणिपीडनमहोत्सवमनुभवत एव वत्सहंसकेतोश्चक्रवर्तित्वमित्यावेदितं। देव्या च कुंतलेश्वरदुहित्रा हंसमालया सबहुमानमाहूयामात्यवसुमित्र [।] इयं संगीततरंगिणी परिव्राजिकास्मास्वतिविश्वसिति। अस्मास्वेव स्थातुमिच्छति। तदत्रभवतीं सशिष्यां त्वयि निक्षेपमिव निक्षिपामि। अनंतरं कर्णे लगित्वा यथैनां वासंतिकां न नयनगोचरीकरोत्यार्यपुत्रस्तथा विधेहीति मामादिभिर्निगृहीतोऽस्मि। तदत्र किं धर्मं। क्षणं ध्यात्वा। भवतु भृत्यानां प्रभुकृत्यमेवोद्देश्यं न तु कर्तृविशेषस्तस्मात्पुष्करादितीर्थेन यापयिष्यामि ॥ नेपथ्ये कलकलः ॥

वसु०। आकर्ण्यावलोक्य च। अये यथा मंथरप्रतीहारशतकरकलितकनकवेत्रयष्टिप्रहारप्रतिसार्यमाणनागरिकजनकोलाहलः श्रूयते तथा तर्कयामि यत्प्रचलित एव धर्मासनादुत्थाय मधुरेण मममेकांतमेवनाय देवः। तत्कार्यशेषं चिंतयामीति निष्क्रांतः ॥ विष्कंभकः ॥

ततः प्रविशति राजा विदूषकश्च ॥

राजा। वयस्य पश्य। सोऽयमुत्कंठातरलितहृदयः समुपागतः सुरभिसमयः। यस्मिन्निह

भूयो भूयः कुसुमविशिखद्वेषिभालाग्निवह्नि-
ज्वालामालाकवलितवपुःकामिकेदारसंस्थः।
त्रस्यत्त्रस्यद्धरिणनयनादृष्टिपीयूषवृष्ट्या
सिक्तः सिक्तो मनसिजतरुः पल्लवान्यादधाति ॥०

The Sanskṛit version of the Prākṛit passages is only given in the margin of the first few pages. The writing of foll. 3-10 has suffered from damp along the right-side edge; whilst the left edge of fol. 14, and the right-hand edge of the last three leaves has been torn or eaten away.

It ends: राजा। इतः पर - - - मस्ति। यतः।

नीतस्तेन महर्षिणा स्मृतिपथं देव्या प्रसादः कृतो
जातास्तेऽपि दिगंतगीतयशसः सं[तोषिताः पा]र्थिवाः।
त्वं चापि प्रणयोद्धुरा समभवस्तस्मै पुनः श्रेयसे
प्राप्ता चेयमुदंचदंबुजमुखी नातः परं प्राथ-(r. प्रार्थ्यते) ॥

[तथा]पीदमस्तु भरतवाक्यं।

काले तोयमुचो भवंतु जलदाः क्षोणीभुजः पालयं-
त्वेतामंबुधिमेखलां वसु[धरां प]र्यन्तशातारयः।
काव्यालापकथाविदग्धमनसो भूयासुरेते जनाः
शर्वः शर्मपरंपराः प्रवितरत्वास (–) ˘ – नां मुहुः ॥

इति निष्क्रांताः सर्वे ॥ चतुर्थोंकः ॥ इति रामचंद्रकृता वासंतिका नाम नाटिका समाप्ता ॥ सं १६८५ शनौ आ। कृष्णजीसुतमुरारिणा लिखिता। श्रीगोपीजनवल्लभाय सततं कुर्मो नमो ना– ॥

Fol. 1a has the statement of a former owner: व्यासहरिरामने विभागे। [GAIKAWAR.]

4187.

2353 b. Foll. 25; size 10 in. by 3¾ in.; good Devanāgarī writing, of 1470 A.D.; eight lines in a page.

Pāṇḍavābhyudayaṃ chāyānāṭakaṃ, a dramatized account of the birth of *Draupadī* from the smoke of a sacrifice performed by *Drupada*, king of Pañcāla (act I.), and of her being given away in marriage, by *svayaṃvara*, to the five Pāṇḍava princes (act II.); composed, by *Vyāsa-śrī-Rāmadeva*, for the delectation of his patron, *Vīra Raṇamalladeva nṛipati*, grandson of *Haribhrama (Haribrahman)*.

The MS., though written by a skilled calligraphist, is, on the whole, rather incorrect in its readings; and there are occasional small lacunae, probably caused by flaws in the original MS. In some places a second hand has made corrections.

It begins:

विसर्गोत्सर्गादाविह किल विधातुः समुदिता
परा सा काचिद्भागचरमचिदुन्मेषमहसः ।
पुराणं वेदानप्यखिलपुरुषार्थाश्रयतरून्
गुरून् पंचाम्नायान् सममथ भजंती विजयते ॥ १ ॥

नांद्यंते सूत्रधारः । समंतादवलोक्य सचमत्कारं । अये कथमियं प्रवृत्तैव शरत् । यदिदमपगतजलदपटलकलंकशंकमपंकसंकरम-मलसलिलकेलि-लोलकोलाहलि-कलहंस-कुलाकुलितकमलवनं भुवनमंडलमलंकरोति कापि समयलक्ष्मीः ।

अपि च ।

एतस्मिन् शरदुत्सवेऽतिसुभगं गायंति भृंगांगना
नृत्यंत्यब्जकराभिनीतिभिरिमा राजीविनीराजयः ।
मुक्ताजालकशालिसंततसितज्योत्स्नावितानं वियः
च्छ्रेणीभिः ककुभां मुखेषु च शुकैरातन्यते तोरणं ॥ २ ॥

किंचित्परिक्रम्य सोल्लासं । अहो महोदयपरंपरामिव पश्यामि। यदिह जगदुदरजागरूककौमुदीमहसि हसितहरिन्मुखे सुखितसुरमुनिमनुजमनोहारिणि हरिप्रबोधमहोत्सवे त्रिभुवनजनमनः-प्रमदमादधानो जगदुदयमहानाटिकाभिनयमद्यारभत कोऽपि सकलकलामयः समयसूत्रधारः । तथा हि ।

तत्तादृग्विधिनाऽभिनेतु[म]भितः शुद्धप्रबंधक्रमं
यः संमूर्छति मंजुले मधुकरप्रारब्धगीतध्वनौ ।
उत्सार्याशु घनावलीजवनिकामस्मिन् जगन्मंडपे
प्रत्यग्रप्रथितप्रसादसुमुखीः प्रावेशयद्दिग्वधूः ॥ ३ ॥

साकूतमिव । अहमपि तदप्र(?°नु) त्रिविधवीरचूडामणेरसमसाहसकस्य स्वयमंकायातविजयश्रीस्वयंवरमालालंकृतकंटकंदलस्य भुजबलदलितसकलारातेरारतस्य श्रीहरिभ्रमतनुजजन्मनो महामंडलेश्वरस्य श्रीमतो रणमल्लस्य महानवम्युत्सवमनुमिलितसमस्त-सामंतचक्रेऽनुकृतशक्रसंसदि दर्शितसकलकलाकला[प]शालिनि निखिलनिरवद्यविद्याविद्योतमानेऽस्मिन्नास्थानीमंडपे कस्यचित्प्रबंधस्याभिनयेन निजकुलकलां कृतार्थयितुमिच्छामि । तद्भवतु । परिक्रम्य नेपथ्याभिमुखमवलोक्य । आर्ये इतस्तावत् ॥

प्रविश्य नटी । सप्रश्रयमंजलिं बद्ध्वा । एसम्हि । आणवेदु अज्जो ।

सूत्रधारः । सादरं । आर्ये ननु प्रवृत्तैव तावदियं शरत् ।

नटी । साश्चर्यं । अज्ज कज्जलकिसिण सुघणघोरंधयामुक्कलिदभुवणकोसम्हि । °--

सूत्र° । ससंर(? सरसं) । अयि एतदर्थमेवाकारितासि। किंच विदितमेव तावद्भवत्या ।

अस्ति स्वस्त्ययनैकहेतुरखिलक्ष्मावर्मसत्कर्मणाम्
आविर्भावितभावितत्कृतयुगाचारप्रचारः क्षितौ ।
वीरश्रीरणमल्लदेवनृपतिस्तत्तद्गुणै रागिणी
यत्र श्रीश्च सरस्वती च वसतस्त्यक्त्वा निजं मत्सरं ॥ ६ ॥

अपि च ।

न जिह्वासाहस्रं न खलु विपुलत्वं च मनसो
न चायुःसातत्ये कतिचन विधातुः प्रतिभुवः ।
गुणानामास्थानं निधिरनवधिः शौर्यमहसः
कथं वा वर्ण्यः स्याद्भणत रणमल्लः क्षितिपतिः ॥ ७ ॥ °

आर्ये निरूपयामि तावत्किमपि रूपकमनुरूपं । इति चिंतामभिनीय सहर्षोल्लासं । अस्ति किल सकलसामंतचक्रचूडामणिना कबंधजकुलावतंसेनामैव(?°मुनैव) नरपतिनाभ्यर्थितस्य सरसकवेर्व्यासश्रीरामदेवस्य निर्मितिरभिनवं पांडवाभ्युदयं नाम छायानाटकं । तदभिनयेन °इमं नृपतिमाराधयिष्यामः । यदियमहिसामग्री(?) ।

मद्वर्ग्या नटकर्ममर्मनिपुणाः सभ्या गुणग्राहिणो
वाणी रामकवेरवेक्षितरसौचित्या चमत्कारिणी ।
पांडूनां चरितं च सिंचति सुधाधाराभिरंतः सतां
स्वामी श्रीरणमल्ल एष निखिलक्ष्मापालचूडामणिः ॥ १० ॥
° १३ ॥

नेपथ्ये । अयि(? अयि) भागुरे कुशकुसुमसमृद्धिवर्धितस्तावदति-
विमलसलिलाशयालंकृतः किमपि कमनीयो ऽयं देशः ।

सूत्र० । श्रुत्वा । सहर्षं । आर्ये समुपक्रांतमेव वर्णकैः । यदयं मुख्य-
नामा ममानुजो गृहीत[कुशकुसुमो] जावालिरित एवा-
भिवर्तते । तदेहि । आवामप्यनंतरकरणीयाय सज्जी-
भवावः ॥ निष्क्रांतौ ॥ प्रस्तावना ॥

ततः प्रविशति गृहीतकुशकुसुमः सकमंडलुर्जावालिः ।

जावालिः । ऊर्ध्वमवलोक्य । अहो । विदलितमिव गगनतलं ।
पुरस्तादवलोक्य । प्रभातमिव पश्यामि ।०

Jāvāli is joined by *Bhāguri,* who tells the story (heard from *Śālaṅkāyana*—pupil of *mahāmuni Śamīka,* dwelling on the Śrīparvata—who has come from the south country to king *Drupada's* sacrifice) of a *Brāhmaṇī* widow who comes to stay at Ekacakrā in a Brāhman's out-house (*aṅgaṇa-kuṭīraka*) with her five sons, one of whom, by dint of great strength and valour, subsequently rids the town of a *Bakarākshasa,* to whom the Brāhman, according to the daily custom, was to have given himself up; whereupon the widow with her sons disappears from the city.

The *vishkambaka* completed, the first act begins thus (fol. 9*b*):—

नेपथ्ये । भोः२ विततास्वरोपचारपरिचारकाः । समाज्ञा-
पयति वः सर्वानेष देवो देवयजनमधिवसन् पांचालचक्रवर्ती ।

अमंदस्वादूनि प्रगुणयत भोज्यानि बहुशः
समंतान्नीयंतां घृतदधिपयांसि प्रचुरतां ।
चिनुध्वं द्राक्षेक्षुप्रभृतिमधुरं वर्गमभितः
प्रसर्पत्सौरभ्यं कुरुत विविधं पानकमपि ॥ १७ ॥

अपि च ।

यद्यस्मै रुचितं प्रदेयमखिलं तस्मै तदेवादरात्
शाकानां तु पुनः पुनर्विकरणे कार्यः प्रमादो न च ।
भुंजाना व्यजनानिलैरुपरतस्वेदोद्गमाः सं[ग्र]ह-
स्रक्तांबूलविलेपनव्यतिकरे मा भूत्क्वचिद्विस्मृतिः ॥ १८ ॥

अपि च ।

कीर्यंतां गृहपक्षिणां प्रतिपथं धामानि संतुष्टये
गोभ्यः संतु समंततो ऽतिविततास्तद्ग्रासघासादयः ।
आनेतुं पथिकान् पुराच्च परितस्तिष्ठंतु दूता बहिर्
वन्यानामपि तृप्तये निशि तदाहारा भ्रियंतां वने ॥ १९ ॥

ततः प्रविशति राज्ञः प्रतीहारः ।

प्र० । समर्पितस्तावत् स्वामिनो निदेशः । सहर्षाश्चर्यं । अहो
निखिलजननयनमनोहारिणी किमपि कमनीयताम-
यं(०यी) यज्ञमंडपश्रीः । तथा हि ।
चेतःकर्ष[क]कुंकुमांबुभिरियं सिक्ता समंतान्मही
तद्भंगिक्रममुक्तमौक्तिकशतैरंतःकृतस्वस्तिका ।
चित्रैरत्र वितानतः प्रविततैराभूतलालंबिभिः
प्रालंबैः सुमनःस्रजां जवनिकाशोभाभितस्तन्यते ॥ २० ॥
०२२ ॥

ततः प्रविशति सपरिजनो राजा ऋत्विजश्च ।

प्रतीहारः । सबहुमानमुपसृत्य । जयतु२ देव इति प्रणमति ॥

राजा । विरोचन समादिष्टं सूपकारपरिवेषिकाभिः ।

प्रती० । सप्रश्रयं । संपादितः सकल एव स्वामिपादानामादेशः ॥

राजा । सानंदं । विरोचन विभावयामि । किमपि समधि-
काद्यमनसः प्रसक्तिः ।
न संगः साधूनां न च विपुलतीर्थानुसरणं
न सेवा देवानां न च विविधविद्याव्यतिकरः ।
अमंदा[नन्दा]य प्रभवति सतां चेतसि तथा
यथा वैतानोऽयं विधिरधिकरम्यः प्रतिपदं ॥ २३ ॥

पुरतो ऽवलोक्य ऋत्विजो निर्दिशन् राजा वसुंधरं प्रति ।
पश्य वसुभूते अत्र कर्माणि कथमिव प्रचरंति ।

ऋत्विजः । उग्रानेतान्विप्रता भूरिनाष्ट्रान्
विश्वास्याचै(? र्यैं)श्वकृपा शश्वदूतीः ।
तद् वृत्रहन् मामस्तुतः सुवर्षाम्
त्वं नो विश्वान पविना पाहि दाश्वन् ॥ २४ ॥

इति होमं नाटयंति ।

राजा । सहर्षं । अहो प्रथमसवनाह्वानगानादिध्वनिरयं मनः-
प्रमदमातनोति ।०

It ends : द्वैपायनः । राजन् श्रूयतां ।
निर्गत्य लाक्षागृहतः प्रदीप्तात् परोचनं(!) शांतिहविर्विधाय ।
गुप्तं चरंतोऽपि ममाज्ञयात्र प्राप्तास्त एते नृपपांडुपुत्राः ॥ ३६ ॥

राजा । सानंदं । भगवन् अनुगृहीतोऽस्मि संशयनिरासेन ।

द्वैपा० । अपि च ।
युधिष्ठिराद्यैरिह पंचभिस्तैरंशे किलायं मघवावतीर्णः ।
शची तवेयं तनया तदस्याः पंचाप्यमी संतु वरा नृवीराः ॥ ३७ ॥

राजा । सोपग्रहं । भगवन् किमनेन भगवता यावदेतद-
स्मत्कुलं कुरुकुलं च ।

या एताः श्रुतयस्त्वयैव भगवन् व्यस्ताः समस्तास्तु ता
या चान्या विविधात्मिका स्मृतिरियं युष्मादृशामुक्तयः ।
किं वातः परमस्ति मूलमपरं धर्मस्य तद्यज्जिरा
पंचैते पतयो मदीयदुहितुः पत्नी तथैषामिह ॥ ३७ ॥

इति द्रौपदीं करेण गृहीत्वा पंचभ्यः समर्पयति । आकाशे दुंदुभिध्वनिः पुष्पवृष्टिश्च । नीराजनप्रभृतिमंगलाचारश्च । युधिष्ठिरादयो द्वैपायनं प्रणमंति ॥

द्वैपा॰ । युधिष्ठिरं प्रति । किं ते भूयः प्रियमुपकरोमि ॥

युधि॰ । भगवन् अतः परमपि प्रियमस्ति ।

यल्लाक्षागृहवह्निना न दहनं मार्गे हिडिंबादिभिर्
यद्विघ्नस्य लवोऽपि न प्रतिहतास्ते ते बकाद्याश्च तत् ।
स्त्रीरत्नं यदवाप्तमेष सकलो युष्मत्प्रसादोऽथवा
पांडूनामुदयस्य मूलमतुलं नाथ त्वदीयाशिषा ॥ ३९(!) ॥

तथापीदमस्तु ।

पर्जन्योऽयं विधत्तामभिमतफलदामुर्वरीं भूमिपाला
भूयासुस्त्यक्तवैराः सततगतरुजः संतु [लो]का विशोकाः ।
शश्वद्विश्वंभरांतः प्रथितनवसुधासारमाधुर्यधुर्या
वर्या वाचः कवीनां सहृद[यहृद]यानंदमुल्लासयंतु ॥ ४० ॥

द्वैपायनः । एवमस्तु । राजानं प्रति । विधीयतां वैवाहिको विधिः ।

राजा । आदेशप्रमाणमिति निष्क्रांताः सर्वे ॥ द्वितीयोऽङ्कः ॥

समाप्तं चेदं पांडवाभ्युदयं नाम छायानाटकं । कृतिरियं महाकवेः श्रीरामदेवस्येति ॥ ॰संवत् १५२७ वर्षे फाचोत्र(!) शुदि १ शक्रे(marg. ॰नौ) लिखितं ॥ [GAIKAWAR.]

4188.

2353 c. Foll. 9 (one of which, fol. 2, is wanting); size $9\frac{3}{4}$ in. by $4\frac{3}{4}$ in.; fair, somewhat cursive, Devanāgarī writing, of 1574 A.D.

Dūtāṅgada, a short dramatic composition (*chāyānāṭaka*)—in which the ape *Aṅgada,* the son of *Bālin,* is despatched by *Rāma* to *Rāvaṇa* to demand the surrender of *Sītā*—by *Subhaṭa.*

It begins: पायात्स वः कुमुदकुंदमृणालगौरः॰ नीव्यो (काञ्च्यो ed.) भवंति शिथिला जघनस्थलीषु ॥ १ ॥॰ See Aufrecht, Cat. Bodl., nos. 276–278.

The little work has been edited in the *Kāvyamālā,* no. 28 (1891). According to the editors, the author (like *Hemacandra*) flourished under *Kumārapāladeva* of Gujarāt (1088–1172 A.D.), in whose honour this work was composed.

The missing leaf contained from (वसं)तोत्सवे (ed. p. 2, l. 7) to वि गले (p. 5, l. 11). The discrepancy in the number of *ślokas* seems chiefly owing to some of the verses (esp. Prākṛit ones) not being numbered in the MS. There are, however, considerable differences of reading.

It ends: रामस्त्वयोध्यामभ्यागच्छन् लंकारणभुवं निदर्शयन् पुष्पकाधिरूढः सपरिवारः स्वयं च सीतां प्रति । अत्रासीत्॰ कंठाटवी ॥ ४६ ॥

इति नवरसगीर्भिर्जानकीं प्रीणयन्वः॰ प्रकटितबहुभद्रः क्षुद्रसंहर्त्तिकीर्त्तिः(! सर्वदा रामभद्रः ed.) ॥ ४७ ॥

स्वनिर्मितं किंचन गद्यबंधं कियत्कियत्प्राक्तनसत्कवीन्द्रैः ।
प्रोक्तं प्रगृह्य प्रविरच्यते स्म रसाढ्यमेतत्सुभटेन नाट्यं ॥ ४८ ॥

इति श्रीकविसुभटेन विरचितं दूतांगदं नाम छायानाटकं समाप्तं ॥ शाके दलवशकेतु १४९६ नभस्ये मासि शुक्लके । उदयाकरेणालेखि नाटकं दशमीगुरौ ॥

[GAIKAWAR.]

4189.

1520 e. Foll. 13; size $10\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; good Devanāgarī writing, of 1584 A.D.; 12–14 lines in a page.

Dūtāṅgada, in a different recension from that of the preceding MS. and the printed edition, but likewise attributed to *Subhaṭa.*

Not only is the dialogue itself considerably extended in this version by the insertion of many additional stanzas, but narrative verses also are thrown in, calculated to make the work a curious hybrid between a dramatic piece (with stage directions) and a narrative poem. This latter character of the composition is rendered still more pronounced by an introduction of 39 (12 + 27) stanzas in mixed metres

(partly, however, placed in the mouths of *Rāma* and *Hanumat*), referring to incidents which lead to the discovery of *Sītā's* hiding-place.

On the first 9 leaves of the MS. numerous marginal and interlinear notes in Gujarātī have been added, which have, however, suffered a good deal from wear along the edges.

It begins :

कौशल्यालसदालवालजनितः सीतालतालिंगितः
सिक्तः पंक्तिरथेन सोदरमहाशाखाभिरभ्युन्नतः ।
रक्षस्तीक्ष्णनिदाघपाटनपटुश्छायाश्रियानंदकृद्
युष्मद्वांछितसत्फलानि फलतु श्रीरामकल्पद्रुमः ॥ १ ॥
उद्धर्तासौ धरित्रीभरमिति भुजगाधीश्वरो वंशवृद्धिः
संवृत्तेत्यंशुमाली दलितपरिभवा भाविनी द्यौरितींद्रः ।
हर्षोन्निद्राननश्रीरजनिजनिदिने यस्य लक्ष्मीवयस्यः
सोऽयं वः सर्वकालं सफलयतु मनःकामनां रामनामा ॥ २ ॥
कूर्मः पादोऽस्य यष्टिर्भुजगपतिरसौ भाजनं भूतधात्री
तैलापूराः (? तैलोत्पूराः) समुद्राः कनकगिरिरयं वृत्ति-
वृत्तिप्ररोहः (? वृत्तवर्ति°) ।
अर्चिश्चंडांशुरोचिर्गगनमलिनमाकज्जलं दह्यमाना
शत्रुश्रेणी पतंगा जयति रघुपते त्वत्प्रतापप्रदीपः ॥ ३ ॥ °१२ ॥
आ द्वीपात्परतोऽप्यमी नृपतयः सर्वे समभ्यागताः
कन्येयं कलधौतकोमलरुचिः कीर्तिश्च लाभो ऽपरः ।
नाकृष्टं न च टंकृतं न नमितं नोत्थापितं स्थानतः
केनापीदमहो महाधनुरिदं वानीरमुर्वीतलं ॥ १ ॥ °
यद्बभंज जनकात्मजाकृते राघवः क्षितिपतेर्महद्धनुः ।
तद्धनुर्गुणरवेण रोषितस्त्वाजगाम जमदग्निजो मुनिः ॥ ८ ॥

राम उ°। भो ब्रह्मन् भवता समं न घटते संग्रामवार्तापि नः
सर्वे हीनबला वयं बलवतां यूयं स्थिता मूर्धनि ।
यस्मादेकगुणं शरासनमिदं सुव्यक्तमुर्वीभुजाम्
अस्माकं भवतो यतो नवगुणं यज्ञोपवीतं बलं ॥ ९ ॥ °

हनुमानुवाच रामं प्रति ।
दृष्टा सा जनकात्मजा रघुपते युष्मत्प्रसादान्मया
लंका नाम पुरी समुद्रजठरे तत्रास्ति वीरप्रभो ।
राहुग्रस्तनिशापतेरविकला लावण्यहीनप्रभा
सीता जीवति हे नु किं वद सखे रामामृतं मानसं ॥ २७ ॥

अथ दूतांगं ॥ श्रीरामाय नमः ॥
रमंते योगिनो यत्र नित्यानंदे चिदात्मनि ।
इति रामपदेनाशौ (°सौ) परब्रह्माभिधीयते ॥ १ ॥
रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ।
रामान्नास्ति परायणं मम परं रामस्य दासो ऽस्म्यहं
रामे चित्तलयः सदा भवतु मे हे राम मां मा त्यज ॥ २ ॥
पायात्स वः कुमुदकुंदमृणालगौरः° ॥ ३ (ed. *śl.* 1) ॥
शंभोः कोदंडभंगादविदितविभवः° ॥ ४ (ed. 2) ॥
येनोल्लंघ्य तरंगिणीपतिमसुं दुर्वारशाखामृगैर्
हत्वा राक्षसपुंगमेवमपरा प्रावर्तिताम्भसयो ।
सिंधुर्मानं विधित्सया जलनिधेरुल्लंघनं मार्गितः
दूतो वालिसुतः कृतो रिपुजये रामः सदा पातु नः ॥ ५ ॥

सूत्रधारः मुख्यनट° । विश्वविश्वंभरासमुद्धरणादिवराहस्य°
महाकविना सुभटेन निर्मितं दूतांगदं नाम छायानाटकं
भवतां पुरो ऽभिनेतव्यं मया ।
अत्रैव धर्मविधिरत्र पतिव्रतात्वं
सौभ्रातृता च निखिला गुरुभक्तिरत्र ।
वाल्मीकिना कविवरप्रवरेण गीते
रामायणे वदत केऽत्र गुणा न संति ॥ ७ (!) ॥
तारापतिं वानरराजलक्ष्मीं° ॥ ८ (ed. 3) ॥
तारा रुमा हरिपतिं रविजं विधाय
हत्वा पुरंदरसुतं बलिनं शरेण ।
बद्धार्णवं दाशरथिः स देवः
सुवेलशैलोपवनेषु रम्ये (? रेमे) ॥ ९ ॥

रामः। लक्ष्मणं प्रति ।
तीर्णोऽर्णवः कवलितेव कपीश्वरस्य° ॥ १० (ed. 4) ॥

लक्ष्मणः। आर्य श्रीराम कातरमनोऽवलंबिना दैवेन किं ।
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः° ॥ ११ (ed. 5) ॥
यावल्ललाटशिखरं° ॥ १२ (ed. 6) ॥
जयति भृगुवंशतिलकः प्रथमकविर्द्विजवरः स वाल्मीकिः ।
मृदुललितपदनिबद्धं कृतमिह रामायणं येन ॥ १३ ॥
जयति रघुवंशतिलकः कौशल्याहृदयनंदनो रामः ।
दशवदननिधनकारी दाशरथिः पुंडरीकाक्षः ॥ १४ ॥
तीर्णोर्णि ॥ ° ॥ (!)
तद्दुर्लंघ्यमलंघयज्जलनिधिं सर्वप्लवंगैः समं
तीरे वारिनिधेर्निवेश्य सकलं सैन्यं ततो राघवः ।
कर्तुं कोणपशोणितैर्जलनिधिं प्राहाप्रमं लक्ष्मणं
दिव्यं गृह्य धनुः शरं च परमं वैरीवधे दीक्षितः ॥ १५ ॥
यावल्ललाट ॥ ° ॥ (!)
संदिश्यतां रघुपते त्वय विग्रहस्य संधेः° ॥ १६ ॥
यो वाली राक्षसं तं त्रिभुवनभयदं दुर्जयं° ॥ १७ ॥

तदादिश्यतामंगदाय दौत्यं ॥

सबहुमानमवलोक्य ऋंगदं श्रीरामः। वत्स ऋंगद।

पिता ते यद्वालो° ॥ १८ (not numbered in MS.; ed. 7) ॥

ऋंगद उवाच। किं प्राकारविहारतोरणवतीं लंकाम्° ॥ १९ (MS. १८; ed. 8) ॥

राम उ°। ऋंगद रावणं प्रति गत्वा इति निवेदय।

ऋज्ञानादथवाधिपत्यरभसाद्° ॥ २० (MS. १९; ed. 9)॥

रामस्य वचनं श्रुत्वा वालिपुत्रो महाबलः।
उवाच वाक्यं मेधावी राघवं हरिसंनिधौ ॥ २१ ॥

ऋंगदः। किमेतत्। संधौ वा विग्रहे वापि° ॥ २२ (ed. 10) ॥

Besides the introduction, the MS. contains 138 verses (as against 56 of the edition); but the total number is still larger, owing to several verses, apparently considered as mere variants of the same, being sometimes counted as one, e.g., after *śl.* 104, beginning जन्म ब्रह्मकुले°, two others are given, beginning in the same way, and the next verse (105) being then (like the verse before the colophon) actually introduced by पाठांतरं। सा हंचर्ये(? हर्म्ये) रामभद्रे सचटु° ॥

Whilst verses 132 and 138 (the last) of this version correspond to vv. 49 and 54 of the edition, the intervening verses are quite different; nor are the last two verses of the edition found here. It ends:

बाल्ये येन हता सुकेतुदुहिता भग्नं धनुः शांभवं
स्वर्गावासगतिः क्षता भृगुपतेर्गुर्वाज्ञया मेदिनी।
त्यक्ता वालिरपि क्षतः कपिपतिं सुग्रीव एवाकरोत्
पौलस्त्यं विनिहत्य येन युगपल्लंकेश्वरोऽहं कृतः ॥ १३७ ॥

त्वां पौलस्त्य निहत्य यस्त्वदनुजं कर्ता स लंकेश्वरं॥१३७ (!)॥

पाठांतरं। अत्रासीत्फणिपाशबंधनविधिः° कृत्ता च कंठावली॥१३८।

इति सुभटेन विरचितं दूतांगदं नाम नाटकं समाप्तं ॥ सं १६४१ वर्षे १५०५ प्रवर्तमाने पुस्तकलिखितं व्यासमहं कालतमु मथुरादासु॥

The remaining space on the last leaf is filled up with miscellaneous verses (beginning ऋ: किं सुंदरि सुंदरं न करोषि), written by two different hands. [H. T. Colebrooke.]

4190.

607 a. Foll. 51 (one of which, fol. 3, is wanting); size 10 in. by $3\frac{3}{4}$ in.; clear Devanāgarī writing, of 1666 A.D.; six lines in a page.

Nandighoshavijaya, or *Kamalāvilāsa*, a dramatic entertainment, in five acts, on incidents connected with the religious festival of the '*rathayātrāmahotsava*,' or procession of *Purushottamadeva's* car; composed by *Śivanārāyaṇa Dāsa*, son of an *ambashṭha* (? *Dūrgādāsa*), in honour of his patron, *Gajapati Narasiṃhadeva*.

It begins:

फुल्लत्पंकजतां स्मितांभसि रमावक्त्रामृतांशौ परि-
स्फीते चारुचकोरतां दिविषदां हृत्पुंडरीकेऽर्कतां।
दैत्यस्तोमवनीषु दारुणदवोद्दामक्रियापाटवं
बिभ्रत्कौस्तुभभूषणस्य नयनं पायादपायाज्जगत् ॥ १ ॥

ऋपि च।

लावण्यांबुतरंगिणी तरुणिमप्रागल्भ्यकेलिस्थली
पुष्पेषोर्निशितानि विजयीन्यस्त्राणि कांतेः सभा।
भाग्यं नंदयशोदयोर्व्रजवधूप्राणा जगन्मंगलं
मूर्तिः पातु जगंति वासवमणिः श्यामाभिरामा हरेः ॥२॥

ऋपि च।

यद्यप्यस्ति समस्तवस्तुषु तथाप्येकांतभक्तेच्छया
लीलोत्पत्तितनौ तनौ तु दधतं सृष्टिक्रियासाधनं।
पार्थायोपदिशंतमौपनिषदं तत्त्वं स्वरूपोदयाद्
दूरोन्मूलितमायमर्जुनसखं ध्यायेम मध्येरथं ॥ ३ ॥

नांद्यंते सूत्रधारः। ऋलमत्यलौकिकचमत्कारसंभारशालिनि परामर्शानधीने वस्तुनि वाचां प्रपंचेन। किं च सांप्रतमहं श्रीमत्सात्वतगणहृत्कमलांतरुज्जृंभमाणलावण्यसंतानवि-द्रावितद्रावितशुनासीरमणिमांसलमरीचिनिचये त्रिलो-कीलोकोपजीव्यकरुणावरुणालये पुंडरीकालयपांडुर-गंडकपालीकंडूयनतांडविताधरपुटपटुसंचारपंडिते भग-वति जगतीपरिवृढे ऋहर्निशनिर्वासिताशेषवासना-विषयिगणानुगम्यमानचेतोवृत्तिसंतानसंविधीयमानता-दृग्वासनानुसंधीयमानसपर्यापर्यायसोदरीकृतनृगनहुषभ-रतभगीरथांबरीषपर्यंकांतनिर्व्यूढपर्यंकबंधविश्रांतकीर्तेः

प्रतिपक्षवक्षःकपाटपाटनाविर्भूताभिनवनरसिंहमूर्तेर्गजपतेर्नरसिंहदेवस्य—[this name has been supplied by a different hand* at the beginning of four lines daubed over with yellow pigment at the end of fol. 2*b*, and beginning of fol. 4*a*; the expunged passage (which did not contain that name) having originally ended with तस्य श्रीमन्महाराजकुमारस्य]—वपुष्मद्भिर्निगमैरिव प्रत्यक्षतां गताभिः स्मृतिभिरिव स्वीकृताकृतिभिर्दंडनीतिभिरिव दर्शनविषयमुपेतैर्दर्शनैरिव मुखैरिव काव्यालंकारनाट्यस्य भाजितसभाजिरैः सभास्तारैरादिष्टोऽस्मि । यत्तस्य जगतीजनमनोनयनमहोत्सवस्य करुणाकटाक्षपातपरिभावितैहिकामुष्मिकभावुकेन शिवनारायणदासाभिधेनावष्टमूनुना तदाज्ञया विनिर्मितं नंदिघोषविजयाख्यनाटकमभिनेतुं । अतः सहधर्मिणीमाहूय संगीतकमनुतिष्ठामि ॥ परिक्रम्य नेपथ्याभिमुखमवलोक्य किंचिदाकर्ण्य पुनरपवार्य । अये प्रिया समाहितेन चेतसा किमप्यद्भुतं गायति । तदत्रैवावस्थाय तूष्णीमाकर्णयामि । तथा करोति ।

नटी गायति ।

आणंदामिअपुंजो रेअइ· णीलाहिकुंजम्मि ।
सुत्तामशिला कपणो जलभ्भइअमेहदो मसिणो ॥ १ ॥
आनंदामृतपुंजो राजते नीलाद्रिकुंजे ।
सुत्रामशिला कृष्णः जलभरितमेघतो मसृणः ॥ १ ॥ ०२ ॥

सूत्र०। आकर्ण्याभिसृत्य । प्रिये किं तावद्गायसि ॥

प्रविश्य नटी। सलज्जाह्लादं। अज्ज न किंपि अणं ०३ ॥ ०४ ॥

सूत्र० । प्रिये एवमेतत्कः संदेहः ।

धाम्नि ब्रह्ममये निरंतरचिदानंदामृताम्भोनिधौ
प्रत्यग्ज्योतिषि योगिनामपि मनो ध्यानैकतानोत्तरं ।
यस्मिन्नस्तमुपेत्य न व्यवसितं धत्ते पदव्याकुलम्
अक्ष्णोर्गोचरमेतदभ्रकुसुमं कुर्वंत्यमी किं जनाः ॥ ५ ॥०

Then, hearing two persons speak behind the scene:

मृ० । एतौ देव्याः कमलायाः किंकरावपरोधकौ मयामर्षामयत्या वैदग्ध्यघोषभाषया स्मारितरथयात्रामहोत्सवेनाभ्यर्णसंभावितेन जनितोद्वेगौ रोषादिहैवागच्छतः। तदिदानीमस्माकमितोऽपसरणमेव श्रेय इति निष्क्रांतौ ॥

प्रस्तावना ॥

Act I. *Abhisheka.*—*Brahman* tells *Jaya* and *Jayā* the traditional story of king *Indradyumna* and his pilgrimage to the *Nilādri* and the *Purushottamakshetra* (cf. nos. 3627, 3711), whither *Purushottama* (*Vishṇu*), according to his annual custom, has now again betaken him-elf, thereby arousing *Kamalā's* (*Lakshmī's*) displeasure. *Citraratha* and *Urvaśī* also appear, sent by *Indra* to inquire after the goddess.

II. *Kamalāviraha.*—*Vimalā* tells *Nārada* and *Virajā* the circumstances regarding the estrangement of the divine couple; the goddess having become jealous of the '*yajñavedi*,' looked upon by her as her '*sapatnī*.'

III. *Punarāvirbhāva.*—The *devī*, in her apartments, attended by *Jayā*, is lamenting her fate. The *rishi*, with *Vimalā* and *Virajā*, having pacified her, she asks to be taken to her lord.

IV. *Rathavijaya.*—*Viśvāvasu* and *Menakā*, having been sent by *Viriñci* to see that everything is ready for the festival, describe the incidents connected with it, as witnessed by them. Then enters king *Narasiṃhadeva* with his spiritual guide (*Rājaguru*) and his ministers to do homage to *Purushottama*.

V. (? *Kamalāvilāsa* or *Nandighoshavijaya*).—*Viśvāvasu* and *Menakā* witness and describe the subsequent ceremonies. *Kamalā* appears and receives homage from the king (acting as the god's *pratinidhi*, or *pratimūrti*); whereupon she becomes satisfied with her consort's doings, saying (fol. 46*a*): तत्राधिष्ठितायां मयि का शक्तिर्निर्वाणवितरणे यज्ञवेद्याः ॥

* It had, however, in the first place been supplied by a second (neat) hand in the lower margin of fol. 2*b* as to be inserted after नरसिंहमूर्तेः, but has been daubed over along with the two bottom lines (doubtless in order to disguise the gap caused by the loss of fol. 3), after which it was written in again by a third hand; a ३ having also been added on fol. 2*b*.

With one or two exceptions, the Prākṛit passages are followed by their Sanskrit versions. Only the minor female characters (but neither *Kamalā* nor *Virajā* and *Vimalā*) speak, however, in Prākṛit.

It ends : तथापि तदस्तु यथा भरतेन गीतं ।

असितमणिमरीचिवीचिसंग-
स्फुरदधिशंपमकंपमिंदुबिंबं ।
विकसितसरसीरुहांकभृंगी-
व्यतिकरमुग्धमपायतः पुनातु ॥
स जयति पुरुषोत्तमः स रामः
कमलमुखी कमला च सा सुभद्रा ।
जयतु नरपतिः प्रजाश्च सर्वा
द्विजवृषभाश्च निरीतयो भवंतु ॥

अपि च ।

भक्त्या विष्णुं हृदि परिचरन् मोदयन् सन्मनांसि
श्रांतिं धुन्वन् सुरविटपिनां बाष्पयन्वैरिकांताः ।
नीतिं धर्मे ऽनिशमुपनयन् वर्धयन् राजलक्ष्मीं
वैरिंचाब्दं भुवि विजयतां केसरी सिंहवीरः ॥

इति नंदिघोषविजयनाम्नि नाटके पंचमोंकः ॥ समाप्तश्चायं ग्रंथः ॥ संवत् १७२३ ॥ फाल्गुणे कृष्णपक्षस्य समायां भौमवासरे । लालाभिधेन लिखितं मुदे भवतु धीमतां ॥

The leaves are marked कम° ; and the reverse of the last leaf contains the (Nāgarī) title *śrī-Kamalāvilāsa-nāṭakam.* [H. T. Colebrooke.

4191.

99. Foll. 35 ; size 10⅝ in. by 4½ in. ; modern Devanāgarī writing (Nepalese paper) ; 8 or 9 lines in a page.

Hāsyārṇava, a comedy in two acts, by *Jagadīśvara.*

It begins : स्वेदस्यंदितसांद्रचंदनचयं°, cf. Wilson, Theatre of the Hindus, ii., p. 408 ; Sylvain Lévi, Le Théatre Indien, p. 253 ; Cat. Bodl., nos. 311, 312.

The MS. is incomplete ; the first act ending on fol. 34*b* : इति हास्यार्णवे सभानिर्णयः प्रथमोंकः ॥

Editions of this farce were published at Calcutta, in 1835 and 1872.

[B. H. Hodgson.]

4192.

607c. Foll. 19 ; size 10 in. by 3½ in. ; careless, modern Devanāgarī writing ; 8–10 (mostly 9) lines in a page.

Hāsyārṇava-prahasana, a complete, but poor copy. [H. T. Colebrooke.]

4193.

3281. Foll. 32 ; European foolscap paper (water-mark 1811), 13 in. by 8 in. ; twenty lines in a page.

Hāsyārṇava, the text written out on one side as for publication, with an English translation on the opposite side.

The latter begins :—"A Bráhman pronounces the benediction : May the copulation of the husband of *Mridani* with *Parvati* be for the happiness of the voluptuous—"

The Sanskrit translation of the Prākṛit passages is not given. [H. H. Wilson.]

4194.

2388. Foll. 134—of which are wanting foll. 4, 6, 7, 50, 51, 56, 57, 65, 66 (but 67 double), 69, 90–92, 99, 115–117, 126, 128, 133–135 ; size 9 in. by 4 in. ; fair, large Devanāgarī writing, of about 1700 A.D. ; seven lines in a page.

Gaṅgadāsa-pratāpavilāsa, a drama, in 9 acts, on certain incidents in the life of king *Gaṅgadāsa Bhūvallabha Pratāpadeva*, of Campakapura (i.e. Campānīr, with its hill-fort, the Pāvadurga or Pāvakadurga) in Gujarāt ; composed by *Gaṅgādhara.*

It begins: श्रीमहामाया काली ॥

श्रीमत्संतोषजननी जननी जगतां परा ।
परापरगिरं दद्याद्यानंदमयी मम ॥ १ ॥

उद्यत्कालीकटाक्षावलिचलनचलल्लोचनापांगरंगः
क्रुध्यद्दैतेयमुक्तागतशरनिकरच्छेदिवाणप्रयोगः ।
मौलच्छृंगारवीरस्फुरितभुजयुगोल्लासिरोमांचितांगः
संधाने सावधानस्त्रिपुरनृपजयी पातु गंगेश्वरो वः ॥ २ ॥

विश्वामित्रातिविघ्नाध्वरहरविहरद्यामिनीचारहारी
सीताशृंगारलीलांकितभुजविलसत्कार्मुकज्याकृतांकः ।
पारावारांतरुत्तारितदृषदतुलस्फीतसन्नीतकीर्तिर्
लंकेशातंककारी स जयतु भुवने रामनामावतारः ॥ ३ ॥

नांद्यंते सूत्रधारः । परितोऽवलोक्य । अहो भूमंडलमाखंडलपुरं संप्रति विजिगीषतीति भाति । यतः ।

इह हि विबुधाधारः पावः सुरालयभूधरं
जयति कनकोन्मादं भूभृद्विविक्तसुवर्णभूः ।
कुलसुखकृता युक्तः पत्या स गोत्रभिदा युतं
स्थिरतरलसद्गंगासंगो विनिर्गतजह्नुजं ॥ ४ ॥

निवसति महाकाली यस्मिन्कुतूहललालसा
निजमनु कलान्यासैरेतन्नृपेण विभाविता ।
सितगिरिमपि त्यक्त्वा प्रातः प्रियाविरहासहो
विलसति महादेवो ऽप्यस्मिन् गणावलिमंडितः ॥ ५ ॥

व्यरचि किमयं धात्राधारः प्रयासवतावता
सकलवसतिर्ब्रह्मांडस्य स्वभावमहान् गिरिः ।
उपरि च तले मध्ये यस्मिन्निवासवतां नृणां
त्रिभुवनजनप्राप्यं सौख्यं सदापि ददाति यः ॥ ६ ॥

कुवलयदलश्यामः कामं पुरा यदजीजनत्
कुवलयदलश्यामः कामं वधूनयनांचलः ।
जनयति गिरेरस्योपांते स्थिते पुरचंपके
तदुचितमहो लज्जां नैति स्वयं जनयन् रतिं ॥ ७ ॥

अपि च। एते चंपककामिनीपरिलसद्धम्मिल्लमल्लीमिलच्-
चांपेयप्रबलस्फुरत्परिमलस्वीकारतत्तुंदिलाः ।
पीत्वा वारि शरत्प्रसन्नसरसां पावाचलारोहण-
प्रत्यारोहणजातखेदहरणा वांतीह मंदानिलाः ॥ ८ ॥

०१४ ॥ . . . the lost leaf 4 contained from the latter part of *śl.* 10 to the beginning of *śl.* 14.

पटाक्षेपेण विदूषकः । अहो सच्चं सच्चं ।

सोत्ताणं वसणं कत्था वि मइणं माणं पहूणं णवा
णो वंगम्मि रसस्स मे ण जणिअं से संवु कंवुप्पहं ।
लंवत्तंनपणहयं मम हिमं मज्झंमि णो दीसये
ता भूमितलजोसिआ ण विबुहत्पीणं महिच्चंतरं (!) ॥

सूत्रधारः । अहो कस्त्वं मध्येमर्म प्रमर्म परिहससि ॥

विदूषकः । परिहासभट्टोऽहं तुहे वुत्तं पञोमि ।

सूत्रधारः । ध्वनिना विपरीता प्रतीतिर्जायते । ० . . (foll. 6 and 7 wanting, containing *śl.* 15–21) . . ०२३ ॥

कुर्वन्नुद्यदवादमुद्यतमहायादं सवार्थं व्वलत्
प्रोतापारपुरं पुरंदर इवानीकं सुरद्वेषिणां ।
यल्लात्पाणितुरुष्कलोकयनितावक्षोजयाद्यप्रतं
निस्त्राणप्रतिवादिनं समकरोत्कौतूहलेनैव यः ॥ २४ ॥

देशान् गूर्जरभूमिपस्य महसा यो लीलयैवाग्रहीद्
यः संग्रामसभातले ऽतिविमतान् भूमीपतीन्व्यग्रहीत् ।
यो ऽयोनंत्र समग्रहीद्रहुतरानर्थिव्रजान् रक्षितुं
यो वैरिक्षितिपव्रजैः सह भुजोत्कंपादलं व्यग्रहीत् ॥ २५ ॥

यन्निस्साणरणाद्रणादपगतः स्वप्राणनिस्तारणं
प्राप्तः स्वांगुलिचर्वणं न चरणं यगद्गतः कारणं ।
कृत्वा दुस्तरदुर्गमादिचरणं संत्यज्य सद्वारणं
जप्त्वा दुष्करणं स गूर्जरसुरत्राणः कथं प्राणिति ॥ २६ ॥

तत्कीर्त्या भुवनत्रये धवलिते शोणादिवर्णोज्झिते
संध्याताडवमस्मरन्पशुपतिर्गौर्या सदा संगतः ।
तस्मात्प्रीतिमतोयमत्र नृपतौ श्रीगंगदासाभिधे
मामादिशदमुष्य नाट्यविषये तेनाहमत्रागमं ॥ २७ ॥

तदहमनेकानवद्यमंत्रविद्योपासनासमासादितसर्वसपर्यैरार्चार्यवर्यैः० विराजमाने श्रीमन्महाकालीप्रासादपुरोवर्तिनि सभातले ऽस्मिन् सुखासीनं शरत्समयसमुचितदेवीपूजनाय समागतं सकलराजवर्गं गंगाधरकविरचितगंगदासप्रतापविलासनामनाटकाभिनयेन परितोषयामि ।

गंगाधरकविकविता चरितं श्रीगंगदासभूपस्य ।
वयमपि नाट्ये कुशलाः किं संतोषकरं नात्र ॥ १ ॥

विदूषकः । को सो कई जस्स कव्वेण संतोसो भोदि ।

सूत्रधारः । तस्य गुणवर्णनपद्यं नाकर्णितं । तस्य विरुदपद्यं त्वया नाकर्णितं ।

विदूषकः । तइ मह कहं किं न सावरसि ।

सूत्रधारः । शृणु ।

तरङ्गातुंगाकुलतरतरंगातुलवचो-
मणी रंगासंगादमृतरसशृंगारिततनुः ।
मधूत्संगी भृंगालसलसदनंगारितरुणी-
दृगासंगाभं गायति रचयति गंगाधरकविः ॥०

नेपथ्ये । अलंक्रियतामलंक्रियतां पुरं ।

कुर्वंतु प्रतिवीथि मार्जनविधिं पद्मानि मुक्ताफलैर्
माणिक्यैरभितो लिखंतु सुधया लिंपंतु सौधानि च ।
बध्नंतु प्रतिमंदिरं प्रतिपुरद्वारं पताकावलीर्
वादित्राणि च वादयंतु नगरे नृत्यंतु वारांगनाः ॥ १ ॥

चूलिका ।

विदूषकः । ससंभ्रमं विलोक्य । भाव महूसवसंभमाकलिदो को एसो आअच्छदि ।

सूत्रधारः । मारिष अयं किल राजसचिवो देवीमहोत्सवसंनाहाय पुरपालकानाज्ञापयति । तद्वयमप्यभिनयोचितनेपथ्यग्रहणाय व्रजामः ।° इति निष्क्रांतौ । प्रस्तावना ॥

ततः प्रविशति राजसचिवो हरिदासः । यथा ।

स्फायत्प्रोज्ज्वलकंचुका° ॥ २ ॥

सचिवः । उच्छ्वस्य सानंदं ।

धैर्यैकपद्यां चलतामभिमानवतां नृणां ।
करावलंबनं दत्ते दैवं साहसिनां स्वयं ॥ ३ ॥

कथमहह पंचत्रिंशत्कुलराजकन्यकाव चाहुआणकुलप्रदीपस्य हठहंमीरस्य मम स्वामिनो भोगींद्रस्य मस्तकरत्नमिव कन्यारत्नमभिलपतो महंमदमहासुरत्राणस्यापमानना स्वभुजबलेनैव मत्स्वामिना समकारि । तत्र संगरैकांगवीरस्य स्वप्रभोर्भुजसामर्थ्यमजानता मया सचिवबुद्धित्वात्सचिंतेनास्यापि यावज्जावन्मंडपसुरत्राणेन गूर्जरसुरत्राणपूर्वद्वेषिणा ऽस्मत्सहायत्वमंगीकृत्य भामापत्रं प्रेषितं । तद्रात्रौ देवीव्रतनियमवत्याः प्रतापदेव्या मंदिरे देवीपूजनसामग्रीं विलोकयतो महाराजस्याग्रे मया वाचितं । तदभिनंदितं देव्या स्वीकृतं च महाराजेन ।

तन्मन्ये श्रीमहाकालीसेवया सुस्थिरीकृतं ।
गंगदासमहीजाने(? °पेन) राज्यमाचंद्रतारकं ॥ १ ॥

तदधुना देवतायात्राभिमुखस्य महाराजस्याज्ञया देवतायजनसामग्रीसहितमित एवायांतं पुरोहितं देवतालयं पुरः प्रस्थापयामीति निष्क्रांतः ॥ विष्कंभकः ॥

ततः प्रविशति पुरोधाः पुरो धावंतः कंबलकमंडलुपूजोपकरणकरा बटवश्च । यथा ।

प्रातःस्नानपवित्रगात्रविलसत्प्रक्षालितप्रोल्लसद्-
धौतस्फारितयज्ञसूत्ररचनो दर्भप्रगल्भांगुलिः ।
गोपीचंदनचर्चितालिकजितादित्यप्रभामंडलः
कर्णांदोलितकुंडलः समयते राज्ञः पुरोधा इह ॥ १ ॥

पुरोहितः । पुरो ऽवलोक्य । ओं

नमो देव्यै महादेव्यै शिवायै सततं नमः ।
नमः प्रकृत्यै भद्रायै नियताप्रणा(?°तम्प्रणताः) स्म तां ॥१॥

इति नमस्करोति । पुरोहितः । विलोक्य ।

एषा सा जगदंबिका विजयते काली कपालिप्रिया
देवीभिर्नवकोटिभिः परिवृता युक्ताभितो भैरवैः ।
एतां मंत्रमतांगभूतहवनैराराधयामो ऽधुना
येनासौ यवनाधिपं युधि जयेच्छ्रीगंगदासो नृपः ॥ १ ॥°

Act II. (beg. fol. 16*b*). The king enters, with the *vidūshaka*, to attend the *homa* and the festive performances. For the latter the chief actor introduces himself :—

नाट्यकारः । नाट्यरसिको नाम नाट्यकारो ऽहं ॥

राजा । कुतो देशादागम्यते ॥

नाट्यकारः । कर्णाटात् ॥

राजा । तत्र किमपूर्वमत्रागमने च किं कारणं ॥

नाट्यकारः । आकर्ण्यतां । पूर्वपश्चिमदक्षिणसमुद्राधीश्वरे हयपतिगजपतिनरपतिरायसुवर्णपुत्तलीकितवामचरणविरुद-तोडराईबरे महाराजाधिराजराजपरमेश्वरे राजकठारीत्रिनेत्रे(!) राजगजबेटकारे रिपुराजगजगंडभेरुंडावतारे विजयनगरीपुरंदरे श्रीमत्प्रतापदेवराजे महेंद्रसभालंकारे सति तत्कुमारेण श्रीमल्लिकार्जुनराजेन साम्राज्यसिंहासनमधिष्ठितं । तदाकर्ण्य दक्षिणसुरत्राणेन गजपतिना च पूर्वपराभूताभ्यामुभाभ्याममितहयगजपदातिभ्यां संभूयाभिषेणनमकारि । विजयनगरमावृत्य स्थितं तावदसहमानो गजबलं मृगेंद्रशाव इव गिरिकंदरात् विजयनगरतः श्रीमल्लिकार्जुनराजो बहिर्निर्गत्य निशिततरकरवालधाराजलप्रवाहवाहिनीपूरे हयपतिगजपतिसैन्यमशेषममज्जयत् । गजपतिः स्वदेहमात्रावशेषः पलाय्य निरगाद् यवनपतिश्च । तदनंतरं श्रीमल्लिकार्जुनराजेन रणद्यूतविजितान्हयगजान् सकलमहीमंडलकलावत्करकमलसात्कृतवता तस्यामेव वेलायां निजजनकेन श्रीप्रतापदेवराजेन दिव्यरत्नरचितकटककुंडलहारकनकदंडचामरयुगलमौक्तिकच्छत्ररिपुराजगजगंडभेरुंडनिजविरुदपदकहयगजनरपतिराजकविपुत्तलीकिते(°तं) बिरुदतोडरं दत्त्वा निजकीर्तिजगंगाया भगीरथीकृत्य सन्मानितरुचिरांगधरो(संमा°) ऽनवद्यविद्याबलेन दिग्विजयाय यातः संप्रति क्वास्त इति पृष्टं । तदा तदानीमेवोत्तरदिगंतरालात्समागतेन केनचिद्वैतालिकेन महाराजस्य कीर्तिमाहिमाचलं कृत्वा द्वारकायां विधायाह्मदाबादनगरे गूर्जरसुरत्राणस्य महाद्वारे वामचरणे बिरुदतोडरं निधाय सभाकोविदान्मूकीकृत्य षण्मासानुषित्वा ततो निर्गम्य

पावाचलाधीश्वरं चंपकपुरपुरंदरं श्रीगंगदासभूवल्लभं द्रष्टुं समागतः। तत्र श्रीगंगदासभूवल्लभेन लोकोत्तरविद्योर्जितां कवितां विलोक्य संतुष्टेन बहुमानदानैः परितोष्य मच्चरित्राभिनयनाटकं भवता विधेयमित्युक्तः करोमीति स्वीकृत्य लोकोत्तरं नाटकमकार्षीत्। तदद्भुतमाकर्ण्य गंगदासभूवल्लभो बहुकनकरत्नैरापादतलमस्तकं तमापूरयत्। अस्य नाटकस्याभिनयं कर्तुं कश्चिन्नाट्यकारः समागच्छेदिति राजा चिंतां करोतीत्युक्ते श्रीमल्लिकार्जुनराजेन साधु कथितमस्मच्चिंता दूरीकृतेति बहुदानपुरःसरं स वैतालिकः सन्मानितः(संमा°)। तदानीं तदास्थानस्थितेन रिपुनाट्यकारवारणमदनिवारणपंचाननेन मया तदाकर्ण्य तन्नाटकमहं नाट्यरसिकोऽभिनेष्यामीत्यत्र सोत्कंठमागतोऽस्मि। तावन्मम भाग्यगुणेन महाराजो ऽपि महाकालीमहामहोत्सवे कलाकुतूहलानि विलोकयन्नेव मन्नयनगोचरः समजनि। तदहं महाराजस्य युवराजत्वमारभ्य रूपकाभिनयाय नेपथ्याभिनयनाय गच्छामि। पश्यतु महाराजः। इति निष्क्रांतः॥

नेपथ्ये कलकलः।

नयति नयति मुग्धां राजपुत्रीं कुमारः
सितहय इव भद्रां सानुरागां सुभद्रां।
व्रजत व्रजत पश्चाद्वेगतः शस्त्रहस्ताः
कथमहह पुरस्तात्साहसी वीर एषः ॥ ४ ॥

सर्वे किमिदमिति सहसोत्तिष्ठंति।

राजा। तुरगस्तुरगस्तरवारिस्तरवारिः॥

अत्रांतरे प्रविशति तुरगाधिरूढो राजकुमारीसहितो युवराजः।

राजा। क एष नूतनवयाः कस्येयं कुलकन्यका।
मामेवायाति शरणं दातव्यमभयं मया ॥ ५ ॥

विदूषकः। वयस्स एसा खु कुलकणा तवेव रूवानुरूवा। ता एदं अपहरिअ अंतेउरे कीस न करेसि।

राजा। धिग्मूढ कथमेवं पापधियं ददासि। परस्त्रीपरधनविमुखानस्मान्न जानासि किं।

युवराजः। अये राजकुमारि श्रांतासि तदत्र तुरगादवतीर्य महाकालीसरस्तीरे कदंबतरुतले क्षणमुपविश यावदहं पश्चादागतान् त्वज्जनकभट्टान् निशितशरशतैर्निर्वर्तयिष्ये।

राजकुमारी। पिय ते तदेव णिव्वुत्ता:।

युवराजः। विलोक्य। सत्यं। निर्वृत्ता एव। तत्सुखेनोपविशाव। इत्युपवेशक्रियां नाटयति।

राजकुमारी। अज्जह तिसिद म्हि। तापयमिणीपत्तपत्तेण मे जलमुपणेहि॥

युवराजस्तथा करोति॥

राजकुमारी। पिय तुमं पढमं पिव। अणंतरं मं पायस॥

उभौ तथा कुरुतः॥

युवराजः। एकासन उपविश्य। कथमयं मलयानिलः श्रममपनयति। यथा।

आंदोलयन्कुवलयानि विलीनभृंग-
संगीतरंगकलहंसकुलादृतानि।
स्वीकृत्य नः श्रमजलं शिशिरोदबिंदु-
मालां ददाति मलयोपनतः समीरः ॥ ६ ॥

राजा। विलोक्य। यथैतौ बालिशौ न जानीतस्तथास्मिन्लवहलवकुलांतरे स्थित्वानयोः परस्परानुरागगोष्ठीमाकर्णयावः।

विदूषकः। ममावि कोदुअं वट्टइ॥ तथा कुरुतः॥

The king soon perceives that it is an incident in his own life that is represented: अहो कर्णाटनाट्यकारेण° ममैव युवराजदशाचरितमभिनीतमिदं। युवराजत्व एवास्माभिः क्रीडितं। कथं नाट्यकारश्चातुर्येणुनोद्धृतमिव सर्वं दर्शयति।°

Act III. (beg. fol. 36*b*). The queen *Pratāpadevī* is put out of humour by what has occurred, and fancying herself rejected, goes, with her attendants *Jayalatā* and *Vikramadevī*, to do homage to *Mahākālī* for her intercession. Meanwhile the king himself is longing for his consort, and is at length reconciled to her (the scene of reconciliation being, however, lost on foll. 50 and 51).

Act IV. (beg. fol. 53*a*). The general *Raṇacanga* brings some enemies' heads (*Dalapati-Yavana-śirāṃsi*), and is taken to the audience chamber [कंचुकी। महाराय रणचंगो दलवइजवणसिराणि(!) आणिअ दुग्गदुआरे सचिवेण सह वुत्तिं कुणं वट्टइ।° ततः प्रविशति समानीतयवनमस्तको रणचंगः।], where the king sits in state, attended by the *kumāra Narasiṃha* with his younger brothers. The general's account of his victory seems lost on

foll. 56–57. Messengers then appear with reports from all directions, followed by two courtiers bringing a letter. From the West the report is as follows :—

राजा । पश्चिमे देशे किमपूर्वं ।

दूतः । देव त्वच्छरणार्थिभिर्नृपशतैस्त्वत्पाणिदत्ताभयैस्
त्वद्राज्ये सुखवासितात्मदयितापुत्रप्रपौत्रादिकैः ।
ग्रस्ते गूर्जरमंडले प्रतिपदं ग्रासार्थनालोलुपैर्
ऋंतर्दोहयुतो महम्मदसुरत्राणो ऽधरं खादति ॥ १ ॥

राजा । इतःपरमधराधरं खादतु ॥

सचिवः । इतःपरमिदमिव ॥

राजा । दूतान्संभाव्य स्वमंदिराणि प्रस्थापनीयाः ॥
सचिवस्तथा करोति । दूता नमस्कृत्य प्रयांति ॥

नेपथ्ये । कश्कः ॥

प्रविश्य कंचुकी । महाराज । वीरमभूवस्स नानभूवस्स पत्नहरौ समागदौ ॥

राजा । आकारय ॥
कंचुकी तथा करोति ॥ पत्रहरौ नमस्कृत्य पत्रं दत्तः ॥
सचिवः पत्राय करं प्रसारयति ॥

राजा । संप्रोक्ष्य पत्रं ग्राह्यं । यतः ।
म्लेच्छाय कन्यां ददतो[:] स्वस्य जीवनहेतवे ।
नानवीरमयोः कस्य संपर्को नोपजायते ॥ १ ॥

सचिवः । तथा कृत्वा पत्रं वाचयति । स्वस्ति श्रीगंगदासभूपं प्रति नानभूपवीरमभूपयोः प्रणामपूर्विका विज्ञप्तिः । वयमिह कुशलिनः । भवता स्वकुशलपत्रं प्रेषणीयं ॥ तात्पर्यं च । सुरत्राणाज्ञयास्माभिरलेखि । ये सुरत्राणद्वेषिणः सुरत्राणराज्यमुद्वसीकृत्य(°द्वासी°) भवच्छरणागता ग्रासिनो[1] राजानो भवन्मंडले वर्तंते तेषां निवासो न देयः। भवता नीतिविरुद्धं क्रियते । महता सह वैरं नारंभणीयं। किं च । आत्मानं सततं रक्षेद् दारैरपि धनैरपि । इति नीतिशास्त्रार्थं चेतसि संधाय स्वकन्यामपि दत्त्वा[2] स्वस्त्रियोऽपि सुरत्राणस्याग्रे नर्तयित्वा सुरत्राणस्य पादपरित्राणमपि करे धृत्वा यानि कानि चिह्नैन्याक्षराणि प्रतिक्षणमुक्त्वा सकलमपि मानमहंकारं त्यक्त्वास्माभिर्यथा कथंचित्समयप्रतीक्षा क्रियते । स चतुरो यः समयं जानाति । अयं समयः क्षत्रियाणां न भवति । अयं कलिकालो यवनानामेव । विचारय । अस्माकमैलदुर्गमनेनाग्राहि । अन्येषां कियतां लंकासमानि दुर्गाण्यनेनाग्राहिषत । किं च सकलमहीमंडलोल्लसत्कीर्तेः करविजितकर्णकामधेनुकल्पद्रुमस्य सिद्धांगनापिताभितवितरणजनितयशःकलाधरस्योचितदान - द्विगुणभोजस्य श्रीमुग्गुलराजस्यापि राज्यमेतज्जनकेन गृहीतं । किं च भवत्पूर्वजस्य चाहुआणकुलावतंसस्य असमसमरसाहसैकमल्लस्य शरणागतवज्रपंजरस्य हंमीरवीरस्यापि रणथोंबराभिधं(!)दुर्गमपि दुर्गं ढिल्लीसुरत्राणेन गृहीतं ॥ दक्षिणसुरत्राणेनापि जेमराजमानकरादिभूपानां

. . . wanting foll. 65 (? and 66), containing the end of 4th and the beginning of 5th act.

Act v. takes us to the court of Sultan Muhammad (1443–1451 A.D.), of Ahmadābād, son of Ahmad Shāh.

Fol. 67^{1} opens with an incomplete verse, after which :—

नानभूपवीरमौ । पत्रं वाचयतः । शक्तिर्या महतीति महंमदसुरत्राणस्येति ॥

सूरत्राणः । कथमहंकारः ॥

नानभूपवीरमौ । पातसाह (Padishah) किं कथनीयं ।
म्लेच्छाय कन्यां ददतोः स्वस्य जीवनहेतवे।
नानवीरमयोः कस्य संपर्को नोपजायते ॥

इति पठित्वा । कथम् अपमानिता वयमनेन ।
गतेन सर्वराज्येन न दुनोति तथा मनः ।
यथानेनापमानेन कृतेनाहंकृतात्मना ॥ १ ॥
धिगस्माकं कुलं यत्र वयं जनुरुपागताः ।
दर्शयामो मुखं लोके ये ऽपमानमखोसखं(!) ॥ २ ॥

सुरत्राणः । कूर्चमवलंब्य । अयमपमानो ममैव न भवतां । तदहमहंमदसंभवो महंमदो न भवामि यदस्य मदमनसो गंगदासस्य दुर्गपावकं यावकमिव प्रतापपावके न द्रावयामि ।

यावद्दुर्मददंतिदंतकुलिशैः पावाचलं छेद्मि नो
यावत्तद्भुजदंडमंडितधनुःखंडं शरैर्भेद्मि नो ।
यावत्तत्तनुजाकरं निजकरेणासादितं वेद्मि नो
तावन्नाहमहंमदादुदभवं तावन्न वा मह्मदः ॥

[1] That is, vassals, or holders of grants of land; cf. Forbes, Rās Mālā, i., p. 242.

[2] As a matter of fact, the Rājā of Edar, for one, had given his daughter in marriage to the Sultan, and thereby bought his peace.

परिक्रम्यावलोक्य ।

रे सिंदूर भयंकराननकरान्कुर्वंत्वरं कुंजरान्
रे पल्याण विभावितान्परिसमारोहंतु वाजिव्रजान् ।
रे संग्राम परिस्फुरद्युतिभरान् गृह्णंतु शस्त्रोत्करान्
सोऽहं पावकपातनाय चलितो नालीकयंत्रोपलैः ॥ २ ॥

किं च । पदातिनिकराः पुरस्तदनु वाजिनां राज्यम्
ततो गजघटालयस्तदनु भूभृतो गच्छत ।
ततो ऽहमपि विस्फुरद्रयहयाधिरूढः स्वयं
व्रजामि रणहेतवे यवनसादिभिः संवृतः ॥ ३ ॥°

The army then starts on its march (the unsuccessful campaign of 1449 A.D.) to *Gaṅgadāsa's* capital, where at first—according to the descriptions given by tho Sultan's companions (*Nānabhūpa, Vīrama, Bhīmabhūpa,* and *Khāna Munīra*)—it carries everything before it, the assailed king, with his family and troops, being thrown back into the hill-fort and closely invested.

Act VI. (beg. fol. 80*a*). Whilst, however, the Sultan's troops take a rest, tho king, having conferred with his general *Raṇadhīra*, suddenly makes a sortie, and routs the enemy. The Rājā himself encounters *Nānabhūpa*, who turns to flight; whereupon *Vīrama* comes to meet the king, but after some exchange of taunting words, the end of the act is lost in foll. 90–92.

Act VII. (incomplete at beginning). *Vīrama* produces a plan of the hill-fort (which he has obtained from his *Purohita* who had once stayed there, receiving rich presents from *Gaṅgadāsa's* mother, *Bhāmāmbā*), and enters into a minute description thereof in 30 *ślokas*. The Sultan, spurred on by the glowing account of the place, makes another effort to retrieve his defeat, but falls from his *paṭṭahastin*, which then is killed by a stone from the ramparts, whilst he himself only succeeds in saving himself by mounting a horse and taking to flight amidst the jubilant rejoicings of the besieged.

Act VIII. (beg. fol. 101*b*). *Raṇadhīra* points out to tho king the spot where the Sultan has halted with *Vīrama*. The latter bids his master take heart :

वीरमः । पातसाह चिंता न कर्तव्या । शनैः कंथा शनैः पंथा शनैः पर्वतमस्तके (! cf. Böhtlingk, Ind. Spr., 6390) इति नीतिर्विचारणीया । प्रथमतो ऽस्य देशा विध्वंसनीयाः । ततः परिक्षीणतया स्वयमेव परिपक्वं गलितं प्रांशुवृक्षफलमिव (दुर्गं marg.) करं समेष्यति ॥

सुरत्राणः । तत्प्रथममेव पल्लीदेशराजधानीं करंडीं मुलियाडटेंबुरादिदेशग्रामान् विध्वंसयितुं मुलाखदिरनिदामदीप्रमुखाश्चत्वारिंशत्सहस्राश्च वाराः प्रस्थापिताः ।

वीरमः । तत्साधु कृतं नीतिरहस्यविदा पातसाहेन । इति प्रणामं करोति ॥

नेपथ्ये कलकलः । दुर्गस्योपरि जयपताकाः । जितं जितं खजकालेन (?) भोजेन च मध्यपल्लिवनं । चत्वारिंशत्सहस्राणि यवना विनिपातिताः ।

टेंबुरे निहताः केचित्केचिन्मग्ना जलांतरे ।
हताश्ववारास्तुरगा नीताः पल्लीनिवासिभिः ॥ ३९ ॥°

Whilst tho Sultan is lamenting the slaughter of his troops, *Vīrama* points out to him how a body dispatched by him has gained possession of part of the rampart of the fort (करंडर-शिखरपश्चान्मार्गेण . . . मद्भटाः पावकदुर्गमारूढा एव). But presently *Gaṅgadāsa* himself, becoming aware of the fact (अः शत्रवो विपयक्षीदुर्गपरिसरशिखरमारूढा एव. वीरमेणादृष्टपूर्वेण मार्गेण पावकपरिसरशिखरमारोहिताः स्वभटाः), throws himself against the assailants and forces them back. The Sultan then threatening the king that he will yet bring him to his knees, the latter jeers at him:—

राजा । विहस्य । निस्साणध्वनिः शत्रुवनितावक्षोजशैलयोस्तथा
प्रतिध्वनति यथा भवन्मुखे भवादृशां विकत्थनता युक्तैव ।
यस्य वर्णयितान्योऽस्ति स आत्मानं न वर्णयेत् ।
वर्णनीयगुणाभावात्स नो यस्य स वर्णयेत् ॥ ४१ ॥

भवत्पौरुषं भवता किं वर्णनीयं । तत्प्रत्यक्षत एव वीक्ष्यते ।

सुरत्राणः । दुर्गबलेन वल्गसि ।

राजा । गजाश्वकटकबाहुल्याद्वल्गसि । यदि निजभुजयोस्तेजो वहसि तदेकाकिनौ युध्याव । उभयसैन्ये विलोकयती ।

सुरत्राण: । काकतालिकान्यायेन जयं प्राप्तो ऽसि । तेन गर्वं वहसि । त्वत्पूर्वजस्य हम्मीरस्य हठिन: का दशा जाता । सा त्वया नाकर्णिता प्रायेण ।

ममापकारिण: सर्वान्ग्रासिनो रक्षतस्तव ।
त्वत्पूर्वजस्य भविता हम्मीरस्य दशा हठात् ॥ ४२ ॥

राजा । शरणागतरक्षार्थं यत्स्यात्तज्जीविताधिकं ।
तदेव जीवितं मन्ये येन संजीव्यते ऽखिलं ॥ ४३ ॥

सुरत्राण: ।
मुंचाभिमानं सकलं यथान्ये पृथिवीभुज: ।
दत्त्वा निजसुतां मह्यं राज्यं कुरु निरामयं ॥ ४४ ॥

राजा । इतरनृपतिकन्यावन्ममाप्यात्मजां यद्
यवननृप विलासिन् याचसे तद्ददामि ।
भवति तव किमाभि: प्राकृताभि: प्रमोद:
समिति मम कृपाणो देव कन्यां ददाति ॥ ४५ ॥

नेपथ्ये कलकल: ।
पावस्य दक्षिणं भागमारूढा नानभूपते: ।
पत्तय: पातिता: पृथ्व्यां तत्रस्थै: पावरक्षकै: ॥ ४६ ॥

The Sultan then resolves to make one more effort to take the fort; and at the moment when his troops approach, there also arrive there some of the king's *grāsinaḥ*—those mentioned, in Prākṛit, being *Khemaṇo, Cāhuāṇarāula Udayasiṃho, Gaṅgaḍokio, Khemaṇaputto Avaghaḍo, Udayasiṃhaputto Ajjuṇadeo*—to seek shelter in the fort; and they ask to be allowed to join in the fight [तवोपकारबद्धानामस्माकमधमार्णता । त्वत्कार्ये व्ययितै: प्राणैरस्माभि: सापनीयते ॥] The king, however, thinks it his duty to fight for them; and when his general reports that the Sultan, with *Mīra Saudāgara* (*suratrāṇaprāṇasamaḥ*) in front of him, and *Nānabhūpa* and *Vīrama* by his side, are advancing, he boldly issues forth from the gate. This leads the Sultan to assume that the king's resources must be at an end: यदयं दुर्गाधिपो दुर्गान्निर्गत्य युध्यति तदस्य धनधान्यादिदुर्गनिर्वाहसामग्री हम्मीरस्येव व्ययितेति लक्ष्यते । श्रूयते च महान्प्रत्यहं व्ययो ऽस्य ।

चत्वारिंशत्सहस्राणि प्रत्यहं भुंजते गृहे ।
मनुष्या गंगदासस्य पंक्तौ दशशतानि च ॥ ५२ ॥

After a few more syllables [शरणागतग्रा(सिन:)] there is a break, foll. 114–118 being wanting, and a leaf marked 114, written in a large sprawling hand, not carrying on the text. But apparently *Vīrama* must have remarked that *Gaṅgadāsa's* stock of supplies is by no means nearing its end, seeing that the conversation proceeds (on the supplied leaf):

सुरत्राण: । तत्कथं त्वत्कर्णपथमागतं ।

वीरम: । रात्रौ तत आगतेन ब्राह्मणेन कथितं ।

सुरत्राण: । तत्कथं ।

वीरम: । मंत्रिभि: प्रत्यहमेतावद्भ्यो धान्यं न दातव्यमित्युक्ते राज्ञा गंगदासेन निंबकुठारिशिवराजकुठारिणावाहूय पृष्टं कुठारे कियद्धान्यं विद्यत इति । तदा निंबानुजेन शिवराजकुठारिणेदमुक्तं । स्वामिन् संख्या तु न ज्ञायते ॥ परं तु यथा यथा धान्यराशय: प्रत्यहं लोकेभ्यो दीयंते तथा तथाधिकाधिकं पूर्यंते ।

महाराजस्य धर्मेण नित्यं यद्यद् व्ययीकृतं ।
वर्धते तत्तदधिकं धनधान्यादिकं वसु ॥

इति तद्वचनसुधयानंदितो राजा । अतो धनधान्यादिषु न विचार: ।

On fol. 119, the Sultan is informed by a messenger that a large hostile army (probably that of the Sultan of Mālava) is advancing on Ahmadabād, whereupon he resolves to beat a hasty retreat at nightfall. This being done, *Gaṅgadāsa*, considering it unworthy of a *Kshatriya* to strike at a retreating foe, re-enters his dwelling.

Act IX., written by a different hand, begins (fol. 121*a*) with an allegorical scene, in which the *Vaitālika*, after singing his morning song, is joined by his sister (*Gaṅgadāsa-*) *Kīrti*—represented as one of the wives of the king (still reposing in the arms of *Jayakamalā*)—and introduces to her an unknown twin-sister of hers (*Mahammadasāha-*) *Apakīrti;* whereupon the two ladies enter into friendly conversation

(the former speaking in Sanskrit, the latter in Prākṛit), and agree to go and visit other lands; the end of this scene being, however, lost on foll. 128–29.

In the last scene (incomplete at the beginning) the king and queen (attended by the *Vidūshaka* and *Jayalatā*) betake themselves to the sanctuary of the goddess to offer their homage. The end is, however, wanting again on foll. 133–35, the last leaf containing the incomplete colophon: [इति श्रीगंगाधरकविरचिते गंगदास]प्रतापविलासनामनाटके श्रीमहाकालीप्रसादो नाम नवमोंकः ॥०॥ to which another hand has added the statement: वैद्यवरश्रीभाभाजीमहन्नमानां पुस्तकमिदं ॥

Though somewhat clumsily constructed, and rather rambling in its dialogues, the subject-matter and the treatment of it are of sufficient interest to make one regret that the MS. is so defective and so little correct, especially in the Prākṛit portions. Here and there passages are marked as to be omitted in such a way as might almost lead one to suspect that it was the author's own copy.

Cf. Sylvain Lévi, Le Théatre Indien, App., p. 46.

[GAIKAWAR.]

4195.

1831. Foll. 40. Size 11¾ in. by 5¼ in.; fair, modern Devanāgarī writing; eleven lines in a page.

Mukundānanda, a dramatic composition, in one act, of the *bhāṇa* kind, by *Kāśīpati Kavirāj*.

It consists of fictitious, chiefly amorous, conversations between the actor (*Bhujaṅgaśekhara*) in the character of *Kṛishṇa* in *Vṛindāvana*, and imaginary interlocutors—as *Vasantaka* (*vayasya*), *Mudgala Bhaṭṭa* (a *paurāṇika*), *Mayūraka* (*vayasya*), and a number of damsels (*Marālikā*, *Līlāvatī*, *Lavaṅgikā*, *Mallikā*, *Candrikā*, etc.)

It begins:

वंदे वंदारुमंदारमिंदुभूषणनंदनं ।
अमंदानंदसंदोहबंधुरं सिंधुराननं ॥ १ ॥

कंठालिंगनमंगलं घनकुचाभोगोपभोगोत्सवं
श्रोणीसंगमसौभगं च सततं संप्रेप्समाना पुनः ।
प्राप्तं को ऽप्यमितोऽर्थ्ययेव यमुनाकूले बलाद्यः स्वयं
गोपानामहरद्दुकूलनिचयं कृष्णः स पुष्णातु नः ॥ २ ॥

The work has been printed at Madras (1882), and in the *Kāvyamālā*, no. 16.

It ends:

कृतिं लसदलंकृतिं रसविदो बुधा ये मम
प्रसन्नहृदया दयाजलधयो बहूकुर्वते ।
तदीयपदपद्मयोरयमयं प्रणामांजलिः
सरोजमुकुलाकृतिः शिरसि संततं न्यस्यते ॥ २५८ ॥

इति श्रीकाशीपतिकविराजविरचितो मुकुंदानंदनामायं मिश्रभाणः संपूर्णः ॥

[DR. JOHN TAYLOR.]

4196.

274. Foll. 42; size 11 in. by 4½ in.; Devanāgarī character; foll. 1–26 written in a large clear hand, about 1650 A.D.; eight lines in a page; foll. 27–42 in a smaller, slanting hand, in 1706 A.D.; twelve lines in a page.

Śriṅgāravāṭikā (or *Śṛiṅgāravāpikā*, as it is frequently called in the MS.), a play (*nāṭikā*), in four acts, by *Viśvanāthabhaṭṭa Kavi* (pupil of *Dhuṇḍhirāja*), son of *Mahādevabhaṭṭa Sūri*, grandson of *Vishṇubhaṭṭa Korida*, and great-grandson of *Haribhaṭṭa Paṇḍita*, of the *Cittapāvana* family.

The subject of the play is the love of the young king of Avantī, *Candraketu*, and *Kāntimatī*, daughter of king *Ratnapāla*, of Campāvatī.

It begins:

यच्छिष्यै रचिता जयंति जगति ग्रंथा हि ते यान् क्षणं
दृष्ट्वा मस्तकघूर्णनं वितनुते वागीश्वरो ऽपि स्वयं ।
तस्मै वैदिकतांत्रिकाध्वरविदे श्रीढुंढिराजाय[1] मे
विश्वस्मिन् स्थिरकीर्तये ऽस्तु[2] गुरवे सद्बुद्धिदात्रे नमः ॥१॥
चंचद्वेणिजटं नतोन्नतलसद्भूस्वर्णहीरप्रभं
हैमाहेयविभूषणं करिवरत्वग्दिव्यवासोऽंचितं ।
किं ब्रह्मेति विवादमत्र विदुषां हर्तुं यदेकीभवत्
तल्लोकत्रयमंगलं विजयते द्वंद्वं किमप्यद्भुतं ॥ २ ॥
सेवा यस्य निजे गृहे हृदि तु सा सा चोपविश्य स्मृतिः
कालं सापि न चेहते न हि च काप्यत्रास्ति निर्बंधता ।
यत्तस्यास्तु फलं तदिंद्रपतिभिः स्वर्वासिभिर्दुर्लभं
लभ्यं तच्च विनैव याचनमसौ त्वां पातु लक्ष्मीप्रभुः ॥ ३॥

नांद्यंते सूत्रधारः । प्रवेशं नाटयित्वा । भो भो भरतपुत्राः । अलमतिविस्तरेण । क्षणमात्रं श्रूयतां । श्रूयतां समस्तभरतसुतसमाराधितचरणकमलकमलाकराभिधाननाटकाचार्यांतेवासिनो रमणीयं मम वाक्यमिति । अद्याहं परममहिमपरमात्मपादपद्मालयद्वंद्वनिर्द्वंद्वभक्तिमकरंदास्वादनसदामोदमानमहोदारमनोमिलिंदेन° --- श्रीमहाराजाधिराजश्रीरामसिंहमहीपालेनाज्ञप्तोऽस्मीति। भो भो कमलाकरांतेवासिन्(?°सि-)श्रीविश्वनाथकविविरचिता चंद्रकेतुमहीपालचरित्रविराजिता शृंगारवापिका नाम नाटिकास्तीत्यस्माभिर्बहुदिनं श्रूयते । तदद्य सुमतिना त्वया सा विस्तीर्णेऽस्मिन् सुवर्णनिर्मिते सभामंडपे गीतवाद्याद्यैरभिनेतव्येति । अस्ति च तेन चित्तपावनजातीयेन निखिलमहाजनसमाजसंमानितहरिभट्टपंडितप्रपौत्रेण प्रतिदिनं वेदवेदांतादिसकलशास्त्राध्यापनकृतकालक्षेपणस्य विष्णुभट्टकोविदस्य पौत्रेण निरंतरं श्रौतस्मार्तानुष्ठानपरायणमति श्रीमहादेवभट्टसूरिसुतेन श्रीविश्वनाथ[भट्ट marg.]कविना सास्माकमनुग्रहबुद्ध्या पाठिता समर्पिता च । यस्य किल ग्रंथारंभे सकलरसिकलोकान् प्रति कात्यायनीप्रार्थनापूर्वकमियं वाचो युक्तिः । यथा ।

इमं निबंधं सुगमं करोतु सा
शिवा दरिद्रस्य ममोदितं मुखात् ।
यया कटाक्षैरवलोकनैर्निजैः
पतिः पशूनां जगतीपतिः कृतः ॥ १ ॥

तथा च ।

नाटिकां शुचिरसस्य वापिकां नायिकामिव मनोविनोदिकां ।
वीक्ष्य वीक्ष्य तरुणा इमां मुदा वासरानपनयंतु सर्वदा ॥ २ ॥

तदहं गृहं गत्वा गृहिणीमाहूय यावत्तया सार्धमुक्तिप्रत्युक्तिभिः कृत्वा सभासदां पुरतो मधुमधुरिममधुरतमवर्णायाः कथायाः प्रसंगं करोमि तावद्भवंतो ऽपि यथामदुपदेशं विरचितविविधवेषधारिणो भूत्वा चंद्रकेतुमहीपालभूमिकानयनपूर्वकं प्रवेशं नाटयंतु ।

इत्याज्ञाप्य किंचिदंतरं गत्वा नेपथ्याभिमुखमवलोक्य गृहिणीमाकारयति । आर्ये इतस्तावत् ।

प्रविश्य नटी । अज्जउत्त एस म्हि । आणवेदु अज्जउत्तो किंणिमिहं अज्जभेण(!) आहूद म्हीत्ति ।

सूत्रधारः । आर्ये विष्णुसिंहं कुमारं पुरस्कृत्य शृंगारवापिकाभिनयप्रदर्शनार्थं श्रीरामसिंहमहीपालेनाज्ञप्तो ऽस्मि[1] । तदद्य मम वचनेन विरचितविविधमंडनाया अस्यां राजसभायां प्रविष्टायास्तत्रभवता भवत्या मधुमधुरसुकुमारतरवचनविलासैरेवमेवं भवतु । तथा हि ।

अद्यासौ बहु मोदतां कविरमी शृंगारवापीं तथा
गाहंतां नृपसूनवः सुखवशाद्रात्रिर्व्रजेत्सूक्ष्मतां ।
गंधर्वा भवदीयगायनकृतां गच्छंतु ते लज्जताम्
अस्माकं जगतां त्रये ऽद्य महती कीर्तिश्च संजायतां ॥°--

सूत्र° । आर्ये अलमलमनया चिंतया इममेवार्थं साधयितुं । कर्णाटकदेशे चंद्रकेतुबालमहीपालानंगजीविकाराजकुमारिकाविवाहघटकप्रधानपुत्रगुणराशिमित्रवत् मया प्रेषितोऽस्ति स्वकीयश्चंदनंदनो नाम नटः । ° - - । आर्ये श्रूयतां तावत् । अस्ति दक्षिणस्यां दिशि श्रीशोभासंपन्नं सकलजनरंजनक्षमं राजधानीद्वयं । एकाऽवंती नाम नगरी । अपरा च चंपावती नाम । तयोरवंत्याः पतिस्तावद् विजयकेतुपुत्रश्चंद्रकेतुर्नाम सौंदर्येणापरो मदन इव । स च प्रथमे वयस्येव राज्यं प्राप्य बुद्धिसागरनाम्नि पितुः प्रधाने सकलं राज्यभारं निधाय स्वयं तत्पुत्रेण गुणराशिना सह सख्यं कृत्वा नानाविध[कौतुक marg.]विलोकनतत्परो बभूव। चंपावत्याः पतिस्तावद् रत्नपालो नाम महीपालः । तस्य [शृंगारवापिक marg.]ानंगजीविकाऽपरपर्याया कांतिमती नाम कन्या । सा पूर्वजन्मनि जलदेवतासीत् । कदाचिद्वरुणो

---

[1] श्रीधुंदिराजाय MS.

[2] Thus corrected *alt. manū* for orig. गतकीर्तयेऽस्तु

[1] Thus corr. for orig. शृंगारवापिकाभिनयावलोकनार्थमुत्कंठितोऽयं श्रीरामसिंहाख्यो महीपालोऽस्ति ।

राजा जातापराधो तामिति शप्त्वा पश्चात् शापांतं च कृतवान् त्वं मनुष्यलोके मानुषी भव। तत्र च पातिव्रत्येन पतिं समाराध्य पुनः स्वां प्रकृतिं प्राप्स्यसीति। सा नवनीतकंठी पितुर्गृहे शुक्लपक्षचंद्रकलेव वर्धमाना सती सखीभिः सार्धं सर्वमंगला देवालयसमीपे शृंगारवाटिकायां खेलंत्यासीत्। कदाचित्स चंद्रकेतू राजा जनानां वदनात्तस्याः सौंदर्यं श्रुत्वा गुप्ततयैव तत्प्राप्त्युपायतत्परमनस्को बभूव। सापि च तस्य सौंदर्यं श्रुत्वा तन्मनस्का बभूव। एवं तयोः परस्परं परोक्षानुरागे वृद्धिं गते सति कदाचित्स चंद्रकेतुः क्षितीशस्तामवलोकयितुं स्वमित्रं गुणराशिं प्रेषितवान्। ततः स गुणराशिश्चंपावत्यां गत्वा शृंगारवाटिकायां बाललक्ष्मीमिव क्रीडंतीं तां विलोक्य पुनरवंतीं प्रति समागत्य चंद्रकेतवे तस्याः श्रुतानुभूतान्समस्तान्गुणान्कथयांबभूव। ततः स राजा चंपावत्यां कश्चित्सिद्ध आगतो ऽस्ति तस्य दर्शनं कर्तव्यमिति व्याजमुत्पाद्य चंपावत्यां गत्वा सर्वमंगलायाः प्रासादनिकटे निवासं चक्रे। तत्रैव निकटवर्तिनि वटुकभैरवमंडिरे पुरैव गुणराशिमित्रेण स्थापितया मुंडमालानामसिद्धिन्या बुद्धिकौशलेन कार्यसिद्धिं कृतवान्।

नटी। अज्ज। अलं अग्गे कधणेण एदिणा ज्जेव मए सव्वो वि णाडिआअत्थो (*r.* णा°) अवगदो ऽत्थीत्ति।°

सूत्र°। आर्ये किं बहुना। श्रूयतां।

आसीत्सूर्यकुले मनूपमनिभः श्रीमानसिंहाभिधो
राजा रंजितपंडितेंद्रनिवहः सिंहोपमो विक्रमे।
कीर्त्या सर्वदिगंतनित्यगतयाप्यासन्नया सर्वदा
कर्णश्रीबलिभोजराजगणनाकाले पुरा कीर्तितः ॥१॥°३॥

तस्मात्कीर्तिसितीकृतत्रिभुवनात् श्रीपूर्णिमाचंद्रवद्
भूमींद्राद्भुजशालिनः किल जगत्सिंहः कुमारो ऽभवत्।
सर्वान्यो युवराज एव वशयामासारिसार्थान् यथा
मातंगान् मृगराजसाऽऽजिशिरसि श्रीकार्त्तिकेयोपमः
[॥ ४॥ °६ ॥

तस्मिन्वंदिमुखांबुजेषु मधुरान् श्रीसाधुवादान्निजान्
धृत्वा वासवमित्रतां सति गते तत्पुत्र उर्वीमिमां।
शासत्सन् शुभ्रभेतरामिह महासिंहाभिधः संपदा
यश्चासीद्धनदोपमो गुणिजनग्रामप्रदः सर्वदा ॥ ७[1] ॥ °८ ॥

तस्मान्मानिजनादिनाथ उदभूद्राजो महामानवान्
राजा राजदुदारचारुचरितो विश्वंभराभूषणं।
नाम्ना श्रीजयसिंह इत्यभिहितो दानेषु कर्णाधिको
युद्धा विचशिखंडिनंदनसमः सिंहोपमो विक्रमे ॥ ९ ॥

तस्याशेषाचलेशार्चितपदसरणेः श्रीसुधर्मोपमायां
केचित्तर्किसभायां कतिचन विबुधाः सांख्यपातंजले च।
केचित्साहित्यशास्त्रे तत इतरबुधाः श्रीतयोगे च शास्त्रं
व्याख्यायायाप्यमानं निजवसतिगृहं यानयंतश्च जग्मुः
[॥ १० ॥ °१३ ॥

सूनुस्तस्य सुधार्णवोदितसुधाधामोपमो दोर्भिर्भिर्
भूमींद्रस्य जयन्तवत्रयनयोः पित्रोः सदानंदकृत्।
राज्यं प्राप्य पुरूरवा इव परः श्रीरामसिंहाख्यया
यः ख्यातो भुवि विक्रमार्चितभुजः श्रीपार्वतीपुत्रवत् ॥१४॥

अहो विविधमंगलालसदनंतकेतुप्रभा
प्रभूतकविसंकुला बहुविधैर्बुधैरुज्ज्वला।
दिवं हसति यत्सभा सकलशास्त्रसाहित्यवाग्-
विवादमुदितांतरैर्द्विजपतिव्रजैरंचिता ॥ १५ ॥

येन श्रीब्रह्मपुत्राभिधनदपुलिने स्वर्णपृथ्वीप्रदानं
चक्रे यस्मिन्द्विजास्तेऽप्यतिधनिन इह क्ष्मातरालेऽभूवन्।
दृष्ट्वा ये रुक्ममालोकितमपि न न तच्चित्रमेतत्तु किंतु
ब्रह्माप्यन्यं वदान्यं सृजति न तमिमं वीक्ष्य वैरिक्रमान्यं
[॥ १६ ॥ ० १९ ॥

वीरैरर्जुनहिंदुसिंहसबलानंदोग्रसिंहोद्भट-
श्रेष्ठश्रीहरिसिंहरावलजयत्सिंहादिभिः सेवितं।
यं दृष्ट्वा समरे सपत्नपृतना संत्रस्य भावानघो
धत्ते ऽष्टावपि सात्त्विकान्नवयधृतुत्स्यं प्रगल्भाप्यहो ॥१७॥
[°२२ ॥

नटी। श्रुत्वा सानंदं। अज्जउत्त जइ एव्वं ता संपुण्णो मे मणोरहो वि मणो होस्सीत्ति।

नेपथ्ये। शंखवाद्यानंतरं। साधु रे भरतपुत्र साधु कः संदेहः। एतादृश एवायं° श्रीरामसिंहाख्यो महीपालो ऽस्ति। तद्वयमपि किमेतस्य पुण्यशीलस्य दर्शनेन चक्षुषः फलं नानुभविष्याम इति।

सूत्रधारः। श्रुत्वा। आर्ये तत्किमिति विलंबसे। आगता एव किलैते चंद्रकेतुभूमिपालभूमिकां पुरस्कृत्य मदीया नटास्तदावामपि त्वरितमभिलषितकार्यसिद्धये व्रजाव इति निष्क्रांतौ ॥ प्रस्तावना ॥

ततः प्रविशति विरहावस्थां नाटयन्वामनस्थो राजा सविदूषकः॥

राजा। सर्वतो विलोक्य। आत्मगतं।

[1] The MS. omits the number of v. 6, and is consequently one figure short from here.

ज्ञाने यद्यपि तां सुधाकरमुखीं प्राप्स्याम्यहं स्वल्पकैर्
एवाहोभिरिदं तथापि हृदयं प्राप्नोति नो निर्वृतिं ।
यत्सत्यं ब्रुवते जना विरहिणां सर्वं हि दुःखायते
नो चेत्सर्वसुखप्रदा कथमियं ज्योत्स्ना भृशं मां दहेत् ॥१॥°

The king tells the *Vidūshaka* how in a dream he has seen *Kāntimatī*, the beautiful daughter of *Ratnapāla* of Campāvatī.

Act II. The chief minister's son, *Guṇarāśi*, just returned to Ujjayinī from Campāvatī, tells the king that *Kāntimatī* is in love with him, whose praises had been constantly sung by those around her. Her father, seeing his daughter pining away without any apparent cause, had in vain summoned wise Brāhmans, physicians, Siddhas and others to cure her, till at last the *Siddhinī Muṇḍamālikā*, who was reported to have effected numerous cures, made her appearance and took up her residence at the shrine of *Sarvamaṅgalā* in the Śṛiṅgāravāṭikā. He advises the king to pay a visit to the king of Campāvatī, and consult the *Siddhinī*.

Act III. The scene is laid partly at the Śṛiṅgāravāṭikā, where the wise woman tells her pupil *Jaṭālampaṭā* about *Candraketu*, who had once shown her great respect; and partly at the court of Ujjayinī, where the king receives reports and makes preparations for his journey.

Act IV. *Kāntimatī* visits the *Siddhinī*, and is told by her that *Candraketu* is coming. During his stay, the latter resides at the Kanakaniketana, whence he views and describes the city. He also pays his respects to *Muṇḍamālikā*, who ultimately brings about the desired union.

It ends:

गुणराशिः । महाराज सत्यं तथापीदमस्तु भरतवाक्यं ।

पश्यंस्त्रैलोक्यमेतत् सुरनरभुजगान्व्यापयन् स्वस्वकर्मा-
ण्यायात्यारुह्य हैमं रथमतिजविनं सप्तनामाश्वितं(?°नं) यः ।
स त्वामात्मोच्चतेजोमहिमहतमहाध्वांतमालो विवस्वान् ।
पायान्मित्रोऽप्यमित्रो निजजनविपदां संविदां संप्रदाता॥९७॥
वर्णाश्चत्वार एते निजविहितपथेनात्मशक्त्या तुरीयाम्
आराध्याराध्य विद्यां विषयसुखभृतां भुक्तिमादौ लभंतां ।
पुत्रान्पौत्रान् पृथिव्यां सकलगुणगणालंकृतान् स्थापयित्वा
पश्चान्मुक्तिं श्रयंतां श्रुतिशतगदितां सच्चिदानंदरूपां ॥ ९८ ॥
यो जात्या खलु चित्तपावन इति ख्यातस्तथोपाख्यया
विख्यातो भुवि रानडा इति जडाज्ञानापहानौ कृती ।
तस्य श्रीकविविश्वनाथविदुषो [ऽ]दोषोज्झितैषा कृतिः
कुर्याच्चेतसि संमदं बहुविधं संख्यावतां संप्रति ॥ ९९ ॥

इति निष्क्रान्ताः सर्वे ॥ चतुर्थोंकः ॥ इति श्रीचित्तपावनज्ञातीयरानडोपनामककविविश्वनाथभट्टविरचिता शृंगारवापिका नाम नाटिका काश्यां परिपूर्णा संवत् १७६३ समए अगहन वदि अष्टमी ॥

Wherever the full title of the play is given in the margin (viz. foll. 1, 2, 6–8) it is called *Śṛiṅgāravāpikā*. [H. T. Colebrooke.]

4197.

144. Foll. 38; size 14 in. by 3 in.; good Bengālī handwriting, of about 1750 A.D.; four lines in a page.

Kautukaratnākara prahasana, a comedy, in one act, composed for the delectation of the people during the celebration of the Spring festival (*vasantamahotsava, vishuvamahotsava*)—by one bearing the surname of *Kavitārkika*, son of *Vāṇīnātha*, and court chaplain of *Lakshmaṇapati*, or *Lakshmaṇa Māṇikyadeva*, son of *Gandharva Māṇikyadeva*, of *Bhūluyā-rājadhānī*.

It begins (with the verse-numbers supplied):

भूतैराकृष्टवस्त्रामुरसि करहतिं कुर्वतीमानताङ्गीं
दन्तैर्दष्टा रसज्ञां जघनगुरुतया प्रस्खलन्तीं द्रवन्तीं ।
पश्यैतां दक्षपत्नीमिति सुरसरिता जल्पिते सोपहासं
तां वीक्ष्य स्मेरवक्त्रः सपदि नतशिराः पातु वः पञ्चवक्त्रः ॥१॥

अपि च । कोदण्डकर्षणविधौ श्रुतिमूलसङ्गी
भङ्गीं दधत् श्रवणभूषणपङ्कजस्य ।
चित्रीकृतो मधुकरैरिव नीलरत्नैः
पाणिः पुनातु गिरिराजभुवो जगन्ति ॥ २ ॥

नान्द्यन्ते सूत्रधारः । अलमतिविस्तरेण । समन्तादवलोक्य । अहो सकलसामाजिकानां हृदयानि कौतुकजलनिमग्नानीव लक्ष्यन्ते । तथा हि ।

स्मितविदितरदालीमौक्तिकश्रेणिरोचि-
र्विदलितभुवनान्तध्वान्तधाराः समन्तात् ।
विकसितमुखपद्मव्यूहसौरभ्यपुञ्जैः
कवलितसकलासाः(°शाः) सभ्यसंघाः स्फुरन्ति ॥३॥

अद्य तावन्महाविषुवमहोत्सवे विहितबहुविधवितरणभूदेवभूरिभोजनप्रमुखवैदिककर्मकलापेन समधिरूढप्रसादेन पृथिवीपुरोहितेनादिष्टोऽस्मि कस्यचित्परिषदाराधनपटुतरस्य प्रहसनस्याभिनयाय । तत्समीहितं नः संपन्नं । तथा हि ।

आज्ञा नरपतेर्यत्र सभा चेत्तत्र सादरा ।
समीहितमतः किं स्यान्मादृशां नात्यधीमतां ॥ ४ ॥

तन्निजगेहिनीमाहूय महीमहेन्द्रस्यादेशं संपादयामि । इति नेपथ्याभिमुखमवलोक्य । आर्ये निजचरणमञ्जुमञ्जीरशिञ्जितमुखरितां रङ्गभूमिं कुरु ।

प्रविश्य नटी । एषा म्हि । आनवेदु अज्जे(*r.* अज्जो) ।

सूत्र° । आर्ये आज्ञापितो ऽस्मि राज्ञा कस्यचित्परिहसनस्याभिनयाय ।

नटी । अज्ज केण णम्या(!) ।

सूत्र° । स्वगतं । सकलदिङ्नारीमलयजमण्डनायमानयशःप्रसरो ऽप्येष धरणीनायको विदितः प्रियया । अथवा कुलजनानां पतिपरायणानां मनोनन्यत्र (? मनांस्यत्र) विस्फुरन्ति । प्रकाशं । प्रिये न जानासि । यस्य हि

न्यायादिग्रन्थवीथीविचरणपटुभिर्भूषिता भूमिदेवैर्
नित्यं भूदेवदेवार्चनरतमनुजा भारतीरङ्गशाला ।
रङ्गालंकारभूतातिथिमिलनमहासादराशेषलोका
वाराही यत्र देवी स्वयमरुणकरी भूलुया राजधानी ॥५॥

अपि च ।

दानौघैर्बहुभिर्मखैः सुकृतिनामाशंसनीया स्थितेः
स्वर्लोकादपि सा समुज्ज्वलगुणा विभ्राजते भूलुया ।
यस्यां सूरकुलाम्बुधेः समुदिताः कल्पद्रुमा जङ्गमाः
क्षौणीन्द्रा विचरन्ति सन्ति विबुधाचार्या द्विजेन्द्राः शतं ॥६॥

जनकस्तु यस्य

सामीन्मनोज्ञाधिकरस्य मूर्तिः श्वेतातपत्रीकृतचारुकीर्तिः ।
शूरान्वयाम्भोनिधिपूर्णचन्द्रो गन्धर्वमाणिक्यमहीमहेन्द्रः ॥९॥ °१२॥

भ्रमति युधि करीन्द्रे तस्य संरुद्धपक्षः
क्षितिधर इति मोहादग्रहीद्भ्रममाशु ।
तदनु दशनयोश्चापाम्नदा दृग्भ्रमो ऽयं
सुरसदसि मलज्ञो यत्रपाणिर्बभूव ॥ १० ॥

स्वयं यस्तु । विनमन्नृपमण्डलीमुकुटकोटिरत्नावली-
विशालविशदप्रभाक्षपितपादपङ्केरुहः ।
प्रतापमिहिरोदयग्लपितवैरिसीमन्तिनी-
स्फुरन्नयनकैरवो जयति लक्ष्मणक्षोणिपः ॥११॥ °१३॥

प्रिये सकलगुणनिधेरेतस्य भूपालचूडामणेर्गुणगणकथने न हि गीर्वाणगुरुरपि पटीयान् । तत्र के वयं वराकाः । तथा हि ।

आरोप्यन्ते गुणा ये स्तुतिकविवरैः पूर्वभूमीश्वराणां
न्यूनं श्रीलक्ष्मणस्य क्षितिकुलमणेः सन्ति नैसर्गिकास्ते ।
आस्तां तस्य स्तुतिः साहजगुणगणभाषणे ऽप्यस्य मन्ये
यद्येकः स्यात्पटीयान् दशशतवदनो भोगिनां सार्वभौमः
॥ १४ ॥ °१६ ॥

अपि च । यो ऽयमनवरतमुपचीयमानसुकृतकदम्बसंतर्पणार्थमेतं रत्नाकरं निर्मितवान् ।

न्यायव्याकरणादिशास्त्रनिवहस्वाध्यानमध्यन्दिन-
प्रोद्यानद्युमणिप्रभातिरभितः संतापितानां सतां ।
धाराणामवगाहनाय गहनस्वच्छै रसैः पूरितः
श्रीमल्लक्ष्मणभूभुजा विरचितः सत्काव्यरत्नाकरः ॥ १७ ॥

नटी । सविस्मयं । अज्जउत्त । ईदिसम्पि प्पहसनमत्थि जेन तादिशस्स कविउलगुरुणस्स वेदज्ञसा अम्मनन्दो(?) मनोविणोद इदव्वन्ति ।

सूत्र° । क्षणं विभाव्य स्मृतिमभिनीय । वाणीनाथमहात्मनः सुकृतिनो विद्याविवेकक्षमाधैर्यौदार्यगभीरतासुजनताकारुण्यवारांनिधेर्भूमीदेवमणेः सुतस्य कृतिनः सत्काव्यरत्नाम्बुधिरास्ते श्रीकवितार्किकस्य सरसः कश्चित्प्रबन्धोत्तरः । तथा हि । एतस्य हि प्रज्ञानिर्जितनाकनागरगुरोरधिगतसकलशास्त्रार्थतत्त्वस्य कविकुलशिरोमाणिक्यमेदिनीपतिनिवहमुकुटमरीचिरञ्जितपदनखरस्य पुरोधसा तेन विरचितं कौतुकरत्नाकरं प्रहसनमेवात्र पटुतरमित्याकलयामः ।

नटी । अज्ज । एत्थ दोलाअद(? दोलाअदे) मे हिअयं ।

सूत्र° । प्रिये न जानासि । स्वयं सकरुणमुपदिश्य कारित-

गुणसक्षस्य (? °पक्षस्य) जनस्यानतिशायितो ऽपि गुण उपदेशकानां परां प्रीतिमुत्पादयति । तथा हि ।

स्वयं स्नेहेन सिक्तस्य शाखिनः कुसुमं यथा ।
आनन्दयति सेक्तारं तथा नान्यतरूद्भवं ॥ १८ ॥

अत्र नरपतिकुलमुकुटमणिश्रीलक्ष्मणमाणिक्यदेवस्य [पाद]यसमेव प्रमाणं । तथा हि ।

सभ्याः सदर्थं कलयन्ति काव्ये
दिशन्ति दोषान्पिशुनाः प्रयत्नैः ।
मधूनि पुष्पे मधुपाः पिबन्ति
कुर्वन्ति कीटाः किल वृन्तवेधं ॥ २३ ॥°

The comic figure of the piece is a silly king, *Māna*, whose queen has been abducted, and who relies for her recovery on a lot of imbeciles and knaves who possess his confidence. The nature of these characters is sufficiently indicated by their names. There is *Kumati Deva*, the minister; *Aśubhacintaka*, the astrologer (*daivajña*); *Ācārakālakūṭa*, the priest (*vipra*); *Pracaṇḍaśephavarvara*, the spy; *Suśīlāntaka Daṇḍapāṇi*, the overseer of the harem; *Samarakāra*, the commander of the army; *Ajitendriya*, the guru; *Vyādhivardhaka*, the physician (*vaidya*); and *Kapaṭaveśadhārin*, the *brāhmaṇa*, who is accidentally revealed as the abductor.

Of Prākṛit, the play contains only the few conventional phrases and a song assigned to the actress in the prologue.

It ends :

आचार° । देव भूयः किं ते प्रियमुपकरोमि ।
राजा । अतः परमपि प्रियमस्ति । तथा हि ।

त्वं चाचार्यवर स्वकीयनगराचारे नियुक्तो मया
सच्छक्राशनमिश्रिताम्बुचसुरा(?°तुरा) प्रीताखिलैर्बान्धवैः ।
प्राप्तानङ्गतरङ्गिनी च कुलटीरूपैर्जगन्मोहिनी
नीतो ऽयं कपटी गुरुर्मम गृहं देवीं गृहीत्वा मुदा ॥

तथापीदमस्तु ।

पृथ्वीविस्तारशम्यां जनयतु विदधद्देवराजः सुवृष्टिं
भूदेवैर्यज्ञकर्माखिलनिहितपुरोडाः स संतर्पितः सन्
क्षीरं सुस्निग्धगव्यो दधतु बहुतरं तद्भवे राज्यसंघे
यज्ञैस्तुष्टाः प्रज्ञानां विदधतु निखिलानन्दवृन्दानि देवाः ॥

इति निष्क्रान्ताः ॥ इति कौतुकरत्नाकरनाम प्रहसनं समाप्तं ॥ इति रत्नाकरं पुस्तं रामलोचनशर्मणा । लिखितं बहुयत्नेन वर्णाशुद्धं त्यजेद्बुधः

For an incomplete MS. of the same work (reaching as far as fol. 28*b*, *l*. 3 of the present MS.), see Notices of Skt. MSS., 2nd ser., i., p. 80. [H. T. Colebrooke.]

4198.

1120 e. Foll. 12; size 12 in. by 4½ in.; very fair Devanāgarī writing, of about 1800 A.D.; twelve lines in a page.

Vasantatilaka, a dramatic entertainment, in one act, of the *bhāṇa* order; by *Varadācārya*—son of *Sudarśana Kavi*, surnamed *Ghaṭikāśata*—eulogised by the *sūtradhāra* both as poet and as logician. [A.]

It begins :

जयंति जगतां मातुः स्तनकुंकुमबिंदवः ।
मुकुंदाश्लेषसंक्रांतकौस्तुभश्रीविडंबिनः ॥

It ends :

कांचीपुरीमधिवसन् कमनीयभूमा
कामोऽथ एव वरदः कमलालयायाः[1]
आकल्पयन्वसुमतीमनुकल्पमेनां (°रंज्यमानां B)
कल्पद्रुमो भवतु (जयति B) कश्चन मानवानां ॥ १६७ ॥

इति निष्क्रांतास्सर्वे ॥ वसंततिलकभाणस्समाप्तः ॥

The work consists of a soliloquy describing the most heterogeneous scenes, one abruptly succeeding the other. The scene is laid in the streets of Kāñcīpurī (Conjevaram), the abode of crowds of Brāhmans and dancing-girls connected with its famous temples; and the colours of the picture are taken from the occurrences of daily life, such as gossipping about the private affairs of casual passers-by, love-making to other men's wives, cock-fights,

[1] कामो स एव वरदः कमलामहीशः B.

snake-catching, stopping of a mad elephant running about, teaching in a class-room, duels, etc. The last scene begins with the arrival, from Hastigiriśikhara, of *Varadarāja*, styled *Hastigirīśa, i.e.* prince of Kāñcīpurī, who comes to grace by his presence the celebration of the *vasantotsava*. On this occasion *Vasantasenā*, a dancing-girl from Vilāsapura, performs before the king, is admired and liberally rewarded by him, and finally becomes the wife of the actor, *Śṛiṅgāraśekhara*.

The piece is entirely composed in Sanskrit. Editions of the work have appeared at Calcutta and Madras.

Cf. Sylvain Lévi, Le Théatre Indien, p. 255.

[H. T. Colebrooke.]

4199.

3188. Foll. 30; size 12½ in. by 3¾ in.; good, modern Devanāgarī writing; European paper; seven lines in a page.

The same work. [B.]

Colophon: **इति श्रीमद्घटिकाशतबिरुदश्रीवरदाचार्येण विरचितो वसंततिलको नाम भाणः समाप्तः ॥**

The fly-leaf contains the following note:—"Copied for me from a manuscript belonging to *Lakhmaṇ Trimbakjī Gaḍgil* of Belgaum.

The manuscript is dated Śaka 1709. It consists of twenty-four leaves, about 11½ in. long by 4¾ in. broad. The characters are Nāgarī. Presented to the India Office Library, 23rd August, 1878.

J. F. Fleet, Bo.C.S."

4200.

1827. Foll. 6; size 12½ in. by 5 in.; clear Devanāgarī writing of 1812 A.D.; European paper (watermark 1808); 12 lines in a page.

Mithyājñānakhaṇḍana, a short allegorical play vindicating the superiority of the ancient traditionary forms of belief and social state of things; by *Kavi Ravidāsa*.

It begins:

श्रीदेवी यः सुखायाखिलजनजननी पार्वती पावनी स्याद्
वाग्देवी वाक्प्रदास्तु द्युमणिरपि परां सिद्धिमृद्धिं ददातु ।
रामः कामं निकामं वितरतु सततं धामधामासु(? °स्तु) नाम
देवश्चंद्रार्धचूडो गजवदनयुतः कीर्तिकीर्तिप्रदोऽस्तु ॥ १ ॥

अपि च । सतां संनिहितो नित्यं पाखंडपपटूरगः ।
स श्रीपतिः परामृद्धिं सर्वसिद्धिं च यच्छतु ॥ २ ॥

नांद्यंते सूत्रधारः । भो भोः सभासदः सावधानाः शृणुध्वं । इह खलु भरतखंडमंडनीभूते गुर्जरप्रदेशे द्वारवतीपतेः प्रियाय कविरविदासकृतस्य मिथ्याज्ञानखंडनाभिधस्य नाटकस्याभिनयार्थं प्रवृत्तोऽस्मि । तदाकार्यय नटीं ।

सूत्रधारः । प्रिये इतस्तावत्प्रविश्यं ।

नटी । अज्जउत्त किं कज्जं ।

सूत्रधारः । प्रिये नाटकमभिनेतव्यमस्माभिः ।

नटी । अज्जउत्त तं कवज्जं(! किमर्थं) ।

सूत्रधारः । प्रिये भगवद्भक्त्यर्थमेव ।

नटी । केरिसो उण भगवं (कीदृशः पुनर्भगवान्) ।

सूत्रधारः । आः भगवानपि पृच्छ्यते भगवत्या । तथा हि ।

यो मायया सृजति रक्षति हंति काले
त्रैलोक्यमेतदखिलं सजलांबुदाभः ।
तं श्रीनिकेतममलांबुजपत्रनेत्रं
नावैति कः परमकारुणिकातपत्रं ॥ ३ ॥

नटी । सहर्षं । आकाशे कर्णं दत्त्वा । अज्जउत्त किं कणमुहदं सूयदे ।

सूत्रधारः । कर्णं दत्त्वा । आः परिज्ञातं । वेदध्वनिरयं पातकं विधुनोत्यस्माकं पवित्रतरो वीणारणत्कारोऽपि श्रूयते । अहमिति मन्ये । वेदैः परिवृता भगवती वाग्देवी समागता । यासौ

साक्षात्कर्पूरगौरा कनकमयमहाकुंडलोद्भासिगल्ला
श्रीमद्वीणाप्रवीणा शशधरविशदे राजहंसे निषण्णा ।
बिंबोष्ठी पद्मपत्रायतनयनयुगोत्तुंगवक्षोजयुग्मा
हीराकारद्विजालिर्ललिलितततनूद्दाममध्या सुनाभिः ॥४॥

वेदाश्च य एते

कषायवरवाससः शशिकरस्फुरत्तंतुभिः
प्रकाशितहृदंबरास्तिलककांतिगौराननाः ।
गृहीतकनकोत्तमस्फुरितवारिपात्रीरुचाम्
इळत्नखरुचो वचोऽमृतरसेन सत्सौख्यदाः ॥ ५ ॥

तर्हि वयं सपर्यार्थं प्रयताम इति निष्क्रांतौ ॥ प्रस्तावना ॥

ततः प्रविशति यथानिर्दिष्टा भगवती वाग्देवी चत्वारो वेदाश्च सर्वशास्त्रनिपुणपरिवृताः । इतस्ततः परिक्रम्य

वेदाः सरस्वतीं विलोक्य । भगवति संसारसागरतरणि° । वयं तु पापहेतुना कलिहलकेन पराभूता विरलप्रचाराः कृताः ।° अतो ऽस्माभिः किं कर्तव्यं कुत्र गंतव्यं तत्समादिशतु भगवती ।

वाग्देवी । अत्याश्चर्यमिदं । भगवंतो वेदा अपि स्तुतिवाक्यैर्वराकीं मां संभावयंति ।°

Sarasvatī tries successively to associate the *Vedas* with *Vishṇubhakti*, *Nyāya*, *Mīmāṃsā*, and *Vedānta*, but they declare themselves likewise infected by the evil influences of *Kali*. Then *Praśastipaurāṇika* is called to the rescue. At the same time appears *Vyāsa Viṭāvataṃsa*, with his four female friends *Viṭopadeśā*, *Viṭavallabhā*, *Viṭāṅganā*, and *Viṭavilāsinī*, as the representatives of female emancipation; whilst the unsavoury *Kumbhakārī Adhautagudā* also makes her appearance, hailed by the women as their 'mother' and 'teacher' (*upadeshṭrī*). *Viṭopadeśā* then informs her that she has initiated many '*sādhavaḥ*' into '*viṭatā*,' and introduces her to her own friend *Viṭāvataṃsa*, with whose assistance she has accomplished so much, whereupon this worthy pays his respects to the beldame. Meanwhile, *Praśastipaurāṇika*, who has been a witness to this scene, makes his remarks upon the strange modern development of womanhood (अहो स्त्रीणां प्रपंचो गहनः); but when they try to indoctrinate a *Brāhmaṇī* with their new-fangled morals, and when she, though at first shrinking with disgust from the suggestion that she should render homage to a *Kumbhakārī*, shows signs of giving way to their blandishments, he strikes in, and exposes the hollowness of *Viṭāvataṃsa's* doctrine of the superiority of pleasure to duty.

It ends: ततो वेदाः सरस्वती च प्रशस्तपौराणिकं साधुवादेन पूजयतः । प्रगटीभूता प्रशस्तपौराणिकोपरि देवकरच्युता पुष्पवृष्टिः पतति । वेददर्शनेन उत वाग्देवीदर्शनेन सवितृदर्शनात्तमांसीव सर्वे पाखंडा विद्रुताः। भगवती वाग्देवी वेदाश्च जयश्रिया सेव्यमानाः सकलमुनिणै(°मुनिगणैः) स्तूयंते । तद्यथा ।

नमो ऽस्तु [ते] देवि सवितृसारदे
नमो ऽस्तु वेदाः सकलेश्वरेश्वराः ।
सच्छस्त्रसंघाश्च पुराणसंहिता
नमो ऽस्तु वो धर्मपथप्रवर्तकाः ॥ ४६ ॥
वेदाः कुर्वंतु कल्याणं श्रीरस्तु सदने हि नः ।
सारदा सारदा नः स्यात् कारुण्यांबुतरंगिणी ॥ ४७ ॥

इति श्रीकविरविदासविरचितं मिथ्याज्ञानखंडनं नाम नाटकं समाप्तं ॥ नवरसवसुशशिवर्षे कार्त्तिककृष्णदले भूतदिने बुधवारे सूर्यपुरे विमले । शोधः समजनि शंभुद्विजतः क्षंतुमलं मतिमंतः कुर्वंतो वसुधातलममलं ॥

[Dr. John Taylor.]

4201.

1570 B. Foll. 12; size 9¼ in. by 4½ in; Bengalī handwriting of about 1700 A.D.; 8–10 lines in a page.

Dhūrtasamāgama prahasana, a farce, in two acts, by *Jyotirīśvara Kaviśekharācārya*, son of *Dhīreśvara*, and grandson of *Rāmeśvara*.

It begins:

हर्षादम्भोजजन्मप्रभृतिदिविषदां संसदि प्रीतिमत्या
श्वश्र्वा मौलौ पुरारेर्दुहितृपरिणये साक्षतं चुम्ब्यमाने ।
तद्वत्तं मौलिवक्त्रे मिलितमिति भृशं वीक्ष्य चन्द्रः सहासो
दृष्ट्वा तद्भूत्नमाप्नु(!) स्मितसुभगमुखः पातु वः पञ्चवक्त्रः ॥°

The little play has been edited in Ch. Lassen's Anthologia Sanscritica (Bonn, 1838; not reprinted in the 2nd edition), where (pref., p. xi.) the Karṇāṭa king *Narasiṃha*, mentioned in the prologue as the author's patron, is

identified with the king of that name who ruled at Vijayanagara 1487–1507 A.D.

A leaf is wanting at the end; the MS. ending with the first pāda of the last stanza: काले सजलतवर्षिणो जलधाराः सर्वैः समृद्धनभरा(!)

Cf. Aufrecht, Cat. Bodl., no. 281; Sylvain Lévi, Théâtre Indien, pp. 252-3.

[H. T. COLEBROOKE.]

4202.

450b. Foll. 8; size $8\frac{3}{4}$ in. by $3\frac{1}{2}$ in.; legibly written, in Devanāgarī, about 1700 A.D.; 9–12 lines in a page.

Svarṇamuktāvivāda, the dispute of Gold and Pearl for superiority, treated dramatically, in prose and verse, by *Maheśa Paṇḍita.*

It begins: श्रीमहागणपतये नमः॥ श्रीवाराह्यै नमः॥

अस्ति स्वस्तिमती समस्तनगरीसौंदर्यपूर्णा पुरी
ख्याता श्रीनगरी गरीयसि गुणैर्गौरीगुरोः पर्वते।
यत्र स्वर्णमयी सभासु सततं मुक्तामयी च श्रियौ
सेवेते बलभद्रराजचरणावन्योन्यसंस्पर्धया॥१॥

सुवर्णं। इतस्ततः सभ्यकंठकर्णांगुलीष्ववलोक्य सक्रोधं।

भो सभ्याः कथयंतु केयमधमा सार्धं मया स्पर्धते
केयं कस्य सुता किमीयवनिता कार्यं किमस्याः पुनः।
किं जानाति न मां सुवर्णमखिलैराराध्यमानं सदा
धातूत्तंसमिहापरत्र च सुखासाधारणं कारणं॥२॥ यतः।

यत्राहं निवसामि तत्र गुणिनः शस्त्रं च शास्त्रं तथा
वस्त्रं चापि विचित्रमत्र सुभगा नागास्तुरंगा अपि।
नानादेशसमागताः सुचरिताः संतः कियंतो न वा
भक्ष्यं भोज्यमपीह वस्तु सकलं नानाविधं विद्यते॥३॥

गेहे यस्य वसामि तस्य विविधा वापीतडागादयो
धर्माः शर्मकरास्तनोति सुतुलादानादिदानानि सः।
स्वर्गारोहणकारणानि सकलाः सोमाश्वमेधादयो
यागास्तेन नरेण कर्तुमुचिता विद्यापि तस्यैव सा॥४॥

मुक्ता। सस्मितं।

तातः ख्यातः स पाथोनिधिरतिमहतो रत्नगर्भा च माता
ये ये सौभाग्यवंतो जगति सुकृतिनो नायका मामकास्ते।
स्रायीः कार्यं मदीयं यदिह किमपि वा तद्वयंतो विदंति
क्लीबं कस्मादकस्माद्वदति मयि मुधावर्णमेतत्सुवर्णं॥५॥

भ्राता मे स कलानिधिर्गिरिसुताभर्तुः शिरोभूषणं
या सा मे भगिनी रमा भगवतो वक्षःस्थलस्थायिनी।
किं चाहं च समस्तराजरमणीवक्षोजभूषाकरी
मुक्तानाम गुणैकधाम सततं निर्मुक्तदोषव्रजा॥६॥

सुवर्णं। भो भो सारासारविचारचतुराः सभासदः कथमियं
मुक्ता नाम मुक्तलोकलज्जा मां क्लीबमित्याभाषते।

मुकुटकुंडलकंठविभूषणैः कटककंकणकिंकिणिकादिभिः।
पदकपादविभूषणनूपुरैर्जगति संततमंतिकोऽस्म्यहं॥७॥

यदि च शब्दक्लीबतामात्रेण सैषा रंडा समस्तयस्त्रप्रं मां क्लीबमित्याक्षिपते तर्हि निखिलजगज्जनकस्य ब्रह्मणः क्लीबतां कथं नापादयेत्। किं च। दारदैवतपदानां पुंनपुंसकस्त्रीलिंगत्वेऽपि तदर्थानां न तल्लिंगतेति सुप्रसिद्धतरं। अहो सभ्याः नूनमस्यां गणिकायां भवंतोऽपि पक्षपातिनः संतीति मन्ये येनैवं वदंत्यामस्यां मौनमाश्रितं युष्माभिः। न चैतद्युक्तमत्रभवतां। यतः। सभा वा न प्रवेष्टव्या॰ इति धर्मशास्त्रं (M. 8, 13) श्रूयते। यदि च धर्मशास्त्रान्न बिभ्यति भवंतस्तर्हि राजदंडभीतिरपि नास्तीत्यहो महासाहसं।

रागाल्लोभाद्भयाद्वापि स्मृत्यपेतार्थकारिणः।
सभ्याः पृथक्पृथग्दंड्या विवादाद्द्विगुणं दमं॥

इति (*Yājñ.* 2, 4) धर्मशास्त्रस्मरणात्॥ ततः

सभ्याः सुवर्णमवलोक्य सस्मेरं। भो सुवर्ण यत्त्वां कवयः स्थले स्थले क्लीबत्वेन निर्दिशंति तेनैव वयं मौनमाश्रिताः। न तु मुक्तापक्षपातेन।

सुवर्णं। हंत भवंतोऽपि कवीनां वचः प्रमाणयंति। यतः।

कवयः किं न भाषंते किं न जल्पंति मद्यपाः।
राजानः किं न कुर्वंति किं न भक्ष्यंति वायसाः॥

इति कविभिरेव कविवचसामयथार्थत्वकथनादित्यलमसत्कलहेनेति तूष्णीं बभूव।

मुक्ता। तदेतत्सुवर्णवचनमाकर्ण्य सगर्वं।

हे हे हिरण्य दुर्वर्णवादिन् किं गर्वमावहसे।
त्वमाकरजनिः स्वर्ण रत्नाकरजनिस्त्वहं॥०

Subsequently, Silver (*rajata*) and Diamond (*hīraka*) join in the dispute, on the part of the precious metals and stones respectively; but, in the end, king *Balabhadradeva* himself is appealed to, and, with diplomatic tact, settles the dispute by allowing to each side its own special merits and sphere of usefulness.

It ends: राज्ञा। पुनः सस्मेरं। भो सुवर्णास्मत्सभायामभिमानमपहाय मिलित्वैव स्थीयतां। ०। किं च।

युष्माकं यादृशी कांतिः कांचनेन सहामुना।
नान्यथा तादृशी तेन मिलित्वैवास्यतामिह॥

हीरकं। स्वमनसि विचार्य। भो मुक्ते साधूक्तं सकलार्थतत्त्वविदा महाराजेन। यतः। उपकर्त्रारिणा संधिर्न०॥ उपकारोऽमुनास्माकं कांचनेन महान्कृतः। यतः। तत्तद्दूरनिवासिनो ऽस्मानानीय परमपवित्रमूर्तेर्भगवच्चरणशरणस्यानंतदानमानसंतोषितभूरिसुरप्रवरस्य विविधविद्याप्रचुरतरपंडितमंडलीमंडितसभामंडपस्य निजकीर्तिकौमुदीमोदितजगत्पद्मस्य क्षितिपालचयचमूचक्रचूडामणिश्रेणिनीराजितोपांतपदद्वयांभोजकिर्मीरितस्वर्णपीठस्यास्य महाराजस्य दर्शनं कारितं। किं च।

उपजीव्यविरोधेन न कुतश्चिदवस्थितिः।
पश्येंधनविरोधेन दहनस्य कुतः स्थितिः॥

तस्मात्साधूक्तं महाराजेन बलभद्रदेवेन मिलित्वैवास्यतामिति।

सर्वाकूपारपारस्थितमपि विविधं वस्तुजातं समस्तं
शस्तं यत्पादपीठं क्षितितलममलं सर्वदालंकरोति।
सोऽसौ भूचक्रवर्ती जगदखिलमहाधीरवीराग्रवर्ती
प्राज्यं राज्यं विधत्तां नृपतिकुलमणिः साहिबाहादुरेन्द्रः॥१॥

इयं श्रीनगरीयस्य श्रीमहेशमनीषिणः।
निर्मितिः शर्म निर्मातु निर्मत्सरमनीषिणां॥२॥

इति श्रीमहेशपंडितविरचितः स्वर्णमुक्ताविवादः समाप्तः॥

The *Balabhadra Deva* of *Śrīnagarī*, who thus acts as referee, and to whom the little play is dedicated, was probably the author's patron; whilst the *Sāhi Bāhādurendra* (*bhūcakravartin*) referred to in the first of the concluding ślokas may have been intended for the contemporary suzerain king of Guzerat, *Bahādur Shāh*[1] (1526-1537).

This little work has been printed in the *Laghukāvyāni* (pp. 171 ff.), forming part of the Bombay magazine *Kāvyetihāsasangraha*, vol. 10; but unfortunately this edition was not available for consultation when the foregoing extracts were made.

[H. T. Colebrooke.]

4203.

243. Foll. 102 (counted 101, no. 46 being double); size $12\frac{1}{4}$ in. by $4\frac{1}{4}$ in.; good, modern Bengālī handwriting (omitting, however, the diacritic dot of the *r*); six (from fol. 48 seven) lines in a page.

Ānandalatikā, a dramatic poem, in five sections (*kusuma*), on the love of *Sama* and *Revā*, by *Krishṇanātha Sārvabhauma-bhaṭṭācārya*, son of *Durgādāsa Cakravartin*.

Though exhibiting some of the forms of a *nāṭaka* (and marked as such outside), the work is devoid of all real dramatic action, being rather a collection of poetry, descriptive and narrative, with interspersed dialogues and *quasi* stage directions.

It begins (with the numbers supplied):

संभ्रान्तं नमदुन्नमत्क्षितिलुठद्गीर्वाणमूर्धावली
चञ्चच्चामरचारुकुन्तलचयध्वान्तालिसंवर्धिनी।
तेषां फुल्लविलोचनाम्बुजदलान्युल्लासयन्ती परं
चित्रा तन्नखचन्द्रिकावलिरियं चेतो ममालम्बतां॥१॥

सानन्दं वन्दनाय क्षितितलविलसन्मौलिचन्द्रार्धमौलेर्
व्यालश्वासप्रदीप्तोद्भटनयनशिखिज्वालया दग्धमर्मा।
शीतांशुः पादपद्मं हिमगिरिदुहितुः शीतलं यो निषण्णः
पीयूषस्निग्धदेहो विलसति नखरः सोऽयमव्याच्चिरं वः॥२॥

एणीलोचनमिन्दुबिम्बविमलज्योत्स्नां पिकीकूजितं
हंसीमञ्जुगतिं जहार भवती व्यक्तं जगन्मण्डले।
मच्चित्तं वद कुत्र गोपितमिति व्याहृत्य गोपीस्तनान्
मुञ्चन्कञ्चुलिकां विचारचतुरो मुग्धो हरिः पातु वः॥३॥

---

[1] This was suggested by Mr. L. D. Barnett, who kindly supplied me with the (not very satisfactory) readings of the Bombay edition in the final ślokas and colophon, viz.:—

योऽसौ . . . वीरधीराग्रवर्ती० ॥६०॥
इयं श्रीनगरी यस्य श्रीमहेशमनीषिण।
निर्मितः शर्मनिर्मातुर्निर्मत्सरमनीषिणा॥६१॥

इति सुवर्णमुक्तासंवादः समाप्तः॥

शम्भोर्नर्तनधूतमञ्जुलजटाक्षेपेण संपातितैर्
गाङ्गैर्वारिभिराशु मुण्डनिवहे शैवीतनूमाश्रिते ।
गौरीमुत्सुकयन् गणांश्च मुखयन् सुस्मेरलम्बोदरो
मातेयं तव जाह्नवीति पितरं संव्रीडयन् पातु वः ॥ ४ ॥

आकर्ण्य सभ्याः । भो आनन्दक साधु साधु नान्दीभिर्नन्दिता वयं । किंतु देवस्य चिन्तामणेर्जामातृपरिणेतृनीततनयानिमित्तमन्यादृशमानसं । तदस्य मनोनिर्वेदजनकमपि प्रबन्धं प्रस्तावय ।

आनन्दकः । आर्याः । श्रीमन्नन्दनन्दनचरणसरसीरुहमननपरित्यक्तविषयरसश्रीदुर्गादासचक्रवर्तितनयेन श्रीकृष्णनाथकविना विरचितमानन्दलतिकानामप्रबन्धमधीतवानस्मि । तद्यदि देवरुचये भवति । अथवा श्रीपुरुषोत्तमदेवचरितेन तावदात्मानमपि पवित्रयामि । तथा हि ।

दीर्घासदालपनगाढजडां रसज्ञां
शुद्धां करोमि गुणवारिनिधौ विभूनां ।
स्वर्वाहिनीपयसि भूरिविधूततुण्डः
काको ऽपि चञ्चुपुटकं विमलीकरोति ॥ ५ ॥

इति सभ्येषु निवेद्य नृपतिपुरत उपसृत्य प्रकटितकरपुटकः प्रचलद्भवदलः सविनयनमितकन्धरः क्षितिपतिपदनिहितनयनस्तिष्ठति ।

राजा । अवलोक्य । अये आनन्दक । किमपि विवक्षुरिव वीक्ष्यसे । तत्किमिति मौनमास्थितं भवता ॥

आनन्द[:] । महाराज मन्यगरलितं (?सम्यगवसितं) देवैः । तथा हि ।

अभिनवकविकवितेयं भरति न वा रुचमेतदभिज्ञानां ।
हरति वा वितचित्तं चटुलयति मां हरेर्गुणानुवादः[1] ॥ ६ ॥

[राजा ।] भो आनन्दक । प्रभुगुणविरलितप्रबन्धमधीतवान् भवान् ।
तदलमेतावता विनयप्रबन्धेन विलम्बावलम्बनेनापि ।

आनन्दः । यथाज्ञा[प]यति[देवः ।] तदेव प्रस्तौति ।

कुरुक्षेत्रं यातैः क्षितिपनिवहैर्भूरिविभवैर्
महारत्नौघानां वितरणभरैर्दीननिकरान् ।
महाद्यान्कुर्वद्भिः क्षुभितकनकाद्रिप्रभृतिभिर्
महेष्वासैरासीत् क्षितिरपि तदा देवभवनं ॥ ७ ॥

कृतार्थयन्साधुजनेक्षणानि पिपासयन्दुर्जनमानसानि ।
आनन्दयन्नागतनन्दमुख्यास्तस्मिन्प्रभुः पौरजनैर्जगाम ॥ ८ ॥

निशम्य लोकैरिहलोकनाथं स्नेहस्रवत्पीनपयोधराया ।
तदा यशोदा सुतधीविमुग्धा तद्दर्शनव्यग्रमना हरोद ॥ ९ ॥

देवो ऽपि सद्भावगृहीतमानसस्
चिरेण विश्वोरवलोकलालसः ।
पुरेव बालोचितवेशपेशलो(*r.* °वेव°)
गोपाकृतिः पादगतिं प्रतस्थे ॥ १० ॥

पुरा वयस्यैर्व्रजबालसंघैरालोकितो वर्त्मनि तैर्मुकुन्दः ।
निवेदितोऽथ व्रजनाथपत्न्यामन्तःपुरं तूर्णमथाविवेश ॥११॥°५०॥

नोद्धवादिरपि गोपनन्दनान् रुक्मिणीप्रभृतयो न यस्वरीः ।
न प्रभू च पितरौ व्रजेश्वरौ चेतसो गमयितुं रमापतेः ॥५१॥

सभ्याः । साधु भो आनन्दक साधु । उचितप्रस्तावैर्वयमानन्दिताः ।

ततः आनन्दकः ।

अत्रान्तरे पुलकपूरितदेहयष्टिम्
आनन्दजेन नयनाम्बुकरेण सिञ्चन् ।
दूराद्विभोः समवलोकनमुग्धचेताः
श्रीनारदः क्षितितलं मुनिराजगाम ॥ ५२ ॥

तं नारदं वीक्ष्य सुदूरतो ऽपि विहाय सिंहासनमाशु देवः ।
जगाम तस्यान्तिकमेव तूर्णं भूमिं पदाम्भोरुहमण्डयन्सः ॥५३॥

योगीन्द्रवृन्दैरपि वन्दितोऽपि ब्रह्मेशजं भाविभिरर्चितोऽपि ।
तदङ्घ्रियुग्मे जगदेकनाथो दण्डो यथा मारकतः पपात ॥
[५४ ॥ °५५ ॥

कालिन्दीं प्रति नारदः ।

विहाय रुक्मिणीगेहमपि सत्यानिकेतनं ।
मामिहानीतवान्देवः सौभाग्यं पर्यवस्य ॥ ५६ ॥

देवः । स्वगतं ।

जानाति नर्म न रमा मयि कुप्यतीति
वृत्तं निशम्य कुपिता किल सत्यभामा ।
भूयोऽपि हन्त मुनिना स्मृतपारिजाता
पूर्वाधिको मम पुनः पृथुलः प्रमादः ॥ ५७ ॥

नारदः । देव ।

तवानुरूपा दयिता यथा मामतोषयच्छुद्धतमान्तरेण ।
प्रतिप्रियं तस्य करोतु को वा स्वीयानुरूपं तु निरूपयामि ॥५८॥

मालवाधिपतिर्देव दमनो नाम भूपतिः ।
विभवैर्भक्तियोगैश्च न यस्य प्रतिमो भुवि ॥ ५९ ॥

निखिलान्तर्निगूढानां गोचरः सर्वमेव हि ।
तथाप्यमुष्यास्तोषाय प्रलपामि पुरः प्रभोः ॥ ६० ॥

[1] ? Read हरति न वा हितचित्तं चटुलयति मां हरिगुणवादः ॥

तनया तस्य भूपस्य जगदुत्तररूपिणी ।
नाम रेवा गुणास्तस्या नाहं वर्णयितुं क्षमः ॥ ८१ ॥

तवात्मजे सा दृढबद्धभावा स्वयंवरार्थं यतते पितास्याः ।
द्विजोऽपि पत्री विनिवेश्य मूर्ध्नि समागतप्राय इवावधेहि
॥ ८२ ॥ ०९२ ॥

अथ त्वदीयस्तनयः समोऽपि स्वीयानुरूपां दयितां दिदृक्षुः ।
विद्यां समाश्रित्य मयैव दत्तां[1] क्षितीश्वराणां पुरमाविवेश
॥ ९३ ॥ ०९९ ॥

In the course of his quest of a suitable consort, he arrives at *Damana's* city, and hearing the praises of *Revā* sung, he enters the palace unseen.

ततः शयानां मणिवेदिकायां शशाङ्कशृङ्गीमधिरुह्य शय्यां ।
चकार नेत्रातिथिमेव रेवां सरिद्विलीनामिव राजहंसीं॥१००॥

अथ विलोक्य समो दमनात्मजामनुभवन् पुनर्भवनिर्वृतिं ।
तरलितोऽग्रजकूटमनोभुवा स्वगतमित्थमभाषत तद्गुणान्॥१०१॥

Subsequently the sleeping maid awakens, and they plight their faith to each other.

II. (fol 40*a*):

मन्दं मन्दं क्षिपति चरणं चिन्तयन्प्रेम तस्यास्
तूर्णं तूर्णं किरति नयनं पृष्ठतस्तद्भ्रमेण ।
वारं वारं जपति निभृतं भाषितानि प्रिया[णि]
दीर्घं दीर्घं श्वसिति च समः कम्पमानाखिलाङ्गः॥०

Sama's friend, *Subhūti*, son of *Uddhava*, noticing the change in the prince's condition, is told in detail what has occurred, and the love-sick prince then proceeds to paint from memory the portrait of his beloved, which occupation affords ample scope for depicting the lover's feelings.

III. (fol. 50*a*):

अथो मुनीन्द्रादवगत्य भूपः समाधिविज्ञातसमस्तवृत्तं ।
निजानुरूपे प्रतिलब्धभावां सुतां स विज्ञाय परं तुतोष ॥ १ ॥

प्रलोभितेयं मदनानुजेन(!)जहौ न धर्मं कुलजाङ्गनायाः ।
रहोगतापीति महीमहेन्द्रः प्रियान्वितस्तां प्रशशंस रेवां ॥२॥

[1] Viz., the power of entering anywhere without being seen by others.

The king issues invitations to the *svayamvara*, and various scenes of amusement in connection therewith are depicted.

IV. (fol. 67*b*):

अथोदिते भास्वति भूमिपालास्तच्चिन्तनोन्निद्रितलोहिताक्षाः ।
माध्वीकरम्यामपि वन्दिगीतां स्तुतिं तदानीं विफलां वितेनुः॥१॥

The princes assemble, and at length the princess herself enters the festive hall.

शीतांशुबिम्बवदना स्तनभारनम्रा
स्वेदाम्बुबिन्दुमनुबिम्बितपल्लवौष्ठी ।
भूदेवपाणिपरिदर्शितवर्त्मनैव
बाला जगाम मगधाधिपसंनिधानं ॥ ३६ ॥

भूपात्मजां द्विजवरः पुरतो निधाय
बद्धाञ्जलिर्नमितमौलिरिदं बभाषे ।
कीर्तिप्रतापजयदानमहीमहेन्द्र
भूपावधेहि यदहं विनिवेदयामि ॥ ३७ ॥

एषा पुरा नृपसुता शयिता निशायां
स्वप्ने कुतोऽप्यधिगता कठिनां समस्यां ।
लब्ध्वैव(*r*. लब्ध्वैव) बाल्यचपला स्वकरग्रहेऽपि
तत्पूरणं च पण इत्यकरोत्प्रतिज्ञां ॥ ३८ ॥

इति काञ्चनपटलिखितां समस्यामर्पयति । राजा सादरं प्रगृह्य वाचयति ।

रोपाभिधो धीरसमो ऽप्यधीरः
को मित्त्रजामित्त्रजनप्रसूतः । इति ।

The king of Magadha being unable to complete the verse, the rulers of Kaliṅga, Karṇāṭa, Avanti, Kāmarūpa and others are successively tried without success, until at last the princess and her companion come to the Yadu prince.

एवं तयोः स्फुटतमे दृढभावबन्धे
तं पश्यतामपि जयाशिषि निःसृतायां ।
भूपेषु मूर्छिततमेषु करे समस्य
विन्यस्तवान्द्विजवरः कठिनां समस्यां ॥७२॥०७४॥

ईषद्विहस्य जलदध्वनिराशु तेषाम्
उत्कण्ठया सह ददर्श तदर्धमेव ।
आधूतमौलिदयिताननदृष्टिवर्गं
सो ऽपूरयत् प्रियतमातिमनोरथेन ॥ ७५ ॥

रौपाभिधो धीरसमो ऽप्यधीरः
को मित्रजामित्रजनप्रसूतः[1] ।
कृष्णात्मजो ऽसौ सम एव नान्यः
प्रासूत कालिन्द्यपि यं स एषः ॥ ७६ ॥

ततः क्षमानाथसुता कराभ्यामानीय नम्रा कलधौतमालां ।
प्रेम्णा समालिङ्गनमोददात्री कण्ठे ऽर्पयामास मुदा प्रियस्य ॥७७॥
[०७८॥

तस्मिन्धृते पूरितमानसानां पौराङ्गनानां बहुसाधुवादः ।
तयोः सुखायापरभूभुजां च श्रवःसमीपे ऽजनि वज्रपातः ॥ ७९ ॥०

This section concludes with the marriage of the couple.

v. (fol. 83*a*) : अथ यामिनीशेषे विकासितकुसुमारचनाय प्रस्थिते सुमुखीप्रियकथे ॥

सुमु० । सखि प्रियकथे ।

श्रेणीभूय मधुव्रतस्फुटरवैरुन्निद्रिताः सादरं
सद्वृत्तस्तवकस्तनोपरि लसच्छाखाभुजालिङ्गिताः ।
ईषत्स्मेरनवप्रसूनवदनाहूतानिलैश्चुम्बिताः
पश्योद्याननवा[ङ्कुराः] प्रियसखीं संस्मारयन्तीक्षिताः
[॥ १ ॥ ०५॥

प्रिय० । सखि सुमुखि । तव वाणीरसतरङ्गिण्यपि न मां सुखयति ॥

सुमु० । किमिति ॥

प्रिय० । आकौमारं यया साधं जन्मैतद्यापितं मया ।
तां विहाय निशा नीता किमस्मादपि दुःखदं ॥६॥०७॥

तन्वङ्गी सहचारिणीविरहिता मृद्वी शिरीषादपि
शून्यान्येव जगन्ति पश्यति सखीं का वा प्रियां पृच्छति ।
अङ्कं नैव जहाति मातुरधुनाप्येकाकिनी बालिका
नो जाने नृपजा समेन सहिता जागर्ति निद्राति वा ॥ ८ ॥

सुमु० । सखि प्रियकथे । केवलमुदारचरितैव भवती सा पुनश्चिराभिलषितनिधिमिव लभ्मा(लब्ध्वा) विलयति (? विलसति) ॥

प्रिय० । सखि सुमुखि । स्वयंवरसमाहूतकुलवधूनामनुनयाय देव्या समादिष्टास्मीति तदनभिज्ञा[हं।] तदा मूलतः कथय ॥

सुमु० । सखि शृणु । सा हि

भूषाभिराशोभितदेहवल्ली स्वकान्तिविद्योतितदिग्विभागा ।
नीता सखीभिः शयनीयसीम्नि नवाङ्गनैवाजनि नम्रमौलिः ॥९॥

चिरेण कान्ताननयामिनीपतेर्निभालनोत्कण्ठितमानसाकुला ।
तदार्द्रदृष्टिप्रणयेन कीलिता पुरः सखीनामिति भूरिलज्जिता ॥१०॥

प्रिय० । सखि ततस्ततः ॥

सुमु० । ततो मयैता अपनीय मन्दिराद्
गवाक्षविन्यस्तदृशा निशायां ।
तयोरपूर्वप्रणयैकपात्रो(?॰प्रणयैकपात्रो)
विलोकितं प्रेम विनिर्मितं रहः ॥ ११ ॥

यातासु तासु प्रणयेन रेवासायन्यनिर्यातगभीरधैर्या ।
नेत्राम्बुधौतस्तनकुङ्कुमेव बद्धाञ्जलिस्तत्पदयोर्ननाम ॥ १२ ॥
करेण संगृह्य करं प्रियायाः लब्धाखिलाङ्गः क्षणमास तूष्णीं ।
ततो ह विन्यासितबाहुबन्धो रेवां समालिङ्गति निर्भरं सः
[॥ १३ ॥ ०२२ ॥

ईदृग्विधानि कति नाम विलोकितानि
सौभाग्यभाञ्जि चरितानि तयोर्निशायां ।
नेत्रं ममैव सफलीकृतमद्य किंतु
रेवा गमिष्यति पुरादिति मूर्च्छितास्मि ॥ २३ ॥

प्रिय० । सखि सुमुखि । क्व यास्यति रेवा द्वारावत्यां किं न पश्यसि ।

द्वारि द्वारि द्विरदपतयः पृष्ठविन्यस्तहेयाः
स्थाने स्थाने करधृतसुखस्वर्णपाशास्तुरङ्गाः ।
भेरीध्वानैश्चमकितदृशः सायुधा योधमुख्या
रेवा गन्तो(गन्ता) स्वपुरमिति वेत्रिणो घोषयन्तु ॥ २४ ॥

प्रियसखि । किमेतेन पुष्पावचयनेन तामेव विलोकयामीत्युभे प्रस्थिते । कियद्दूरं गत्वा प्रस्थानकोलाहलाकलनविकलं नृपतिमवलोक्य ।

सुमुखी । प्रियकथे । नृपतिं विलपन्तमवलोकयन्त्या द्विगुणं विदार्यते मम हृदयं । तदत्र क्षणं विश्रामयामीत्युभे उपविश्य राजानं निर्वर्णयतः ।

राजा । रेवा यास्यति हन्त नाथनिलयं बालानतिज्ञा कथं
शुश्रूषां प्रविधास्यति श्वशुरयोः पत्युर्मनोरञ्जनं ।
क्षुद्गृतापविपीडिता च कुलजा कस्मै किलाख्यास्यते
शून्यान्येव दिवां मुखानि किमहो पश्यामि तां चिन्तयन्
[॥ २५ ॥ ०२६ ॥ इति रोदिति ॥

अमात्यः । देव । नायं विषादसमयः । तदलमावेशेन । भगवतः प्रस्थानाय त्वरयन्ति वेत्रपाणिनः । तदाज्ञापय तत्र प्रयाणाय ॥

राजा । ससंभ्रमं । साधु मन्त्रितं । तदग्रतो गच्छ ॥

[अमात्यः ।] यथाज्ञापयसि । इति तथा करोति ॥

---

[1] That is, son of Kālindī (*i.e.* Yamunā, daughter of the Sun) and her friend (or husband Kṛishṇa).

राजा । भगवतश्चरणसविधं गत्वाऽष्टाङ्गपातं प्रणम्य बद्धाञ्जलिः ।

पूर्णानन्दमगाधबोधनिलयं यं निर्गुणं निष्क्रियं
निर्वाणाय हृदि स्थितं स्थिरधियो युञ्जन्ति सद्योगिनः ।
सुस्निग्धाञ्जनकीर्तिपीतवसनं(? °कीर्णि°) रूपं जगन्मोहनं
भक्ता यस्य भजन्ति न्मखनिरतं(? शेष°) तस्मै नमो विष्णवे ॥२७॥°

Subsequently the young couple take their departure, in *Revā's* parting words occurring the verse :—

नम्रत्वं गुरुषु प्रभौ सरलता बन्धौ दया पूरुषे
चान्यस्मिन् विषधी(!) वहिर्न गमनं लोभ्ये(? लौल्ये) तितिक्षा परा ।
मौनं विप्रियवादिनि प्रियकथा भृत्येषु धर्मे मतिर्
मातर्धर्म इतीरितः कुलभुवां चित्ते दृढं धारयः(?धारितः)॥४९॥

Then follows the description of the journey to and entrance into Dvārāvatī, in the kāvya style, with prose dialogues and stage directions thrown in, as when, on their way, they visit the *maharshi Ashṭāvakra's* forest retreat (fol. 94*a*) :—

रेवा । ससंभ्रमं । नाथ क्षणमत्र रथं विश्रामय । अदृष्टपूर्वाणीदृशतपोवनानि ।

तथा हि ।

नवनवतरुशोभा लोभयत्येशुदृष्टि (? °यत्यश्चदृष्टिं)
सुखयति मम गात्राण्यालवालाम्बुवाणुः ।
सुरभिकुसुमगन्धा मानसं मादयन्ति
ह्यभयहरिणशावाः पाणिमुत्कण्ठयन्ति ॥ ६८ ॥

अपि च ।

नानापुष्पितपादपाः प्रतिदिशो नृत्यन्मयूराः स्थली-
शाखायामभयाः पठन्ति किमहो सामानि शुद्धं शुकाः ।
माध्वीकान्मधुरं कपोलमधुलिट्पुंस्कोकिलैः क्षीयते
आघ्रातुं रथवाजिनामपि मुखान्यायान्ति मुग्धा मृगाः ॥६९॥

तदत्र क्षणमवस्थातुमिच्छामि ॥

समः । प्रिये युज्यते । अत्र हि महर्षिरष्टावक्रः प्रतिवसति । तदवहेलनमनुचितं ॥ सारथिं प्रति । अये भद्रक यावदावां महर्षिमष्टावक्रं प्रणम्यागच्छावस्तावदश्वान् पालय ।

सौभ° । यथाज्ञापयति देव इति तथा करोति ।

समः । परिजनान् प्रति । अयमुग्रस्तपोधनस्तद्यूयमत्रैव तिष्ठत । इत्युभौ गच्छतः ॥

समः । प्रिये । एहि पश्य ।

तरूणां नैविड्यान्मिहिरकवलेशो न धरणौ
प्रभावैः पुण्यानां कुसु[मित]मिदं सर्वमभवत् ।
सुपक्वैः सुस्वादैर्बहुतरफलैर्नम्रवितपस्
तवातिथ्यं मन्ये किसलयकरेणैव कुरुते ॥ ७० ॥

It ends :

ईषद्दृष्टिकताल्पवाक्यविभवः स्तोकाक्षरज्ञो जनो
विश्वासोककरापधीश्वरसदानन्ताखिलज्ञानिनः(?) ।
यन्मौढ्याद् गुणवर्णनाय रसनां व्यामोहयत्यादरात्
चापल्यं तदिदं दयालुहृदयैः क्षन्तव्यमार्यैर्बुधैः ॥

चित्ते कामवशंवदे मृगदृशां वक्त्रेन्दुलुब्धे ऽक्षिणि
कर्णे च प्रतिवाचिकप्रणयिनि स्पर्शादरिण्या(?°ण्यां)त्वचि ।
पाणौ वेङ्गितसेविनि स्तुतिकथामुग्धो (*r.* °मुग्धे) रसज्ञादले
धावत्स्वेषु रतेन्द्रियेषु महिमा कैस्तिपैर्वर्ण्यते(?) ॥

कविवरकृतकाव्येष्वत्र चित्रेषु सत्सु
तदपि सरलमुख्यैरेतदालोचनीयं ।
सति हि कनकहाने (?°हारे) रत्नयुक्तादिचित्रे
लघुरपि हृदि काचो न्यस्यते कामिनीभिः ॥[१३७]॥

इति श्रीमहामहोपाध्यायकृष्णनाथसार्वभौमभट्टाचार्यविरचितानन्दलतिकायां पञ्चमकुसुमं ॥

[H. T. Colebrooke.]

BINDING SECT. OCT 2 1968

Z
6621
G78S3
v.2
pt.5-7
cop.2

Gt. Brit. India Office. Library
Catalogue of the Sanskrit manuscripts in the library of the India Office

[redacted]

For use in the Library ONLY

PLEASE DO NOT REMOVE
CARDS OR SLIPS FROM THIS POCKET

UNIVERSITY OF TORONTO LIBRARY